श्रीवेङ्कटेश्वरविरचितम्

श्रीमच्चित्रबन्धरामायणम्

श्रीयज्ञनारायणभट्टकृतबालप्रबोधाख्यव्याख्ययोपेतम्

सम्पादकः

डॉ० भानुमूर्तिः जम्मलमडक

प्रवाचकः

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)

श्रीसदाशिवपरिसरः, पुरी - ७५२ ००१

JP

जया प्रकाशनम्

पुरी

B-3

प्रिय सुहृदे
कीर्तिकान्तशर्मणे
सस्नेहं समर्पये
Bimul
28/09/15

श्रीवेङ्कटेश्वरविरचितम्

श्रीमच्चित्रबन्धरामायणम्

सम्पादकः

डॉ० भानुमूर्तिः जम्मलमडक

प्रवाचकः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
श्रीसदाशिवपरिसरः, पुरी - ७५२ ००१

JP

जया प्रकाशनम्
पुरी

श्रीवेङ्कटेश्वरविरचितम्

श्रीमच्चित्रबन्धरामायणम्

Sri Venkateswaravirachitam
Srimacchitrabandharamayanam
(A thesis awarded Vidyavaridhi(Ph.D) by Rashtriya Sanskrit Sansthan, New Delhi in the year 1985)

सम्पादकः - *(Edited by)*
भानुमूर्तिः जम्मलमडक
Bhanumurthy Jammalamadaka

प्रकाशिका - *(Publisher)*
जयलक्ष्मी जम्मलमडक
Jayalakshmi Jammalamadaka
MIG-10
Near Central School, Puri - 2

प्रथमप्रकाशनम् - २००२

First Edition - 2002

प्रतयः - ५००

Copies - 500

मूल्यम् - १४०/-

Price - 140/-

Type Set by :

Gangadhar Mishra
EWS-25, Opp. Central School,
Puri - 752 002, (Orissa)
Ph. (06752) 250528, Mobile : 9861017350

Printed at :

Mahavir (Off-Set) Press
Marchikote Lane, Grand Road
Puri-752 001 (Orissa), Ph. 226710

कृतज्ञतार्पणम्

भारतीयपरम्परायां रामायणस्य अस्ति महद्विशिष्टं स्थानम्। तेषु बहुभिः रचितेषु रामायणेषु अस्ति महत्वं एकैकस्य इतरेभ्यः रामायणेभ्यः। एवमेव वेंकटेश्वरनामकविना रामायणं चित्रबन्धेषु निबद्धमस्ति। तत्र सर्वेषु बन्धेषु निर्माणेन काव्यतत्त्वमपगतं स्यात् इति धिया केषाञ्चनशब्दालङ्काराणां, बन्धानां च निवेशनं अस्मिन् काव्ये कृतम्। शब्दालङ्काराणां निवेशः रसानुगुणं कुर्यात् इति आनन्दवर्धनाचार्याणां अनुशासनमनुपालयति वा इति कृत्स्नं काव्यं रचयामास। अलङ्कारप्रधानकाव्यानि अल्पानि, तत्राऽपि निगूढार्थकत्व शब्दागाम्भीर्यत्वादियुक्तशब्दालङ्कारकाव्यानां निर्माणं दुष्करमिति, तत्र सहृदयानां प्रवृत्तिः न भवति इति, न कुर्वन्ति प्रयत्नं कवयः। परमयं वेङ्कटेश्वरकविः शब्दालङ्कारकाव्यप्रपञ्चन्यूनतापनयनाय करोति वा इति भासयन् अतिमधुररामकथां निर्माति चित्रबन्धेषु। काव्यलक्षणावसरे रमणीयार्थप्रतिपादकः शब्दः काव्यमिति जगन्नाथः अलिलक्षयिषत्। इदं तु सामान्यलक्षणमिति अधमकाव्येऽपि रामणीयर्थं प्रतिपादकत्वं लोकोत्तराह्लादजनकत्वं भवेदेव, अन्यथा अधमकाव्ये स्व काव्यलक्षणस्य अव्याप्तिः।

इदं चित्रबन्धरामायणं यद्यपि चित्रप्रधानकाव्यम्, अस्मिन् काव्ये अष्टादशवर्णनानि कृतानि इति, किरातार्जुनीय, शिशुपालवधादिषु इव प्रथमसर्गादौ, मङ्गलमय श्रीशब्दप्रयोगः, तथा सर्गान्तिश्लोकेषु च श्रीशब्दप्रयोगं करोतीति मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि इति शिष्टाचारवचनमनुकरोतीति महाकाव्यत्वञ्चाधितिष्ठति। अस्य महत्त्वपूर्णकाव्यस्य उपलब्धिः जगतः काल्याणाय भवतीति महदाशयेन सम्पादनाय प्रवृत्तः शोधकर्ता। अस्य काव्यस्य द्वेमातृके उपलभ्येते, अपि च व्याख्यानस्य तिस्रः मातृकाः उपलभ्यन्ते। मूलचित्रबन्धरामायणम् सम्पूर्णमुपलभ्यते। परं चित्रबन्धरामायणस्य ग्रन्थकर्तुः पित्रा निर्मित बालप्रबोधाख्यव्याख्या तु असम्पूर्णा इति मातृकाभिः अवगम्यते। लोके इव व्याख्यातृणां वरीयता अस्मिन् काव्येऽपि दरीदृश्यते। साहित्येतर शास्त्राणां पाण्डित्यं आसमन्तात् परिदृश्यते। कथावस्त्वविच्छिन्नरूपेण यथा भवेत् तथा कविना रचितमिदं काव्यम्।

सर्वाः मातृकाः तञ्जावूरुस्थसरस्वतीमहलपुस्तकालये उपलभ्यन्ते। तासां संख्या ३६७२ आरभ्य ३६७६ यावत् वर्तते। द्वे तेलुगुलिप्यां, तिस्रः देवनागरिलिप्यां च परिदृश्यन्ते।

एतत्प्रतिलिपिकरणाय महान्तं स्नेहं प्राकट्य साहाय्यं दत्तवतां ताञ्जावूरुसरस्वतीमहलपुस्तकालयाधिकारिणां कार्तज्ञ्यं वहामि।

ततः सदा क्लेशेषु हस्तावलम्बनं दत्वा अस्य समापनकर्मणि मार्गदर्शनं दत्तवतां प्रथितयशसां आचार्याणां श्रीधरवासिष्ठ गुरुचरणानां चरणयोः कार्तज्ञ्यं सविनयं विनिवेदयामि।

छात्राणां सततकल्याणकामानां, स्वोचितकर्मणा राष्ट्रपति सम्मानितानां प्राचार्याणां श्रीमतां मण्डनमिश्राणां सप्रश्रयं कृतज्ञतां समर्पये। सतत वेदान्तोपवनविहाररसिकानां सतत अध्ययनशीलानां स्वोपस्थितौ उपकृतवतां मम मार्गदर्शकचराणां श्रीस्वामिनाथ-महाभागानां साञ्जलिबद्धं कृतज्ञतां वितरामि।

ग्रन्थास्यास्य मुद्रणे अजस्रमभिप्रेरणां दत्वा मुद्रणावाप्तिकामानां बद्धादराणां भ्रातृकल्पानां डॉ० नागवरप्रसादरावु चण्ड्रपाटिमहोदयानां साहाय्यं न विस्मरामि, तेभ्यः आधमर्ण्यं वहामि।

संङ्गणकयन्त्रस्य कार्यं कृत्वा समाप्तिं प्रापितवताय अनुजकल्पाय श्रीगङ्गाधरमिश्रमहाभागाय मम साधुवादान्, आशिषञ्च विनिवेदयामि।

एवमेव मम अनुसन्धानकार्यसम्पन्नाय प्रत्यक्षेणाप्रत्येण चोपकृतवतां सतां सर्वेषां हार्दिकाञ्जलिं समर्पये।

इत्थं
सुधियां विधेयः

भानुमूर्तिः जम्मलमडक

विद्वदाशंसनम्



स्वस्ति

महदयं प्रमोदस्य विषयः यत्, भानुमुर्ति जम्मलमडक मम मार्गदर्शने शोधोपाधिं विद्यावारिधिं पञ्चाशीत्युत्तरेकोनविंशतिशतके अवाप्तवान्। तस्य वाक्परीक्षायां परीक्षकाभ्यां मुद्रापणीयोऽयं शोधप्रबन्ध इति शंसितम्। सोऽयं शोधप्रबन्धः इदानीं मुद्रितः इति जानन् नितरां मोमुद्यते मे मनः । एतादृश विलक्षणग्रन्थानां मुद्रणं विद्वल्लोके महदुपकाराय कल्पतेति आशासे । एतादृश कर्मणि वर्धिष्णुरयं सदा व्यापृतस्सन् बहुविधग्रन्थान् प्रकाशयतु इति भगवन्तं जानकीजानिं प्रार्थये ।

महाशिवरात्रिः
२००२

(प्रो० श्रीधरवासिष्ठः)
कुलपतिचरः
गुरुग्रामः
हरियाणा

विषयसूची

प्रथमभागः

विषयः	पृष्ठसंख्या
विद्वदाशंसनम्	
कृतज्ञतार्पणम्	
प्रस्तावना	१
रामायणस्य उत्पत्तिः	
रामायणमहत्वम्	२
चित्रबन्धरामायणस्य रचना	३
ग्रन्थकर्तुः परिचयः	३
व्याख्या कर्तुःपरिचयः	९
पाण्डित्य प्रकर्षः	१०
चित्रबन्धानां अलङ्कारग्रन्थेभ्यः परिचयः	११
चित्रबन्धरामायणस्य महाकाव्यत्वम्	२२
चित्रबन्धरामायणकाव्यस्य उपादेयता	३६
साहित्ये नवप्रस्थानानां संक्षिप्तविवरणम्	३९
चित्रबन्धरामायणस्य अलङ्कार-प्रस्थानान्तर्भूतत्त्वम्	४०

द्वितीयभागः

प्रथमसर्गः (बालकाण्डः)	**१-३२**
मङ्गलाचरणम्	१
पितुर्वन्दना	२
कवेः आत्मनः परिचयः	२
अयोध्यावर्णनम्	३
दशरथस्य वर्णनम्	५
पयोधिस्थशेषशायि वर्णनम्	८
दशरथस्य यज्ञः, पायसप्राप्तिश्च	९
कौसल्यादीनां गर्भवर्णनम्	१०

विषयः	पृष्ठसंख्या
रामदिजन्म, बाल्यावस्थावर्णनम्	१२
यज्ञरक्षणाय रामादिगमनम्	१३
ताटकावर्णनम्	१५
तटाकावधः	१६
यज्ञरक्षणम्	१८
सुबाहु संहारः	२०
विदेह प्रयाणम्	२१
गौतमाश्रमवर्णनम्	२३
अहल्याशापविमोचनम्	२४
जनकसमागमः	२५
शिवधनुर्भङ्गः	२६
दशरथस्यमिथिलागमनम्	२७
रामादिविवाहः	२८
भार्गवरामपराजयः	३१
द्वितीयसर्गः	
दशरथस्य वृद्धावस्था वर्णनम्	३३-५६
रामस्यपट्टाभिषेकचिकीर्षा	३६
कैकयी कोपागारप्रवेशः	३७
दशरथं वरद्वययाचनम्	३८
रामारण्यगमनम्	३९
रामशृङ्गिबेरपुरगमनम्	४०
गङ्गातरणम्	४१
चित्रकूटगमनम्	४२
चित्रकूवर्णनम्	४३
भरतेनायोध्यागमनम्	४६
रामवनगमनवृत्तान्तश्रवणम्	४७
भरतेन वनगमनम्	४९
राघवाश्रमगमनम्	५१
दशरथनिधनवृतान्तकथनम्	५१

विषयः	पृष्ठा संख्या
रामं अयोध्यापुनरागमनप्रार्थना	५२
रामपादुकाप्रदानम्	५२
रामपादुकानामहवत्	५३
पादौभूधृत्वा भरतनिर्वर्तन	५३
वायसवृत्तान्तः	५४
रामदण्डकवनप्रवेशः	५६
तृतीय सर्गः	५७-७७
विराधवधः	५९
सुतीक्ष्णस्याश्रमगमनम्	५९
मुनीनां प्रार्थना	६०
अमलाप्सरससरः दर्शनम्	६०
अगस्त्यसमागमः	६०
वातापिवृतान्तः	६०
अगस्त्यमहत्ववर्णनम्	६१
अगस्त्यादेशात् पञ्चवट्यां	६२
कुटीनिर्माणम्	६२
हेमन्तवर्णनम्	६३
शूर्पणखा वर्णनम	६५
शूर्पणखा श्रोत्रनासिकाखण्डनम्	६७
खरसेनावर्णनम्	६८
खरनिधनम्	७०
शूर्पणखा लङ्काप्रवेशः	७१
मारीचेन सह रावणागमनम्	७१
मारीचेन मृगरूपधारणेन रामप्रतारणम्	७२
जटायुपक्षखण्डनम्	७२
मृगं हत्वा रामः कुटीप्रतिनिवर्तनम्	७२
सीतामार्गणे जटायुदर्शनम्	७३
सीताहरणवृत्तान्तश्रवणम्	७३

विषयः	पृष्ठा संख्या
कबन्धवधः	७३
शबर्याः सपर्या प्राप्तिः	७४
रामविरह वर्णनम्	७४
चतुर्थ सर्गः	**७९-९९**
सुग्रीवायरामलक्ष्मणदर्शनम्	७९
सन्धानाय हनूमत प्रेषणम्	८०
रामसुग्रीवयोः अग्निसाक्षिकं मैत्री	८१
सीतायाः आभरणप्राप्तिः	८१
रामविलापः	८१
विश्वासोत्पादनाय सप्तसालखण्डनम्	८२
वालिसुग्रीवयो र्युद्धम्	८३
सुग्रीवमालाधारणम्	८३
वालिवधः	८४
वालिकृत रामनिन्दा	८५
वालिनः वैकुण्ठप्राप्तिः	८५
रामविप्रलम्भवर्णनम्	८६
शरदृतुवर्णनम्	९०
सुग्रीवस्मारणाय लक्ष्मणप्रेषणम्	९०
सीतामार्गणाय कपि सेनाविसर्जनम्	९२
हनूमतः दक्षिणदिशा गमनमं	९४
वांनराणां गुहाप्रवेशः	९५
स्वयंप्रभया गुहात् विमोचनम्	९५
दक्षिणाम्बोधिवर्णनम्	९७
सागरलङ्घनाय महेन्द्रगिरि आरोहणम्	९९
पञ्चम सर्गः	**१०१-११४**
हनुमतः सागरलङ्घनम्	१०२
मैनाकसत्कारः	१०४

विषयः	पृष्ठा सं
सिंहिकाहननम्	१०४
लङ्काप्रवेशः	१०५
सन्ध्यावर्णनम्	१०५
लङ्काधिदेवता विजयः	१०६
अन्तःपुरे सीतामार्गणम्	१०७
सीतादर्शनाय प्रार्थना	१०९
रावणेन सीताभर्त्सनम्	११०
सीतायै स्वविक्रमदर्शनम्	११०
हनुमता वनभङ्गः	१११
सप्तमन्त्रिसुतादि वधः	१११
मेघनादेन ब्रह्मास्त्रेण बन्धनम्	१११
रावणाय रामसन्देशकथनम्	११२
लङ्कादाहः	११२
सीतामाश्वास्य प्रतिनिवर्तनम्	११३
वानरैः मधुपानम्	११३
रामाय सीतावृत्तान्तकथनम्	११३
अङ्गदेन मारुतेविक्रमकथनम्	११३
षष्ठसर्गः ११५-१३३	
रामेणहनूमताश्लेषणम्	११५
लङ्काद्वीप संविधिसंश्रवणम्	११५
दक्षिणम्बुधे बलागमनम्	११६
विभीषण शरणागतिः	११६
रामेण सेतुबन्धनम्	११७
कपिसेनया पीडितशुकसरणविसर्जनम्	११८
सीतामोहनाय रावणेन	
विद्युज्जिह्वविसर्जनम्	११८
सीतायै मायारामशिरसः सन्दर्शनम्	११८
सन्धानाय रामेण अङ्गदप्रेषणम्	११९

विषयः	पृष्ठा संख्या
अङ्गदकृत रावणनिन्दा	११९
अङ्गदेन रावणसौधमर्दनम्	१२०
वानरराक्षसयोर्युद्धम्	१२१
निशायुद्धम्	१२२
नागपाशबद्धरामलक्ष्मणयोः सीतायैप्रदर्शनम्	१२२
विनतासुतेन नागपाशविमोचनम्	१२३
प्रहस्तवधः	१२३
लक्ष्मणनिपीडनम्	१२३
कुम्भकर्णप्रबोध	१२४
कुम्भकर्णहननम्	१२५
लक्ष्मण पुनरुज्जीवनम्	१२५
कुम्भीनस वधः	१२६
रावणि मायासीताहननम्	१२६
निकुम्भिलागमनम्	१२६
रावणेन होमाग्निवर्तनम्	१२७
रावणयुद्धभूमि आगमनम्	१२७
रामेण रावणस्य शिरःखण्डनम्	१२९
रावणहननम्	१२९
सीताअग्निप्रवेशः	१३१
विभीषणभिषेकः	१३१
रामेण वानरराक्षसैः सह पुष्पकविमानेऽयोध्या गमनम्	१३१
भरतसमागमः	१३२
रामपट्टाभिषेकः	१३३

परिशिष्टम्

सहायकग्रन्थसूची	१३७
चित्बन्धरामायणस्थ बन्ध-शब्दालङ्कारणाञ्च अकारादिक्रमसूची	१३९
बन्धानां चित्राणि	१५१
श्लोकानामाकारादिक्रमेणसूची	१६१

❖❖❖

प्रस्तावना

यः पिबन् सततं रामचरितामृतसागरम् ।
अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ।।

इति रामकथामृतरसपिपासूनां आजीवनपानेऽपि नान्तंगच्छति सा पिपासा। अतः एव रामशब्दव्युत्पत्तिं रमन्तेयोगिनोऽस्मिन् इति कुर्वन्ति। अस्य रसस्य पानं विविधैः विभिन्नमार्गेषु कृतम्। तत्र सदाशिवब्रह्मेन्द्रसरस्वती, त्यागराजादयः पिबरे रामरसं इत्यादि गीतिकारुणेण, भवभूतिप्रभृतयः उत्तररामचरितादिनाटकरचनारूपेण स्वपिपासां शमयितुं प्रयत्नं कृतवन्तः।

परं किमस्ति महत्वमस्मिन् रामचरिते किमर्थमेते महान्तः अनुरक्ताः इति जिज्ञासायां अस्ति महत्त्वं, रामः गुणाढ्यः, अनर्घगुणगुम्फितः रामचरिते गुणी को वा अनुरक्तो न भवति। वेदवेद्यः रामः, वेदः रामायणम्। अतएव इयं उक्तिः

वेदवेद्ये परेपुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना ।।

रामायणस्य वेदशास्त्रेभ्यः अस्ति विशेषः। वेदाः प्रभुसम्मिताः, अनुशासनपरकाश्च, न भवति संयमिनां अनुरागः कान्तासम्मितोपदेशः सर्वेषां रोचते। अन्यच्च वेदाध्ययने नास्ति अधिकारः सर्वेषाम् । परं रामायणे सर्वेषामधिकारः अतएव रामायणे उक्तम् । यथा -

'स्त्रियश्च रजस्वलाः श्रुत्वा पुत्रान् सूयुरनुत्तमान्' इति स्त्रीणाम्।

'शूद्रोऽपि महत्वमीयात्' इति शूद्रणाम् अधिकारः प्रस्फुटो भवति । किमस्ति प्रामाण्यं अस्मिन्वचने इति चेत्, आप्तवाक्यं प्रमाणम् । आप्तस्तु यथार्थवक्ता कथं विश्वासः कः आप्त इति। अत्र इदमेव प्रमाणं लोके पुत्रः स्व पितुः जिज्ञासायां मातुर्वचनमेव प्रमाणम्। एवमेव अस्मिन् सन्दर्भेऽपि सतां वचनं प्रमाणम्।

परं केचन महान्तः एवं विजिज्ञापयिषन्ति । एवं फलनिर्देशः अर्थवादरूपः केवलं जनानां प्रवृत्तिविधायकं वचनमिति । किन्तु सतां हि सन्देहपदेषुवस्तुषु प्रमाणमन्तःकरणप्रवृत्तय इति नास्ति मम सन्देहः रामायणफलवचने ।

एवं महोत्कृष्टं रामायणरचना केन कदा इति सर्वेषां विदितचरोऽयं विषयः । प्राचेतसः वल्मीकजन्माऽस्य कृतिकर्ता इति, रामराज्यपालनसमकाले इयं रचना इति च । कथं रचितं रामायणमेव इति चेत् क्रौञ्चमिथुनवधात् विह्वालितान्तःकरणः

"मा निषाद प्रतिष्ठां त्वामगमः शाश्वतीसमाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।।

इति अप्रयत्नं छन्दोबद्धं वचनप्रकारमाविष्चकार । इदमेव नान्दीवचनं रामायणनिर्माणस्य । ततः आश्रममुपगतं मुनिं स्वयम्भूः रामचरितमुपदिश्य रामायणनिर्माणाय आदिदेश इति रामायणात् अवगम्यते । रामस्य चरितं कृत्स्नं कुरु इत्यादिना ।

तथा वाल्मीकिना -

श्लोकसारसमाकीर्णं सर्गकल्लोलसंकुलम् ।
काण्डग्राहमहामीनं वन्दे रामायणार्णवम् ।।

इति आविष्चकार । रामोऽपि गुणाकरः रामायणमपि अमृतसिन्धुः, प्रसारकाः के, तत्र कौशलं किमस्ति । साधनं किमस्ति, सुवर्णस्याऽपि अभरणनिर्माणेनैव सार्थक्यम् । तन्त्रीगीतिसमन्वित-रामायणं गायकाभ्यां लवकुशाभ्यां प्रसारितम् ।

गुणैकपक्षपातिनः इदानींतनाऽपि बहवः रामायणरसास्वादं कुर्वन्ति -

यावत्स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद्रामायणकथा लोकेषु प्रचरिष्यति ।।

इति ब्रह्मणः वचनम् ।

चित्रबन्धरामायणस्य रचना —

यथा आदिकाव्यनिर्माणे भगवतः ब्रह्मणः मनीषा आसीत्। अतएव ब्रह्मणा उपदिष्टः वाल्मीकिः रामायणं बबन्ध। तथा लोके कवयः राज्ञामनुज्ञया अथवा भगवतः आदेशेन वा काव्यानि निर्मान्ति। देवतानुग्रहवशात्, स्वताम्बूलरसं दत्वा कवितायाः कारणमभूत् मूककवेः।

एवमेव वेंकटेश्वरनाम कविः भगवत्याः श्रीशैलक्षेत्रदेवतायाः भ्रमराम्बिकायाः वरप्रसादलब्धसारस्वत इति । एतत् व्याख्यायां 'वेङ्कटेश्वर' नामा महाकविः स्वप्नप्रसन्न भ्रमराम्बिका वरप्रसादलब्ध सहजसारस्वतः चित्रबन्धरामायणं चिकीर्षति स्मेति वचनादवगम्यते। महापुरुषादि वरप्रसादलब्धप्रतिभयाकाव्यं कुर्वन्तीति आलङ्कारिकाणां जगन्नाथादीनां सम्मतिरस्ति।

सम्पूर्णरामायणेतिवृत्तं चित्रबन्धेषु निर्माणं नाल्पबुद्धीनां चिकीर्षा विषयः। यदि केवल शब्दालङ्कारेण निर्माति काव्यं तदा अधिजिघांसूनां क्लेशकरं भवति। तेन विमुखाः भवन्ति सहृदयाः, तेन निर्माणे किं वास्ति प्रयोजनम्। अतएव कविना रसादीनामपि निवेशनं कृत्वा स्वकाव्यं रचयामास । शिशुपालवध, किरातार्जुनीयादि काव्येषु यथा चित्रालंकाराणां समावेशः, तथा स्वकाव्येऽपि श्री शब्दप्रयोगादिरूपेण लिलेख।

'कवित्वं दुर्लभं तत्र प्रतिभा तत्रसुदुर्लभा' इति प्रतिभापूर्णं कवित्वं, रामरसायनसम्मिश्रितं को वा सहृदयः नास्वादयेत्। अतएव एतत्सुन्दरं काव्यं विदुषां करकमलेषु समर्पयेयम् इति महते अमन्दानन्दाय इति धिया सम्पादनकर्मणि निमग्नः शोधकर्ता ।

कवि परिचयः-

अस्य काव्यस्य निर्माता वेंकटेश्वरकविः। नास्यान्यग्रन्थाः चक्षुष्पथमायान्तीति एतस्मात् काव्यादेव कालादिनिर्णयः कर्तव्यः।

अयं वेंकटेश्वरकविः चरकूरिकुलोत्पन्न इति सर्गादिश्लोकेषु वेङ्कटेशेन कविना चरकूरिकुलेन्दुना इति दृश्यते।

पितॄणां परिचयावसरे –

नाट्कीकृतषट्च्छास्त्रं स्तोत्ररत्नाकराह्वयम्।
चूडामणिकृतंवन्दे तातं यज्ञेश्वराह्वयम्।

अनेन अस्य पितुः नाम यज्ञेश्वरदीक्षित इति षट्च्छास्त्रकोविद इति च अवगम्यते।

मातुः, पितामहस्य परिचयः सर्गान्ते विलिख्यमाना पुष्पिकायां लभ्यत इति चरकूरिकोण्डुभट्टोपाध्यायपौत्रेण यज्ञनारायणभट्टतनयेन वेंकटेश्वरेण सर्वाम्बिकागर्भशुक्तिमुक्तामणिना विरचिते इति।

अनेन पितामहः कोण्डुभट्टोपाध्याय इति अवगम्यते। पितुः नाम यज्ञनारायणभट्ट इति पूर्वश्लोकस्य वचनं परिपुष्टं भवति। माता सर्वाम्बिका इति च ज्ञायते।

वंश(गृह)नाम्ना एते आन्ध्रीयः इति व्यज्यते। यतः आन्ध्रदेशे चरकूरु इति ग्रामः अस्ति। चरकूरिवंशीयाऽपि दृश्यन्ते। अन्यच्च पितामहस्य नाम कोण्डुभट्टोपाध्याय इति। कोण्ड इति शब्दः आन्ध्रभाषायामस्ति, यस्यार्थः पर्वत इति। तत्र मानं जनाः तत्र इदानीमपि केचन परिदृश्यमाना इति लोके एवमुक्तिरपि त्रैलिङ्ग्यां दृश्यते। यथा -

चेरुवुलो स्नानं चेयटानिकि कोण्डुभट्टुगारि आज्ञ अक्करलेदु (तटाके स्नानं कर्तुं कोण्डुभट्टानां आज्ञा अनावश्यकी इति। अनेन वचनेनापि एतेषां आन्ध्रीयत्वं सम्पद्यते।

कोण्डुभट्टोपाध्यायः भूषणसारकर्तृत्वेन लोके सुविदितः। अयं कोण्डुभट्टोपाध्यायः वैयाकरणसिद्धान्तकौमुदी, तत्त्वकौस्तुभादि निर्मातुः भट्टोजीदीक्षितस्य जेष्ठसहोदरस्य सुत इति। भट्टोजीदीक्षितः वैदिकप्रक्रियायां ऋग्वेदादुधृत्य उदाहरणान् दत्तवन्त इति, एते

ऋग्वेदिनः इति च व्याकरणेतिहासे युधिष्ठिरमीमांसकाः लिखन्ति। अपि च भट्टोजीति जी उपश्लिष्यते नाम्ना इति नागोजीभट्ट इव एतेऽपि महाराष्ट्रब्राह्मणा इति च उल्लिखन्ति।

लोके दुर्भिक्षराजाश्रयाद्यभावात् केचन देशान्तरं गच्छन्ति। इदानीमपि लोके एवं परिदृश्यमानाः सन्ति, तेषां आहार, व्यवहारादिषु, स्थानीयप्रभावो भवति। यथा तिरुपति केन्द्रीय संस्कृतविद्यापीठस्य प्राचार्याः ब्रह्मश्री बालसुब्रह्मण्यमहाभागाः जन्मना नाम्ना आचारव्यवहारादिभिः तमिलनाडुब्रह्मणाः इव भान्ति। किन्तु तेषां मल्लादि इति वंशनाम्ना वस्तुतः ते आन्ध्रीया एव । तथैव कोण्डुभट्टोपाध्यायस्य पूर्वतनाः महाराष्ट्रप्रदेशे राजाश्रयार्थं महारष्ट्रं गताः स्युः। ततः कोण्डुभट्टोपाध्यायानां काले पुनः प्रतिनिवृत्ताः इति प्रतिभाति । यतः एतेषां नाम्नि पुत्रस्य पौत्रस्य वा जी इति नोपश्लिष्यत इति ।

एतेऽपि ऋग्वेदिन इति, पण्डितानां वचनानुसारेणाऽपि भूषणसार कर्ता कोण्डुभट्टोपाध्याय एव अस्य वैंकटेश्वरकवेः पितामह इत्यनुमीयते ।

अस्य कवेः कालः सप्तदशशतकस्य उत्तरार्थे अष्टादश-शतकस्यारम्भेवा भवितुमर्हति, यतः कोण्डुभट्टोपाध्यायस्य कालः १६००-१६७५ इति ऐतिहासिकानां आशयः इति।

तेषां वंशवृक्षः एवं भवति -

लक्ष्मीधरः

रङ्गोजीभट्टः | भट्टोजीदीक्षितः

↓

कोण्डुभट्टोपाध्यायः

↓

यज्ञनारायणभट्टः

↓

वेंकटेश्वरकविः

केचन पण्डिता एवमाभिप्रयन्ति अयं वेंङ्कटेश्वरकविः तञ्जानगरपालकानां भोसलवंशीयानां सभापण्डित आस इति, यतः चित्रबन्धरामायणकाव्यस्यास्य मातृकाः सर्वाः तञ्जानगरस्थ सरस्वती महलपुस्तकालये उपलभ्यन्त इति। वेंकटेश्वरनामकः सभामलञ्चाकार इत्यूह्यते। भोसलवंशचरितमितिनामके काव्ये वेंकटेश्वरनामानः त्रयः सन्ति। परन्त्वेतेषां ग्रन्थेषु चित्रबन्धरामायणं न दृश्यत इति। शरभोजीमहाराजेन तालपत्रग्रन्थानां संकलनं कारितम्, अनेन मातृका अत्र उपलभ्यन्त इति । यदि राजसभायां स्थानमलभत, अस्य काव्यस्यारम्भः राज्ञः प्रशंसापरको स्तोत्रपरको वा भवेत्, परं लक्ष्मीस्तवपरकं दृश्यते। यथा -

लक्ष्मीकटाक्षाः मयि ते प्रसरतु समन्ततः ।
येषां महिम्ना जगतामीश्वरोऽभूज्जनार्दनः ।।

व्याख्यानग्रन्थेऽपि यथा -

पूर्तये सम्पदां चारुकीर्तये दलितार्तये
दक्षिणामूर्तये नित्यं नमोऽस्तु शिवमूर्तये
विहिताक्षरणद्यूतमन्याधूतं विभूतये ।
सम्पद्दूतं मरुद्दूतं रामदूतं नमाम्यहम् ।।

इति व्याख्याश्लोकाभ्यां च लक्ष्मीकटाक्षायै प्रार्थयन्ति इति घोर दारिद्र्यदुःखमग्ना इति सम्भाव्यते ।

पाण्डित्यप्रकर्षः -

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्

इति वचनात् विना पाण्डित्यं काव्यं न प्रसरति इति । अतएव वदन्ति - विद्वत्कवयस्तु कवयः, केवलकवयस्तु कपय इति। अत्र चित्रबन्धकाव्यनिर्माणं विना शास्त्रज्ञानं न सुकरम्।

स्वकाव्ये वैदिकमन्त्रान् चतुर्थपादत्वेन निर्बवन्ध। यथा द्वितीयसर्गे - रोहिण्येवाम्बरे चन्द्रः श्रीकामः पितुराज्ञया ।
राघवः सीतयागारे निषसाद धृतव्रतः ।।

निषसाद धृतव्रत इति वैदिक चतुर्थपादः। एवमेव सर्गान्तेऽपि। प्रायशः मन्त्रा ऋग्वेदे एव परिदृश्यन्ते। इत्थमयंकविः

वेदान्तशास्त्रपाण्डित्यं चतुर्थसर्गे बिलात् वानराणां विमोचनावसरे स्वयंप्रभावर्णनं यथा -

चिरं तत्रपरिश्रान्तान् कपीन् काचनकन्दरात् ।
ब्रह्मविद्येव संसार बिलाज्जीवानतारयत् ।।

एवमेव शूर्पणखा रामं दृष्ट्वा स्ववस्त्रापकर्षणमपि नावगच्छति तद्वर्णनावसरे यथा -

साक्षात्कारेण रामस्य बन्धोऽपि परिमुच्यते ।

एवमेव अनेकस्थलेषु अर्थान्तरन्यासादिभिरलङ्कारमूलकं वेदान्तार्थं विशदयति। पूर्वमीमांसायां पाण्डित्यमपि अनल्पमस्तीति कौशिकयागसंरक्षणावसरे ज्ञायते वर्णनेन यथा -

बलाबला बलालम्बौ बलौबिलबिलाबिलाम् ।
वर्नीं नवावनीनीवीं वनी वनन वा विनौ ।।

इत्यत्र वनीवननशब्दं यागभिक्षार्थे प्रयोगं चकार। गाधेयस्य यागवर्णनावसरे दीक्षादिक्रमं सविधिपूर्वकं सविस्तरं वर्णयति। यागान्ते स्नानं कर्तव्यमिति तन्नाम अवभृतस्नानमिति वर्णयति प्रथमसर्गे यथा-

गाधेयोऽवभृतस्नानं वितेने विमलोदकैः ।
मखान्तेमरशत्रूणां शोणितैः काननद्रुमाः ।।इति ।।

एवमेव न्यायशास्त्रीय पाण्डित्यमपि जटायुवर्णनावसरे यथा -

रणप्रयोगदक्षस्य पक्षिणः पौढवादिनः ।
प्रतिवादि सपौलस्त्यो वितेने पक्षखण्डनम् ।।

इति नैय्यायिकभणितिं स्वपक्षविपक्षशब्दाभ्यां विजिज्ञापयिषति।

व्याकरणशास्त्रे अकुण्ठितं पाण्डित्यं प्रत्याययति विभिन्नसन्दर्भेषु, यथा दशरथवर्णनावसरे -

नानानाने ननूनाने दीने-दीने दिनेदिने ।
दानिना दानिना नोदं ददाने दिननीनिना ।।

इत्यस्मिन् दिननीनिना इत्यादि शब्द प्रयोगेण व्याकरण-पाण्डित्यमस्य प्रस्फुटं भवति । इत्थं अन्यस्थलेष्वऽपि एतादृशप्रयोगान् करोति कविः । दण्डनीतावपि अतिनिपुणोऽयं कविः। काकाक्षि पातनावसरे द्विजशब्द प्रयोगेण यथा -

स्तनकोकंस्पृशं पत्न्याः काकं पाकारिजं विभुः ।
तृणकोणेन बाणेन काणीचक्रे क्षणे द्विजम् ।।

राजापराधिनः ब्राह्मणस्य कः दण्डः विधेयः इति विचिकित्सायाम्, अक्षिपातदण्डः विधेय इति द्विजशव्द प्रयोगेण ज्ञापयति।

अलंकारशास्त्रमर्मज्ञ इति रसध्वनि अलंकारादीनां निवेशन विधिरेव ज्ञापयति। तृतीयसर्गे रामं दृष्ट्वा शूर्पणखायाः स्वरूपवर्णनावसरे यथा -

प्रसन्नाधरे यस्याः ताम्बूलस्य बभौ रसः ।
उद्रेकात् बहिरागच्छन् रागो रघुपताविव ।।

अत्र रागशब्देन अनुराग इति अपह्नवं करोति। एवमेव सुन्दर काण्डे सन्ध्यासमये आकाशे मेघाः दुर्गाप्रीत्यै दत्तमांसकवलमिव वर्तत इति उत्प्रेक्षते।

दुर्गाप्रीत्यै दत्तमांसकवलमिति उपमानेन एवमपि संभाव्यते एते न केवलं वेदादिशास्त्रेषु बद्धादराः, तन्त्रशास्त्रेऽपि बद्धान्तःकरणा इति। एवमन्य अलंकाराणामपि यथोचितं स्वकाव्ये निविष्टवान् कविः।

एवमेव इतरश्लोकेषु उपमानादिभिः लोकोक्तीन् ज्ञापयति इति नायं च्छान्दसः परं लोकज्ञानचतुर इति च अवगम्यते। यतः पण्डिताः लोकज्ञाने व्यवहारे च अकुशलाः दोदृश्यन्ते ।

एवमेव पितृवन्दनादिना शिष्टाचारं पालयतीति, आर्यजनेषु श्रद्धालुरिति च अवगम्यते। विनयस्वभाव एव विद्यायाः परमं लक्ष्यम्।

ब्राह्मणेन षडङ्गो वेदोऽध्येयो ज्ञेयइति वेदादि शास्त्राध्ययनेन जन्मकर्माभ्यां सार्थकतामगादिति।

व्याख्याकार: -

लोके स्वतन्त्रग्रन्थरचनामकुर्वन्तोऽपि केवल व्याख्याग्रन्थैरेव अनल्पं ख्यातिं, अनर्घतां च अविन्दन् केचन व्याख्याकाराः। असदृश शैल्या विषयं प्रतिपादयन्तः अध्येतृणां मनोपीठं अलंकुर्वन्ति। तेषु अतिविपुलयशाः मल्लिनाथाः, प्रतापरुद्रीयव्याख्या (रत्नापणस्य) कर्तारः कुमारस्वामिसोमपीथिनः। नाट्यवेदस्य अभिनवभारती, ध्वन्यालोकलोचनकर्तारः अभिनवगुप्ताः प्रसिद्धाः। अभिनवगुप्तः प्रत्यभिज्ञादर्शनमाविष्चकार। परं साहित्यलोके व्याख्यानग्रन्थाभ्यामेव प्रसिद्धाः। एतेषां परमप्रामाणिकता रससिद्धान्तभेदज्ञापनावसरे अभिनवगुप्तपादाः इति मम्मटभट्टस्यादरपूर्वक बहुवचनेनावगम्यते।

यज्ञनारायणभट्टः अस्य काव्यस्य व्याख्याकारः एते स्वव्याख्यानेन लब्धप्रतिष्ठा इति अवगम्यते। लोके प्रचलितारीतिः अस्मिन् सन्दर्भे नानुसृतः, यतः लोके पितुः काव्यं पुत्रः व्याख्यां ददाति, अथवा पितामहस्य वा। परं अत्र भिन्नः क्रमः दृश्यते स्वपुत्ररचितकाव्यं स्वयं व्याख्याति पिता इति। एते स्वयं काव्य व्याख्यानारम्भे एवमलिखन्-

स्वपुत्ररचितं चित्रबन्धरामायणाह्वयम्।
व्याकरोति महाकाव्यं यज्ञनारायणसुधीः॥

इत्यनेन प्राक्तनवचनंपरिपुष्टं भवति। विभिन्नसन्दर्भेषु दृश्यमान यज्ञनारायणभट्ट, यज्ञनारायणदीक्षित यत्रनारायणसुधीरित्यादिषु व्यवहारेषु नास्ति भेदः। एतेषां पिता कौण्डुभट्टोपाध्याय इति सर्गान्त पुष्पिकया ज्ञायते। एवं पुत्रस्य काव्यव्याख्याने क्वचित् पुत्रानुकम्पा, काव्यस्य महत्वं वा कारणं स्यात्। इयं व्याख्या अपूर्णा इति ते स्वान्तिमदशायां रचयामासुः।

पाण्डित्यप्रकर्षः -

एते वेदादिशास्त्रेषु अप्रतिहतपण्डिताः इति, तत्र वेदाङ्गेषु, आस्तिकदर्शनेषु च विशिष्य ग्रन्थान् व्यरचयन्निति चित्रबन्धरामायण - काव्यादवगम्यते ।

नाटकीकृत षट्च्छास्त्रं स्तोत्ररत्नाकराकरम् ।
चूडामणिकृतंवन्दे तातं यज्ञेश्वराह्वयम् ।।

इत्यत्र श्लोकव्याख्याने यज्ञनारायणदीक्षितैः विवरणमदायि । अतिविशिष्टशास्त्राणि एतैः अपूर्वचन्द्रोदय, शब्दोदय, न्यायविजयादिनाम्ना शास्त्रप्रमेयैः नाटकानि रचितानीति । सकलदेवतास्तुतिपरः स्तोत्ररत्नाकर नामकः स्तोत्रग्रन्थश्च रचित इति । अपि च तत्वचिन्तामणेः खण्डनपरः शास्त्रचूडामणिरिति नामक ग्रन्थश्च व्यरचयामासुरिति च विवरणं दत्तम् । एतेषामामूल चूडवैदुष्यं षट्च्छास्त्रेषु अवगम्यते । अपि च व्याख्यानारम्भश्लोके स्वयं एवं वदन्ति "अवस्थानेऽपि जिह्वाग्रे शब्दालंकारशास्त्रयोः" इति शब्दशास्त्रे अलंकारशास्त्रे च पण्डित्यं ज्ञापयन्ति ।

अन्यच्च भट्टशब्दस्य चतुश्शास्त्रपाण्डित्यमिति व्याकरण महाभाष्योद्योते नागेशभट्ट इत्यत्र भट्टशब्दस्य व्याख्यां तथा चक्रुः । बहुग्रन्थरचिताः एतैः, परं एतेषां ग्रन्थाः न कुत्रापि उपलभ्यन्ते इति महान् खेदस्य विषयः सस्कृतप्रपञ्चे । परं एतेषां नाम्नि अलंकारराघवम् इति नामकः ग्रन्थविशेषः उपलभ्यते । परं तमधिकृत्य न किञ्चिदुक्तं चित्रबन्धरामायणे । अलङ्कारराघवग्रन्थे चित्रबन्धरामायणं तस्य व्याख्यां चोद्धरतीति एतैरेव रचितः सोऽयमलङ्कारराघवग्रन्थ इत्यनुमीयते ।

एतेषां जीवनकालः १६२०-१६९५ इति निश्चिनोमि, यतः कौण्डुभट्टोपाध्यायाः १६००-१६७५ मध्यकाले जीवन्त इति । अतः सप्तदशशतकीया एते कवय इति निर्णयः ।

चित्रवन्धा: –

प्राचीनकालादारभ्य वेदाध्ययनाध्यापनशीलिनः भारतीयाः नूतनमार्गानुद्भावयन्तः नवीनविषयानाविष्कुर्वन्ति। तत्र नाट्यवेदादि भणनं, ध्वनिसिद्धान्तविवेचनं यद्यपि न नूतनविषयाः, तथापि स्वबुद्धिकौशलेन संस्कृतवाङ्मये निगूढं तत्वं लोके विवेदयिषन्ति। एवं विवेदयिषमाणविषयेषु शब्दालंकारसिद्धान्तकथनमपि अन्यतममिति विदां विदितपूर्वम्। परमस्य सिद्धान्तारम्भः कदा उद्भूत इति निश्चयेन न वेत्ति कश्चित्। परं तत्र अधुनातनानां भावनापरम्परा तत्र प्रसरति। वेदकालतः अस्य प्रस्तावः वर्तते इति अत्यन्तप्राचीनत्वं संभाव्यते। वेदः शब्दप्रधान इति शब्दवैचित्रिः भवति। ततः परमपि रामायणादिषु लौकिकसाहित्ये शब्दवैचित्र्यस्य अतिमहत्वमस्ति। तत्र रामायणे रसानुगुणं शब्दालंकारप्रयोगः कृतः इति तत्रस्थ श्लोकैरेव अवगम्यते।

बुद्धिप्रधानान् रुचिराभिधानान् सश्रद्धधानाज्जगतः प्रधानान्।
नानाविधानान् रुचिराभिधानान् ददर्श तस्यां पुरि यातुधानान्॥
(वा०रा०सुन्द० ५-१५)

तां देवीं दीनवदनामदीनां भर्तृतेजसा *(सुन्द० १७-२७)*

एवं परश्शतश्लोकानां प्रयोगः दोदृश्यत इति अस्य काव्यस्य बन्धने रामायणमेव प्रेरकं भवितुमर्हति।

तत्र लक्ष्यानि बहोःकालत् प्राक्परिदृश्यमानान्यपि परं तत्र विभिन्नप्रस्तानप्रत्यायकरूपेण अलङ्कारप्रस्थानस्य भामहं अङ्गीकुर्वन्ति। ततः तस्यानुयायिनः दण्डी, वामनादयः परिदृश्यन्ते। अलंकार प्रस्थानेऽपि वक्रोक्तिकारादयः अर्थालङ्कारेषु तत्राऽपि वक्रोक्त्यलङ्कारे स्वाशयं आविश्चकुः। परं चित्रशब्दस्य शब्दार्थयोः व्यापकत्वमस्ति इति शब्दचित्रम्, अर्थचित्रम्, उभयचित्रम् इति भेदान् विवृण्वन्ति। तत्र अर्थालङ्काराणां भेदप्रभेदाः असंख्याकाः सन्ति। परं नियमितरूपेण आलंङ्कारिकाः स्वस्वबुद्धिवैशिष्ट्येन विभिन्न अलंकारान् परिगणयन्ति।

तत्र शब्दालङ्कारास्तु नियतसंख्याकाः इति नास्ति वैमत्यमालंङ्कारिकेषु । तत्र आलङ्कारिकैः मम्मट, विद्यानाथ, प्रभृतिभिः षड्भेदाः अङ्गीकृताः । ते च -

(१) अनुप्रासः
(२) यमकम्
(३) पुनरुक्तिवदाभासः
(४) वक्रोक्तिः
(५) श्लेषः
(६) चित्रवन्धाः

अनुप्रासस्यलक्षणं आलङ्कारिकेषु प्राचीनः दण्डी स्वकाव्यादर्शे एवं अलिलिक्षयिषत् ।

वर्णवृत्तिरनुप्रासः पादेषु च पदेषु च ।
पूर्वानुभवसंस्कारबोधनीयद्यदूरता ।।

(काव्यादर्शः १-५५)

भामहः एवं वदति
सरूपवर्णविन्यासमनुप्रासं प्रचक्षते ।

(का० द० ३-५)

एवं आलंकारिकैः अन्यैरपि एतादृशलक्षणानि विहितानि अनुप्रासस्य भेदप्रभेदाः बहवस्सन्ति। भामहादिभिः स्वरचितग्रन्थेषु सविस्तरं लक्ष्यलक्षणपुरस्सरं विवरणमदायि। अस्य प्राचीनवैदिकमन्त्रेभ्यश्चावगम्यते ' वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसतिश्च मे' इति यजुर्वेदे ।

यमकस्य अनुश्रुतिः प्राचीनकालादारभ्य ऋग्वेदादिषु उपलभ्यते ' 'ददेह्या सनयते ददान्मेघामृतायते ' ।

अस्य लक्षणं दण्डिना यथा -

आवृत्तिं वर्णसंघातगोचरो कवयो विदुः ।।

(काव्यादर्शे १-६१)

एकपदावृत्तिः द्विपदावृत्तिः आदिभेदेन अनेकप्रभेदप्रभिन्नो भवति। उपनिषत्सु 'अहमन्नमहमन्न' मित्याद्यस्य लक्ष्यभूता श्रुतिः।

पुनरुक्तिवदाभासः-

अस्य लक्षणं भामहादिभिः कृतमस्ति। परं मम्मटः स्वकाव्यप्रकाशे लक्षणमेवं चकार -

'तथा शब्दार्थयोरयम्' (का० प्र०९-८)

यत्र शब्दतः अर्थतो वा पुनरुक्तिवदाभासते तत्पुनरुक्तिवदाभासः। पुनरुक्तिर्दोषाय कल्पते, परं पुनरुक्तिवदाभासते इति नास्ति क्षतिः।

ऋग्वेदादिषुपरिदृश्यमानघनजटादिपाठं दृष्ट्वा लौकिकसाहित्येऽपि अनेन अलंकारेण परितोषयिषवः कवयः चक्रुः स्वकाव्येषु । अत्र चित्रबन्धरामायणमिति नाम्नि अपि एवं पुनरुक्तिवदाभासते।

'चित्रबन्धैर्निबध्यते' इत्यत्र चित्रशब्देनैव गतार्थो भवति । पुनः बन्ध शब्द प्रयोगः पुनरुक्तिरेव । यतः, तच्चित्रं यत्र वर्णानां खड्गाकृतिहेतुता। (का०प्र० ६-९-१२) इति लक्षणं विद्यमानत्वात्। अतः शब्दः द्विप्रयोगं करोतीति व्याख्याकारः पुनरुक्तिमेवं वारयति। चित्राश्च ते बन्धाश्च चित्रबन्धाः । मुरजबन्ध सर्वतोभद्रबन्धादि नानाविधबन्धाः इति। इदमेव अन्येषां शब्दचित्राणां उपलक्षणमिति। अस्य कविप्रयोगेषु विशेषेण न दृश्यते परं विरलतया दृश्यत इति मम्मटादिभिः न स्पृष्टः।

वक्रोक्तिः-

वक्रोक्तिम् अर्थालङ्कारेष्वप्यङ्गीकुर्वन्ति वामनादयः सदृशशब्दयोः भिन्नार्थेषु अभिधीयत इति तत्र अर्थालङ्कारत्वम्। यथा 'कस्त्वं शूली मुगय भिषजम्' इत्यादि श्लोकेषु शब्दवैचित्र्यम्। अर्थवैचित्र्यमुभयमपि भवति इति उभयचित्रत्वभेदेनाङ्गीकुर्वन्ति।

अस्य लक्षणम् वामनेन काव्यालङ्कारसूत्रवृत्तौ -

'सादृश्यलक्षणा वक्रोक्तिः' इति (काव्य०सू० ४-३-८) अत्र नितान्तसादृश्यमूलकत्वम् अस्य अभिमतम् । वक्रोक्तेः प्रवर्तकः कुन्तकः वक्रोक्तिजीविते वक्रोक्तिरेव वैदग्ध्यभङ्गिभणितिरित्युच्यते - परं ध्वन्यालोके शब्दस्य हि वक्रताभिधेयस्य च वक्रता लोकोत्तरेण रूपेणावस्थानमित्येवालङ्कारान्तरभवः इति परिदृश्यमानत्वात् आनन्दवर्धनः विमतिरस्मिन् सदर्भे ।

५- श्लेषः -

ईप्सितेनार्थजातेन सम्बद्धानां परस्परम् ।
श्लिष्टतायाः पदानां सश्लेष इत्यभिधीयते ।। इति ।

भरतवचनात् श्लेषस्य शब्दालङ्कारत्वमेव भवति । श्लेषालङ्कारस्य शब्दर्थोभयालङ्कारभेदेषु गणनमेव आलङ्कारिकाणां सम्मतम् । अलंकारसम्प्रदायविद्भिः मम्मटादिभिः लक्षणानि दत्तानि । तेषु रुद्रटः स्वकाव्यालङ्कारे -

यत्रैकमनेकार्थै वाक्यं रचितं पदेनेकस्मिन् ।
अर्थे कुरुते निश्चयमर्थश्लेषः स विज्ञेयः ।।

(काव्यलंकार-रुद्रटः १०-१)

इति लिखति । एतस्य मते अर्थालङ्कारत्वमेव सुश्लिष्ट सन्निवेशत्वं, शब्दानां श्लेष उच्यते - (अग्नि०पु० ३४६-६)

एवं लक्षितस्य श्लेषस्य भेदाः अनन्ताः । श्लेषालंकार प्रधानानि काव्यानि बहुभिः निबद्धानि तेषु रामकृष्णविलोमकाव्यम् राघवनैषधीयं राघवयादवीयकाव्यानि प्रसिद्धानि । दक्षिणभारते, उत्तरभारते च अष्टवधान, शतावधान, सहस्रावधान नामिका काचनप्रक्रिया समाम्नाता । तस्यां श्लेषालंकारस्य प्रयोगं बहुधा कुर्वन्ति । काञ्चनसमस्यां दत्वा तत्पूरणार्थं पृच्छन्ति । तदा कवयः एनमनुसरन्ति । एवमेव व्याजस्तुति, व्याजनिन्दापराणि स्तोत्राणि उपलभ्यन्ते तेष्वपि श्लेषालङ्कारेणैव तत्र स्तुतिः बध्यते ।

६- चित्रम्-

चित्रं यथाभित्तौ हृदयमावर्जयति। तथा चित्रेषु निबद्धश्लोकाः अपि सहृदयहृदयान् आवर्जयन्ति। प्राचीनाः आलङ्कारिकाः स्वाभिवृत्तिं नात्यन्तं प्रकटयन्ति एतत् चित्रबन्धकाव्यनिर्माणे। तथाऽपि आलङ्कारिकेषु रुद्रटः स्वकाव्यालङ्कारे अलिलिखयिषत्।

भङ्ग्यन्तरकृत तत्क्रमवर्ण निमित्तानि वस्तुरुपाणि ।
साङ्गानि विचित्राणि च रच्यन्ते यत्र तच्चित्रम् ।

काव्यालङ्कार-रुद्रट ५-१

चित्रं सर्वैरालङ्कारिकैरङ्गीक्रियते अग्निपुराणे ।

दुःखेन कृतमप्यर्थे कविसामर्थ्यसूचकम् ।
दूष्करं नीरसत्वेऽपि विदग्धानां महोत्सवः ।।

इति अभिनवगुप्तः लोचने -

प्रधानगुणभावाभ्यां व्यंग्यस्यैव व्यवस्थिते ।
काव्ये उभे ततोऽन्यत् यत् चित्रमित्यभिधीयते ।।

चित्रं शब्दार्थभेदेन द्विविधं व्यवस्थितम् ।
तत्र किञ्चित्शब्दचित्रं वाच्यचित्रमतः परम् ।।

इति आलङ्कारिकैः सर्वैः शब्दचित्रमर्थचित्रमङ्गीकृतम्। परं शब्दचित्रान्तर्गत मुरजादिबन्धाः तदा न समाम्नाता इति यमक अनुप्रास वक्रोक्ति, श्लेष पुनरुक्तिवदाभासरुप एव शब्दालङ्काराः अभूवन् । परं सततनूतनविषयाविष्कर्तारः चित्रालङ्कारेषु मुरजादिबन्धान् अपि संयोज्य चित्रपदं विस्तृतमकुर्वन्।

प्राचीनकालेऽपि ज्योतिषग्रन्थेषु, तन्त्रग्रन्थेषु च केचन बन्धाः उपलभ्यन्ते स्म। तत्र चक्रबन्धपद्मबन्धादयः अनेकभेदप्रभिन्नाः निर्बबन्धुः । तेषां चक्रादीनां दर्शनेन अन्यबन्धानां निर्माणमभूत् इति ऊहः ।

अतएव मम्मटः चित्रशब्दं लक्षयति स्वकाव्यप्रकाशे -

चित्रं यत्रवर्णानां खड्गाद्याकृतिहेतुता ।।

(काव्यप्रकाश-९-१२१)

इति चित्र शब्दं विस्तृतार्थे प्रयुक्तः ।

चित्रालङ्काराः स्वर, स्थान, वर्ण मूलका भवन्ति। कुत्रचित् गति चित्राणि भवन्ति। यथा यमकालङ्कारे अनुलोमा प्रतिलोमाभ्यां तुल्यार्थत्वं भवति। कदाचित् सम्पूर्णश्लोकं प्रतिलोमपठनेन श्लोकान्तरं भवति। श्रीरामकृष्णविलोमकाव्ये श्लोकानां निर्माणमेवमभूत्। श्लोकान्तरगतिचित्रमिति अस्य नाम।

प्रान्तीयभाषासु कवयः तुल्यशब्दे संस्कृत, प्रान्तीयभाषातुल्यार्थं प्रतिबोधयन्ति। यथा नीलज्ञलशब्दः।

प्राचीनकालेराजसभासु केचनकवयः कर्तृ, कर्म, क्रियापदगोपनेन श्लोकं निर्मान्तिस्म। तत्र राजसभासु क्रियापदादि अवगमनेन प्रतिष्टामलभत। अस्याः गूढचित्रमिति नाम्ना आलङ्कारिका व्यवहरन्ति। लोके प्रसिद्धा प्रक्रिया अष्टावधाने समस्यापूर्तिरिति भवति। तस्यां असम्भवविषयो वा अथवा अश्लीलार्थो वा समस्यारूपेण ददति। यथा -

" स्तनवस्त्रं परित्यज्य स्नुषा श्वसुरमिच्छति " इत्यादि। अत्र तु अत्यन्ताश्लीलार्थ एव अवबुध्यते।

परं पूरणेन अश्लीलार्थं नावगच्छेत् ।
काव्यकण्ठगणपतिशास्त्रिभिः एवं पूरितमिदं पद्यम् ।

हिडिम्बा भीमदयिता निदाघे घर्मपीडिता ।
"स्तनवस्त्रं परित्यज्य स्नुषा श्वसुरमिच्छति" इति ।

अस्याः समस्यायाः चित्रमिति भेदान्तरम् ।
निषेधाक्षरी इति अन्या काचन प्रक्रियास्ति ।
तत्रऽपि एवमेव निषेधपूर्वकं पूरणं भवति ।

बहुभाषा चित्रश्लोकाः रुद्रटस्य काव्यालङ्कारे दोदृश्यन्ते। किरातार्जुनीय शिशुपालवधादिकाव्येषु एकाक्षर, द्व्यक्षर त्र्यक्षर, चतुरक्षरादिश्लोकाः दृश्यन्ते इति अस्य सम्प्रदायस्य अनादित्वमस्ति।

आकारचित्रणाऽपि काव्येषु दृश्यते। अतएव आनन्तरकालीनाः चित्रशब्दस्य लक्षणम् खड्गाद्याकृति वर्णविन्यासः चित्रमिति अकुर्वन्। अत्र आकारचित्राणि षड्भेदैर्दोदृश्यन्ते।

१- मङ्गलमयवस्तुचित्रम्

अस्मिन् विभागे मङ्गलमयशब्दवस्तूनां आकारसदृश वर्णविन्यासो भवति। यथा ओंकारः, शिवलिङ्गादयः।

२- शस्त्ररूपचित्रम्

आजिउपयुज्यमानायुधविशेषाः खड्गादीनां आकारवर्णविन्यासो भवति।

३- वनवैभवात्मकचित्रम् -

अस्मिन् वृक्षलतादि आकारे चित्रस्य निर्माणं भवति।

४- प्राणिचित्रम्

प्राणिसदृशाकारे वर्णविन्यासो भवति तत्र नाग, हय अश्वादीनां बन्धाः भवन्ति। तत्र नागबन्धः अनेकेषु पुस्तकेषु दरीदृश्यते। कालीबन्धइति भगवत्याः विद्याऽविद्यारूपबन्धः सारस्वतशतक नामक ग्रन्थे दृश्यते।

५- आभरणचित्रम् -

हाराद्याकृति वर्णविन्यासो भवति अस्मिन् चित्रे। अंगुटिका, हारबन्धाः दृश्यन्ते कङ्कणबन्धः विरलतया दृश्यते। एवं कटककुण्डलादीनामपि बन्धाः निर्मातुं शक्यते।

६- प्रकीर्णचित्रम् -

पञ्चसु अनन्तभूतानि चित्राणि अस्मिन् समायान्ति। गोमूत्रिका, छत्र, चामरबन्धाः अस्मिन् अन्तर्भवन्ति।

एतेषां चित्राणां, एवं नास्ति नियतिः। यथानुभवं वस्तूनां चित्राणि निर्मातुं शक्यन्ते परं इयं प्रक्रिया जटिला इति, तत्र लक्षणपूर्वकं निर्माणमपेक्षितम्। अतः नियतसंख्याकाः बन्धाः आलंकारिकैः स्व ग्रन्थेषुसृष्टाः।

एतेषां बन्धानां अनादित्वमस्तीति न पिष्टस्य पेषणम्।

चित्रकाव्यनिर्माणे नियमाः

चित्रकाव्यनिर्माणं नातीव सुकरमिति चित्रकाव्यकर्तारः लक्षणग्रन्थेषु केचन नियमानकुर्वन्। तत्र दृश्यमान लाक्षिणिकेषु बाणभट्टादयः एवं लिखन्ति तत्र चित्रभूषणनामक ग्रन्थे -

रलयोडलयोस्तदल्ललयोवबयोरपि।
नणयोर्नमयोश्चान्ते, सविसर्गातिसर्गयोः ॥
सबिन्दुकाबिन्दुकयोः स्याद्भेदेनकल्पनम्

(चित्रभूषणम्)

एवमेव वाग्भटः स्ववाग्भटालङ्कार नामकग्रन्थे-

यमकश्लेषचित्रेषु वबयोडलयोनभित्।
नानुस्वार विसर्गौ च चित्रभङ्गाय सम्मतौ।

वाग्भटालङ्कारः

अन्यग्रन्थेऽपि एवं दृश्यते -

यमकादौ भवेदैक्य डलयोरलयोर्बवोः।
शषयोर्नणयोश्लोकै सविसर्ग विसर्गयोः ॥
सबिन्दुका अबिन्दुकयो स्यादभेदप्रकल्पनम्।

पद्यामृतसरोवरे -

दीर्घोऽपि ह्रस्वतां याति, ह्रस्वोदीर्घश्च जायते।

बिन्दुयोगमयोगं वा चित्रेप्यतिविचित्रता। पद्यामृतसरोवरः।

काव्यकल्पलतायां -

सर्वेष्वाकार चित्रेषु वर्णवृत्तिस्तु सन्धिषु।
लघुचारे लघ्वलघु पर्यन्ते वबयो रपि ॥१८६॥
संयुक्तयोः सजातीयवर्णयोर्नणयोस्तथा।

स्वरवर्जितमनयोः विसर्गभावाभावयोः ।।१८६।।
डलयोश्च विरोधेन यमकश्लेष चित्रयोः

काव्यकल्पलतावृत्ति प्र०उ०स्त० ५

एवमेव श्लोके यत्र क्रियापदं न भवति तत्र सत्तार्थकधातुं अनुवृत्तिं कुर्यात् एवं केचन नियमाः भवन्ति ।

बन्धोद्धारप्रकारः -

बन्धोद्धारप्रकारविषये नास्ति कवीनामैकमत्यम्, लक्षणरीत्या बन्धनिर्माणं कुर्वन्ति। तत्र आकारोऽपि आयातीति अन्येन कविना निर्मितं पद्यं बन्धरूपेण न शक्यते। परं अत्र साम्यं भवति इति लाक्षणिकाः लक्षणानि अरचन्। प्रायशः लक्षणग्रन्था अपि न सन्ति बहवः। केचन मांगलिकबन्धा केचन अस्त्रशास्त्रादिबन्धाः, केचन प्रकीर्णाः इति । अन्यत्र न एवं विभागः क्रमेण सर्वेषां यावद्विवक्षा तावत् प्रदर्शिताः ।

लक्ष्यग्रन्थेभ्यः केषाञ्चनबन्धानां लक्षणानि उद्धृत्य अत्र दीयन्ते ।

ओंकारबन्धस्य उद्धारक्रमं चित्रकाव्ये -

बिन्दुतो मध्यआगच्छेत् ततः पार्श्वद्वयेऽपि च ।
पुनर्बिन्दोविलोम्नाऽत्र क्रमोऽयं प्रणवात्मकः ।

चित्रकाव्यम् ।।

चामरबन्धः पद्यामृतसरोवरे -

योजनीयस्ततथावर्णोदण्डरोमादिसङ्गमे ।
रोमस्य वर्णपाठदौ पठनीयो यथा भवेत् ।।
दण्डरोमस्थवर्णानां रोम्णा संख्या न विद्यते ।
प्रोक्तचामरबन्धोऽयं क्वचिद्रोव्यधिकाक्षरः ।।

पद्यामृतसरोवरः ।।

छत्रबन्धः चित्रबन्धकाव्ये-

अ़श्वतः परितो गच्छेत्, ततोनेमिद्वयेऽपि च
स्वेष्टं कोष्ठेषु विन्यस्यछत्रवन्धोविदांवर ।।

चित्रबन्धकाव्यम् ।

शङ्खबन्धः पद्यामृतसरोवरे -

गर्भतो मौलिमालिख्यमूलवर्णाश्च मालिकाम् ।
पुनर्द्वितीयां चाधारे कम्बोः पंक्तिंसमालिखेत् ।।

श्रीबन्धो चित्रकाव्ये-

श्रियोः लेखक्रमेणैव चानुलोमविलोमतः ।
श्लिष्टे तु यच्चेद्बिन्दुस्तं श्रीबन्धोत्रिकत्रिप्तियः ।।

चित्रबन्धकाव्यम् ।

अष्टदलपद्मबन्धः सरस्वती कण्ठाभरणे -
निविष्टाष्टदलन्यासमिदंपादार्थमावित्तभिः ।
अस्पृष्टकणिकं कोणैः कविनामाङ्कमम्बुजम् ।

मालाबन्धः चित्रबन्धकाव्ये -

अनुलोमाभ्यां विलोमाभ्यां मध्येऽधःपुनरेव हि ।
भ्रमन् व्रजेत् कविप्रेष्ठी मालाबन्धोऽत्र नूतने ।।

चित्रबन्धकाव्यम् ।

खड्गबन्धः चित्रबन्धकाव्ये -

उपरिष्टादधस्ताच्च द्वितीये ह्यनुलोमतः ।
द्वितीयान्तस्तृतीयादौ तुरीयान्तौ विलोमतः ।।

चित्रबन्धकाव्यम् ।।

गदाबन्धः चित्रबन्धकाव्ये -

अधस्ताद्द्वे पदे मध्ये द्वे पदे परितस्तथा ।
गोमूत्रिका क्रमेणैव गदाबन्धोऽत्रनूतने ।।

षडारचक्रबन्धः सरस्वतीकण्ठाभरणे-

पुरः पुरो लिखेत् पादानत्र त्रीन् षडरीकृतान् ।
तुयं तु भ्रमयन्तेमौनामाङ्कश्चक्र संविधिः ।।

सरस्वतीकण्ठाभरणम् ।

धनुर्बन्धः चित्रबन्धकाव्ये -

अधस्तात् परितोगच्छेदत्रैव विरमेत् पुनः ।
धनुर्बन्धोक्रममिमं जानन्तु विदुषां पुनः ।।

चित्रबन्धकाव्यम् ।।

नागबन्धः प्रतापरुद्रयशो भूषणे -

रेखाभ्यां चतुरश्राणि चतुष्कोष्टनिकल्पयेत् ।
रेखाद्वयान्तराले स्याद्यथा कोष्टे गृहाष्टकम् ।
विदिक्षु कुण्डलीकुर्यात् तद्रेखाग्रैर्यथाक्रमम् ।
दिग्रेखाग्राणि बाह्यानि योजयेत् दिक्त्रयेमिथः ।।
एकत्र तु फणापुच्छमेलनं कल्पयेत् तथा ।
अन्तराण्यक्ष्णया कुर्यात् सन्दंशाः स्युर्यथामिथः ।।
वर्णावृत्तिस्थलान्यत्र कोष्टकोणानि षेडश ।
सन्दंशानां चतुष्कं च कण्ठश्चेत्येकविंशतिः ।
आवृत्ति र्युग्मवर्णानां नेतरेषामिह क्वचित् ।
अकेशानदशब्रह्मवर्णाः पादचतुष्कगाः ।।
आवर्तेर्ऋतादिकुण्डलेष्वप्रदक्षिणम् ।
यथैवं स्यात् तथा वर्णान् फणतो विन्यसेत् क्रमात् ।।
त्रिशंदष्टाविंशतिश्च षड्विंशतिरनुक्रमात् ।
वेष्टनत्रितये वर्णाः समाप्तिस्तु गलाक्षरे ।।

गोमूत्रिकाबन्धः सरस्वतीकण्ठाभरणे -

गतिरुच्चावचा यत्र मार्गे मूत्रस्य गोरिव ।
गोमूत्रिकेतितम्प्राहुःदुष्करं चित्रवेदिनः ।।

डमरुबन्धः चित्रबन्धकाव्ये -

मध्यातिर्यक्कोणिनेमौकोणान्मध्ये पुनर्विलोम्नाच ।
एवं भ्रमन् सरेत्तुतत्रैवात्र प्रबन्धेडमर्वाख्ये ।।

मुरजबन्ध अलङ्कारचिन्तामणौ -

पूर्वर्धमूर्ध्वपङ्क्त्या तुलिखित्वार्धपरंततः ।
एकान्तरितमूर्ध्वाधो मुरजं निगदेत् कविः ।।

सर्वतोभद्रबन्धः काव्यादर्शे -

तदिष्टं सर्वतोभद्रं भ्रमणं यदि सर्वतः ।

काव्यादर्शः ३/८०

एवं आलङ्कारिकैः स्वलक्षणानि उपस्थापितानि केषाञ्चनबन्धानां लक्षणानि नोपलब्धानि परं लक्ष्यश्लोका उपलक्षिताः। केषुचित् ग्रन्थेषु बन्धानां भेदप्रभेदैः लक्षणोदहरणानि निरुपितानि। केचनमहाकवयः ऊहापोहां कृत्वा नूतनबन्धानां निर्माणमपि अकुर्वन्। परं सर्वेषुग्रन्थेषु पूर्णरूपेण बन्धानां उपलब्धि न दृश्यते। प्रायशः मूलरूपेण पञ्चाशत् संख्याकाः बन्धाः दरीदृश्यन्ते अलंकार, काव्य ग्रन्थेषु। तेषु सर्पबन्धः, सर्वतोभद्रबन्धः गोमूत्रिकाबन्धः, मुरजबन्धः खड्गबन्धः, चक्रबन्धः, पद्मबन्धा इमे विविधपुस्तकेषु बन्धोद्धारक्रमेण उद्धृताः। चित्रबन्धकाव्येषु एव अन्यबन्धाः दृष्टिगोचरमायान्ति।

चित्रबन्धरामायणविशेषाः -

चित्रबन्धरामायणस्य महाकाव्यत्वम् -

यद्यऽपि महाकाव्यानि सर्वासुभाषासु उपलभ्यन्ते, संस्कृतमूलत्वंसर्वैरङ्गीकृतम्। संस्कृतवाङ्गमये रामायणमेवादि काव्यमिति विदुषां मतिः। यतः वाल्मीकेर्मुखात् क्रौञ्चवधदर्शनेन 'मा निषाद' इति श्लोको निर्गतः इति स एव च्छन्दोबद्धः आद्यश्लोक इति च। परं तदानीं नासीत् विचिकित्सा महाकाव्यविषये इदं महाकाव्यं भवितुमर्हति वा नवा इति। यतः तदानीं लक्षणग्रन्था नोद्भूताः इति। महकाव्यस्य किमस्ति लक्षणं किमर्थमेवं नियमकृतः लक्षणमनुसृत्यैव लिखितव्यम् वा इति जिज्ञासां महाकवीनां नास्ति नियतिः 'आपारे काव्यसंसारे कविरेव प्रजापतिः' परं यदि नियमं न भवति महाकाव्यस्य इतरकाव्येभ्यः भेदः नोपलक्ष्यते इति अवश्यं लक्षणरूपनियमः भवेत्। तल्लक्षणं कथं भवितुमर्हति यथा प्रयोगशरणं व्याकरणम् तथा महाकाव्यस्याऽपि प्राचीनकवीनां काव्यान्येव शरणं लक्षणनिर्माणे। अतएव आलंकारिकैः अनन्तर कालीनै पूर्वकविकाव्यानुसारं महाकाव्यलक्षणमकुर्वन्। महाकाव्यलक्षणं विद्यानाथकृतप्रतापरुद्रीययशोभूषणे -

नगरार्णव शैलर्तुं चन्द्रार्कोदयवर्णनम् ।
उद्यानसलिलक्रीडामधुपानरतोत्सवाः ।।६८।।
विप्रलम्भो विवाहश्च कुमारोदय वर्णनम् ।
मन्त्रद्यूत प्रयाणाजि नायकाभ्युदया अपि ।।३९।।
एतानि यत्र वर्ण्यन्ते तन्महाकाव्यमुच्यते ।
एषामष्टादशानां यैः कैश्चिदूनमपीष्यते ।।७०।।

।। प्रतापरुद्रयिम् काव्यप्रंकरणम् ।।

सर्गनिबन्ध चतुर्वर्गफलचतुरोदात्तनायकादीनामुपलक्षणम् ।। इति काव्यादर्शे, प्रंतापरुद्रीये चे एवं महाकाव्य लक्षणम् उक्तम्। अष्ठादशवर्णनेषु द्वादशवर्णनेनाऽपि महाकाव्यत्वंसिद्धयति इति केचन। एवं संस्कृतसाहित्ये बहूनिकाव्यानि सन्ति। तत्र मेघदूतस्य महकाव्यत्वं नाङ्गीकुर्वन्ति केचन खण्डकाव्यामिति नैषधकाव्यं पञ्चकाव्येषु निवेशयन्ति। केचन विप्रतिपद्यन्ते। परं नियमस्य शैथिल्यं अमरुकशतककथनावसरेऽभूत्। यतः अमरुक शतंकश्लोकः प्रबन्धशतायत इति सर्वैः अङ्गीक्रियते इति परं रामायणे तु अष्टादशवर्णनानि न केवलं, अष्टसहस्र वर्णनानि सन्ति इति नात्युक्तिः ।

श्रीमद्रामायण कथामाधारीकृत्य चरकूरिकुलाम्बोधि कविचन्द्रः वेंकटेश्वर कविः चित्रबन्धरामायणं नामकं रामायणकाव्यम् लिलेख। तत्र रामायणस्य मूलकथा इति प्रथमसर्गे अयोध्यानगरवर्णनं कृतम्। ततः मिथिलानगरं च वर्णयाञ्चकार। ततः लङ्कानगरवर्णनम् सुन्दरकाण्डे, युद्धकाण्डे कृतवान्।

यथा चित्रबन्धरामायणे अयाध्यानगरवर्णनावसरे -

साकेतसंज्ञा नगरी नगरीतिगृहोज्वला ।
इहास्ति भूरि वरणावरणा धरणीतले ।
यत्र भ्रमन्त्यः संरेजुर्दारुयन्त्रे नृपाङ्गणे ।
मेरुप्रदक्षिणरताः गणिका स्तारका इव ।।

इति आरभ्य ।

प्रासादशिखरालोलपताका तर्जनीमिषात् ।
अतर्जयन् दिवोलक्ष्मीं यस्यां मन्दिरसम्पदः ।।
सरक्षितायां यत्रासन् रघुराज भुजाबलैः ।
दुर्गरक्षाविधानानि मण्डनायैव केवलम् ।।

इति यावत् अयोध्यावर्णनं कृतम् ।

प्रथमसर्गे एव मिथिलावर्णनावसरे -

निर्मितानेकमाणिक्य कायमाना समन्ततः ।
पुरी रराज मुद्बुद्ध कायमाना समन्ततः ।।

इति वर्णयति ।

लङ्कावर्णनावसरे पञ्चमसर्गे -
नगरे वीतसञ्चारे शृत्वा तु व्यचरद्धरिः ।
क्वचिद्विघटयन् बद्धकवाटं क्वचिल्लङ्घयन् ।।
पुररक्षिगदाकोण किंकिणीगणझंकुले ।
धीरो मुखोदितशान्तं जगाहे रावणालयम् ।।

इत्थं- नगरवर्णनं अष्टादशवर्णनेषु एवं कृतम् ।

अष्टादशवर्णनेषु द्वितीयं शैलवर्णनं द्वितीयसर्गे चित्रकूटपर्वतं एवं वर्णयति ।

रामोऽपि विहरन्नद्रौ काञ्चनागमदारुणे ।
मेराविव मुदं पूषा काञ्चनागमदारुणे ।।इति।।

एवमेव चतुर्थ सर्गे -

अभिषिक्तं रुषालोक्य सुग्रीवं वालिवारिणा ।
माल्यवद्धूभृतं वृष्ट्या शक्रस्येवाभिषिञ्चति ।।

एवमेव चतुर्थस्सर्गे महेन्द्रगिरिवर्णनावसरे -

यथा रात्रिञ्चरेशस्य शिरश्शैलस्य शेखरम् ।
अघ्रिणा ताण्डत्स्रस्तलताकेशकलानिलः ।।

ततः मैनाक पर्वतवर्णनावसरे -

महेन्द्रवैरी मैनाको महेन्द्रगिरिमर्दनम् ।
मारुतिं पूजयां चक्रे योग्यो योग्येन पूज्यते ।।

एवमेव सन्दर्भानुसारं पर्वतवर्णनमकारि ।

चन्द्रोदयवर्णनम् चतुर्थसर्गे -

विधुस्संध्यातपालेपपाटलावनपादपाः ।
हनूमदागमामोदात् सद्यः पल्लविता इव ।।
प्राचीं सोल्लासयन्तीन्दोरति धीरमरीचयः ।
विजहास दिविप्राप्तरतिधीरमरीचयः ।।

एवं अष्टश्लोकेषु चन्द्रोदयवर्णनं करोति अस्मिन् सर्गे -

अर्कोदयवर्णनम् अयोध्याकाण्डे (द्वितीय) -
तटाकोर्मिस्पुटैरर्कप्रतिबिम्बैरसंख्यकैः ।
पस्पर्ध इव यो मू र्ध्नि भानूदयोदयम् ।

अर्कोदयोपलक्षकं सूर्यास्तमयवर्णनमपि अनेकस्थलेषु कृतम् । यथा चतुर्थसर्गे 'नूनं विलङ्घितुं भास्वन् आरुरोह पराचलम् '।

उद्याने नायिकानायक विहरणवर्णनमपि अयोध्याकाण्डेद्वितीयसर्गे -

''रामोऽपि विहरन्नद्रौ कांचनागमदारुणे'' ।
इत्येनेन स्तनकोकं स्पृशन्पत्न्याः काकंपाकरिजं विभुः ।

इत्यनेन च -

रामं सहर्षमादाय विधूत इत्यनेन च
रामसीताविहरणवर्णनं कृतम् ।
जलक्रीडावर्णनमपि तृतीयसर्गे -
तरङ्गकानितेसेभे रञ्जिते मदिराक्षसे ।
गतेऽतिलानं कैरते कमलाकरनन्दिनी ।।

ऋतुवर्णनमपि वसन्तवर्षहेमन्तशरदृतूनां वर्णनं कृतम् ।
तत्रहेमन्तऋतुवर्णनम् तृतीयसर्गे ...
हिमरेखामितोष्णीषधारिभिस्तत्रभूधरैः ।
कृतो हेमन्त समयः सामन्त इति संबभौ ।।

इत्यारभ्य

कासारकमलव्राति निहते हिमवारिणा ।
ईषुर्युवानः कान्तानां वदनाम्बुजसौरभम् ।।

इति षड्श्लौकेवर्णयति ।

ततः वर्षर्तु वर्णनमपि चतुर्थसर्गे -

घनागमेन तत्रासे शक्रचापकयोगिना ।
वनानमेपतत्रासे वक्रतापवियोगिना ।।

इत्यरभ्य -

प्रथमाः पयसां धारा रेजिरे गगनाजिरे -
पर्जन्यस्यमुनिरार्द्रा लम्बमानजटाइव ।

इति पर्यन्तं अष्टश्लोकैःवर्षर्तुमेव वर्णयति ।।

शरदृतुवर्णनमपि चतुर्थ सर्गे -

जृम्भति गगनालम्बा कापिकादम्बिनीसिता ।
अन्वकाश नदीकूलं पुष्फितेव शराटवी ।।
इति शरत्कालश्च वर्णयति ।
वसन्तवर्णनमपि तृतीय सर्गे नवश्लोकैः करोति -
रोलम्बावलि रोमलीरुल्लसत्पल्लवधारा ।
सीतेवात्र वसन्तश्री दृश्यते सपिकस्वरा ।।

इत्यारभ्य -

कालीयनवचम्पकवल्लीमिमां मलिना मलिना मरिणामलिना ।
क्षितिजामिह याक्रियते मरुतादरसादलसादलसादलसा ।।

इतियावत् वसन्तकालं वर्णयति -

रतोत्सव वर्णनं नायिका नायकयोः वर्णितम् तृतीयसर्गे -

निर्धूताखिलतापापोपापेहसहमानवे ।
नवे भूद्विहितारामोरामोगोदावरीतटे ।।

मधुपानवर्णनं नायकेननकृतम् परं सुन्दर काण्डे राक्षस्यः कुर्वन्ति । तत् गुणीभूतं भवति ।

ततः विप्रलम्भवर्णनं अतिविपुलं नायिका नायकयोर्वर्णितमस्ति ।

अत्र दिङ्मात्रेण दर्शयायिता तत्र तृतीयसर्गान्ते वसन्तवर्णन समये -

इत्याकलय्य विपिनान्त वसन्तलक्ष्मीं

सीतावियोगविधुरो विहितप्रतापः ।
खेलं निलिम्प ललना कुचकोककम्पां ।।
पम्पामवाप खरजीत्कृत गात्रकम्पाम् ।।

एवमेव वर्षर्तुवर्णनावसरे रामचन्द्रस्य विप्रलम्भं वर्णयति कविः -

वसंस्तत्र तदारामो मैथिलीविरहातुरः ।
समीपस्थमुवाचेदं लक्ष्मणं शुभलक्ष्मणम् ।

इति ततः पञ्चभिश्लोकैः विरहावस्थां वर्णयति -

घना घनाघनघनानाघ नानाघनाघनाः ।
धाराधारा धरा धारा राधाधाराधराधुरी ।।

इत्यारभ्य -

गर्जितादुर्जयानेतान् बलाज्जहिबलाहकान् ।
श्लाघनीयामिदंवीरवधादपि पलाशिनाम् ।।
इत्यं विप्रलपन्नीत्वा राघवोविरहातुरः ।
वासरान्नीलजीमूतधूसरान्निदमब्रवीत् ।।

इति यावत् नायकस्य विरहावस्थां वर्णयति ।

वैदेह्याः विरहवर्णनमपि आकारदिमिः वर्णयति पञ्चमसर्गे -

विवाहवर्णनं (बालकाण्डे) प्रथमसर्गे -

सतां राम सतामग्रे प्रतिजग्राह जानकीम् ।
जनकान्मेनकापुत्रीं पिनाकीव हिमाचलात् ।।

इति विवाहवर्णनम् ।

सीता मार्गणार्थं सुग्रीव सख्यं ततः हनूमतादि दिक्षु प्रेषणादिकं मन्त्रणे आयाति ।

ततः युद्धकाण्डे षष्टसर्गे सन्धानकारणार्थमंगदं प्रेषयति । तदवसरे -

सन्धानकरणे सद्यो रामेणप्रेरितोऽङ्गदः ।
आगत्य लङ्कां पौलस्त्यमित्युवाच सभान्तरे ।।

एवमेव सुन्दराकाण्डे हनूमतः वचनावसरेऽपि -

अधुनारिवधं यागं विधित्सो वालिवैरिणि ।
आनेतुमहमागच्छं लङ्कादशशिरः पशुम् ।

इति काव्यानुरूपं वर्णनं कृतम् ।

युद्धवर्णनं नैकत्र कृतम् -

बालकाण्डे मारीचवधावसरे -

मरीचोनीचगीस्तस्य नाराचश्वासवायुना ।
दूरीचक्रेऽब्धिपातेन सारी चलतृणं यथा ।।

तृतीयसर्गे खररामायोर्युद्धं वर्णयति -

राघवास्फारितोददण्डकोदण्डगुणनिस्वतः ।
शुश्रुवे खरवाहिन्यां जयतामिवदुन्दुभिः ।।

इति षट्श्लोकैः वर्णयति -

अस्मिन् सर्गे केवलं युद्धमेव वर्णयति - अतएव युद्धकाण्डमिति अस्य नामऽपि रामरावणयोर्युद्धं युद्धकाण्डे अस्य श्लोकपर्यम्म् अवर्णयत् ।

पापत राममुक्तेन ब्रह्मबाणेन रावणः ।
भूततन्मूर्ध भाराऽपि लघ्वजज्ञे तदामही ।।

इति यावत् -

नायकाभ्युदयवर्णनं सर्वत्रवर्णितं, विशिष्य रावणवधात्परं अयोध्यामागत्य पट्टाभिषेकर्मङ्गलावसरे -

सरत्नसिंहासनमध्यमात्रितस्ततोभिषिक्तश्चतुरर्णवैर्जलैः ।
विभीणार्कात्मजभृत चामरो बभूवशतृघ्नधृतोष्णवारणः ।।

इति वर्णयति -

प्रयाणवर्णनं लङ्कानगर्याः अयोध्यागमनदिकं च वर्णितमस्ति ।

एवं महाकव्ये यानि वर्णनानि तानि पूर्णरूपेण वर्णितानि, अपि च सन्ध्यायाः वर्णनम्, अटवीवर्णनै, शूर्पणखायाः वर्णनादिकं काव्यस्य शोभाहेतवः विशेषेण भवन्ति ।

अपि च किरातार्जुनीय, शिशुपालवधकाव्येषु यथा सर्गादौ सर्गान्ते च श्लोकेषु श्रीशब्दप्रयोगकृतः तथा अनेन कविनाऽपि स्वकाव्ये श्रीशब्दः निवद्धः सर्गादौ सर्गान्ते च ।

तत्र प्रथमसर्गस्य प्रथमश्लोकः लक्ष्मीपदाङ्कितं यथालक्ष्मीकटाक्षाः मयि ते प्रसरतुसमन्ततः ।
येषां महिम्ना जगतामीश्वरोऽभूत् जनार्दनः ।।१-१

तथा प्रथमसर्गस्य अन्तश्लोके -

तनयविजयलक्ष्मी दर्शनप्रीतिचेतान्,
प्रविमलतर मुक्तातोरणालीपरीताम् ।
पुरविशदुदारां पौरुहूतः सखायं
शरदुदित सुधांशु द्यौरिवोदीतताराम् ।।

एवमेव द्वितीयसर्गस्यअन्तश्लोके -

वीरलक्ष्मी सखायो तृतीयः स्वयम्
रक्षसां कारणं खेचराकारणम् ।
चण्डतेजाइव व्योम रामोविश -
च्चण्डधूकाननं दण्डकाकाननम् ।।

इत्थमेव तृतीयसर्गान्तश्लोके -

इत्याकलय्य विपिनान्तवसन्तलक्ष्मीं
सीतावियोग विधुरो विहित प्रतापः ।
खेलं निलिम्पललनाकुचकोककम्पां
पम्पामवाप खरजित्कृत गत्रकम्पाम् ।।

तथैव चतुर्थसर्गे अन्तिमश्लोके -

वक्त्रे दधद्विकच पाटलपद्मलक्ष्मीः
रत्नाकरस्य तरणाय तदा हनूमान् ।
आरोहति स्म शिखरीन्द्रवरं महेन्द्रं
पूर्वोदयाचलमिवाम्बरलङ्घनाय ।।

यथापूर्वं पञ्चसर्गान्तश्लोके -

इत्याकलय्यानिलसूनुविक्रमं
सवीरलक्ष्मीनयनान्तवीक्षितः
महोत्सवोत्फुल्लविशाललोचनो
रामोबभूवाहित निर्जयोत्सुकः ।

एवं अन्तिमसर्गान्तश्लोके -

सामाज्य लक्ष्मीमुदितोऽथ रामो
यथोचितं पूजितमित्रवर्गः
दानैर्मखैस्तर्पितविप्रदेव ।
चिरं महीं पालयतिस्म सर्वाम् ।।

इत्थं पूर्वोदाहृतश्लोकैः व्याख्यातृवचनं स्पष्टमभूत् ।

काव्येषु रस, ध्वनि, अलङ्कारादयः वर्णिताऽपि प्रधान्येन व्यपदेशाः भवन्तीति तत्तद्व्यवहारे विनिगमकं भवति। रस प्रधानकाव्येऽपि अलङ्कार स्पर्शो सर्वथा न भवति इति नास्ति। यतः तथा निर्माणं सर्वथा असम्भवात्। अतएव काव्यलक्षणं तददोषौ शब्दार्थावनलङ्कृतिर्पुनः क्वाऽपि इति कृत्वा ततः काव्यभेदान न्यरूपयत्। तत्र नञ् अल्पार्थे एव प्रयुक्तः।

अस्मिन् काव्येऽपि शृङ्गारादि रसानां, वस्तुध्वन्यादिध्वनीनां, उपमादिलङ्काराणां निवेशनं कृतमिति महाकाव्यत्वं निर्विवादस्य विषयः अन्यच्च सर्वगुणान्वितः रामः। अस्मिन् काव्ये नायक इति, सहृदयहृदयोद्वेजकं रामचन्द्रजीवनं इतिवृत्तमिति न लेशोऽस्ति सन्देहः।

तत्र रसादीनां उदाहरणानि दिङ्मात्रं अत्र निर्दिशति संस्कर्ता - तत्र ध्वनेः

सौमित्रे नीलजीमूतमलिनाकाश मार्जनी ।
नदीकतक धूलीव कापि वेला विजृम्भते ।।

अत्र शरत्कालस्य कतकधूल्युपमानेन निर्मलीकरणसामर्थ्यरूप वस्तु व्यज्यत इति अलङ्कारेण वस्तुध्वनिः।

एवमेव तृतीयसर्गे सीतापहरणात् परं रामः एवं वदति -

रोलम्बावलि रोमाली रुल्लसत्पल्लवाधरा ।
सीतेवात्र वसन्तश्री दृश्यते सपिकस्वरा ।।

अस्मिन् श्लोके विप्रलम्भशृङ्गारो उपवर्णितः ।

अलङ्कार निवेशः -

हरता पद्मिनीशोभां तुहिनेन तिरस्कृतः ।
नूनं दण्डधरं सद्यो मार्तण्डश्शरणं ययो ।।

अत्र उत्प्रेक्षालङ्कारः -

एवमेव अन्यरस, ध्वनि अलङ्काराऽपि उपनिबद्धाः इति महाकाव्यत्वमर्हति ।

चित्रबन्धरामायणे उल्लिख्यमानाः बन्धाः —

निरोष्ठ्यम् :

समस्याचित्रे अन्तर्भवति निरोष्ठयम् प्राचीनकालादारभ्य अष्टावधान, शतावधानादिप्रक्रियासु इयं समस्यापूर्तिः, निषेधाक्षरी इत्यादयः भवन्ति। ओष्ठ्यक्षरोपेतं श्लोके न भवति इति निरोष्ठ्यमिति नामा ।

चित्रबन्धरामायणे निरोष्ठ्यं बहुश्लोकेषु उपनिबद्धः । तेष्वेकः प्रथमसर्गो —

शारदा शारदाकाश नीरदाकाशशालिनी ।
श्रितस्य रसनाङ्गे लास्यलीलाः क्रियात्सदा ।।(इति१-२)

२- सन्दष्टयमकम् :

यमकालङ्कारभेदेषु अन्यतमः भारतीयालङ्कारिकेषु प्राचीनकालादारभ्य स्वग्रन्थेषु उल्लिख्यमानयमकालङ्कारभेदः । अस्य लक्षणं भरतः नाट्यशास्त्रे -

पूर्वस्यान्तेन पादस्य परस्यादिर्यदा समः ।
चक्रवच्चक्रवालं तद्विज्ञेयं नामतो यथा ।।ना०श०२६-७४

अस्य उदाहरणं चित्रबन्धरामायणे -

साकेत सञ्ज्ञानगरी नगरीति गृहोज्वला ।
इहास्ति भूरिवरणावरणाधरणीतले ।।चि०व०रा० १-५

अत्र श्लोके प्रथमपादान्ते नगरी इति द्वितीयपादस्य आदावपि एवमेव तृतीयपादस्यान्ते चतुर्थपादस्य आदौ वरणा इति पादयकम्-

यमक भेदेषु विक्रान्तयमकमित्यपि वदन्ति भरतादयः। भरतः स्वनाट्यशास्त्रे -

एकैक पादमुत्क्रम्य द्वौपादौ सदृशौ यदा ।
विक्रान्तयमकं नाम तद्विज्ञेयाभिदं यथा ।।

ना० शा०-१६ ७२

अस्य उदाहरणम् चित्रबन्धरामायणे —

प्रापुर्हरिं सुराः रक्षः सभयासण्डलालसाः ।
यथाद्रयोऽब्धिं यामिनां सभयाखण्डलालसाः ।।

चि०ब०रा०-१-१९

आद्यन्त यमकम्- काञ्चीयमकमित्यऽपि प्राचीनाः स्वग्रन्थेषु व्यपदिशन्ति। भरतः नाट्यशास्त्रे -

पादस्यादौ तथाचान्ते स्यातां यत्रसमेपदे ।
तत्काञ्चीयमकं नाम विज्ञेयं सूरिभिर्यथा ।।

ना०शा० १६-६८

चित्रबन्धरामायणे वेङ्कटेश्वरेण अस्योदाहरणं यथा --

सायके ताटकारतेः सुबाहुरवसायके ।
सायके स्याहुतिरभूद्वहन्द्याभेरहसायके ।।

चि०ब०रा० १-५२

अर्धयमकम् - भरतः नाट्यशास्त्रे समुद्रयमकमिति व्यवहरति। अस्य लक्षणं नाट्यशास्त्रे यथा —

अधेनैकेन यद्वृत्तं सर्वमेव समाप्यये ।
समुद्रयमकं नाम तज्ज्ञेयंपण्डितैर्यथा ।।

ना०शा० १६-७०।।

एतस्य उदाहरणं चित्रबन्धरामायणे-

सपर्ययादारचितमहसा रञ्जितोदयः ।
सपर्यया दारचितमहसा रञ्जितोदयः।।

चि.ब.रा.१-६८।।

चतुष्पादयमकम्- चतुव्यवसितयमकमिति भरतः कथयति अस्य लक्षणं नाट्यशास्त्रे -

सर्वेपादाः समा यत्र भवन्ति नियताक्षराः ।
चतुर्व्यवसितं नाम विज्ञेयं तद्बुधैर्यथा ।।

ना० शा० १६-८२।।

उदाहरणश्लोकः चित्रबन्धरामायणे -

सारभूरितरसाहसेनया सारभूरितरसाहसेनया ।
सारभूरितसाहसेनया सारभूरितरसाहसेनया ।।

एते भेदाः चित्रबन्धरामायणे यमकालंकारस्य निबद्धाः। वर्णचित्रभेदेषु एकाक्षरी, द्व्यक्षरी, त्र्यक्षरी, चतुरक्षरी भेदाःभवन्ति। भोजदेव सरस्वतीकण्ठाभरणे, दण्डी च काव्यादर्शे च वर्णचित्राणां स्थानं प्राकल्पयताम्।

एकाक्षरी -

तत्र एकव्यञ्जनाक्षरेण संपूर्णश्लोकनिर्माणेन एकाक्षरी इति अक्षरचित्रम् भवति। अस्य उदाहरणं चित्रबन्धरामायणे -

ततेताते5तीतताते तातताते‍ति तुत्ततिम् ।
ततो5तत्त ततैतत्ति ततातत्ता तितेततः ।।

चि०रा०२-४१

द्व्यक्षरी -

अक्षरद्वयेन श्लोको निर्मीयते सः श्लोकः द्व्क्षरी इति व्यवहारः।

अस्य उदाहरणं चित्रबन्धरामायणे -

राजराजोराजराज राजोजररजाजजः ।
राराजो5जर राजाजौ रराजाजि जरारुजा ।।२-२

त्र्यक्षरी-त्रिभिरक्षरैः निबद्धः श्लोकः त्रयक्षरीति उच्यते। उदाहरणं चित्रबन्धरामायणे -

माकामी नामुकः कामं कामनीकामकामुकः ।
मानिकः कामकामोकमनुमेने कुकाननम् ।।२-२०।।

चतुरक्षरी- अक्षरचतुष्टये श्लोकः क्रियते स चतुरक्षरी चित्रबन्धरामायणे-

जानाना जननी नाना निजाजनि जनी जनौ ।
रिपुरैपेपरापारे पौरपूर पुरे पुरा ।।२-६८

वैदिक चतुर्थपादः - वैदिकपादान् श्लोकचतुर्थपादत्वेन निबन्धनं वैदिक चतुर्थपादमिति उच्यते। चित्रबन्धरामायणे वैदिक

चतुर्थपादश्लोकः -

रोहिण्येवाम्बरे चन्द्रः श्रीकामः पितुराज्ञाया ।
राघवः सीतयागारे निषसाद धृतव्रतः ।।२-११

अनुलेमम्- श्लोकान्तरगतिचित्रेषु अनुलोमप्रतिलोमश्लोकौ भवतः। तत्र अनुलोमावृतिश्लोकं प्रतिलोमावृत्तौ पठनेन श्लोकान्तरं भवति।

तत्र अनुलोमावृत्तिश्लोकमनुलोममित्युच्यते। चित्रबन्धरामायणे अस्य उदाहरणम्-

सागता शमिता यासा रावायामिति धामभूः ।
निजमारूत धूताधा पाता संततभाभुवि ।। १-६०

अस्य श्लोकस्य प्रतिलोमावृत्ति पाठेन प्रतिलोमश्लोको नाम श्लोकान्तरं भवति। यथा -

विभुभाततसंतापाधाताधू तरूमाजनिः ।
भूमदाति मियावारासायाता शमितागसा ।। १-६१

इति भवति।

पादप्रतिलोमम्- अस्य श्लोकस्य प्रथमपाद प्रतिलोमावृत्तिपाठनेन द्वितीयपादो भवति। तृतीय पाद प्रतिलोमावृत्ति पाठनेन चतुर्थपादः भवति। अस्य उदाहरणं चित्रबन्धरामायणे -

दीनसारसभारासा साराभा सरसा नदी ।
तस्य का च दरारावा वारारादचकास्यत ।। २-४१,

एवमेव प्रतिपदप्रतिलोममपि भवति -

प्रतिपदप्रतिलोमम्- प्रत्येकपदं प्रतिलोमेन पदान्तरं भवति एवं पूर्णश्लोको भवति इति प्रतिपदप्रतिलोमम्। यथा चित्रबन्धरामायणे -

वनं नवं दिनानादि नदा दान वरारवम् ।
गतो तो गजराराजं रामोमारोमनोनमः ।। २-३१

अर्धपाद प्रतिलोमम्- प्रत्येक पादस्य अर्थभागस्य प्रतिलोमपठनेन शिष्टपद सम्प्राप्तिः भवति। अस्य लक्ष्यश्लोकः चित्रबन्धरामायणे —

लालोनागगगनालोला धूरितानतारिधूः ।
स्राविकाननकाविस्रा दारितानतारिदा ।।

ओष्ठ्यक्षरम् - ओष्ठयक्षरैर्निर्मित श्लोकः ओष्ठयक्षरम्। अस्य उदाहरणं चित्रबन्धरामायणे -

भूमौभीमामिमां भामामपि पापोपमां प्रभुः ।
भी भूम्नाभिभवं प्राप्तो बभ्राम प्रप्यभूमिपः ।।२-२६।।

गूढ चित्रेण कर्तृ, कारक, क्रियादिगूढं भवति तेषु गूढचित्रेषु श्लोके क्रियादिपदानि भवन्ति परं क्रियावत् न भान्ति इति भ्रान्तिः भवति, अतः गूढाचित्रमित्युच्यते। तत्र अन्त्यापादगोपनम्, क्रियागोपनमिति भेदद्वयं अस्मिन् ग्रन्थे स्पष्टीकृतम्। अन्त्यपादगोपनम् -

इहाविरलचित्राभे कामिनीयत्नकोमले ।
प्रभञ्जनसुतो सीतां विचकाय महीसुताम् ।।५-३८।।

एवमेव प्रथमद्वितीय तृतीयपादगोपनश्लोकाः भवन्तिः। क्रियागोपनम् -

ततः संवीक्ष्य वैदेहीं मुदितेस्मिन्दशाननः ।
सहारभूषणाढ्याभि र्वनिताभिस्तदान्तिकम् ।। ५-४६

अत्र आर इति क्रियापदं गोपितमस्ति। एवमेव कर्तृ, कर्म, करण, सम्प्रदान, अपादान सबन्ध, अधिकरणगूढ श्लोकाः, अभिप्रायगूढ, वस्तुगूढ श्लोकाश्च भवन्ति। आन्दोलिकाबन्धः - अस्य उदाहरणं चित्रबन्धरामायणे -

राममापमुदासाक्षाद्रज्यलक्ष्मीस्सनातनी ।
नितदास्सकृपश्रेणि प्राप्त भृत्योपमामरा ।।६-१२४।।

अर्थभ्रमकबन्धः - दण्डी स्वकाव्यादर्शे अस्य स्थानं प्रकल्पितम्। अस्यलक्षणं काव्यादर्शे -

प्राहुरर्धभ्रमं नाम श्लोकार्धभ्रमणं यदि । का०द०३-८०
विचचार विशालाक्षी चामरीव गलाकुलाम् ।
चारती दूनभीदा शाखदूताशना गवि ।। ६-५८

गोमूत्रिकाबन्धः - गोमूत्रस्यमार्गमिव भवति, अयं बन्ध इति गोमुत्रिकाबन्ध इत्युच्यते। भोजः अस्य लक्षणं सरस्वतीकण्ठाभरणे -

गतिरुच्चावचो यत्र मार्गेसूत्रस्य गोरिव ।
गोमूत्रिकेति तत्प्राहुर्दुष्करं चित्रवेदिनः ।

स०क०२-११५

सर्वतोभद्रबन्धः - सर्वतोभद्रबन्धे अनुलोमप्रतिलोमेन पादोत्थानं भवति। अस्य लक्षणं दण्डी स्वकाव्यादर्शे -

तदिष्टं सर्वतोभद्रं भ्रमणं यदि सर्वतः

का०द० ३-८०

चित्रबन्धरामायणे अस्य उदाहरणश्लोकः —

विवारहाहार वाविवादमाननमादवा ।
रमारतातार मारहानताततताहनहा ।।

मुराजबन्धः - मुरजाकारवत् भवतीति मुरजबन्धः अस्यलक्षणं अलङ्कारचिन्तामणौ।

पूर्वार्धमूर्ध्वं पङ्क्तौ तु लिखित्वार्धपरंततः ।
एकान्तारितमूर्धाधो मुरजं निगदेत् कविः ।।

अस्य उदाहरणं चित्रबन्धरामायणे -

मरुतामखिलारिघ्न गुरुतादभ्रतारिका ।
कारिताभ्रलताशंका सारितामखिलाशया ।।

चित्रबन्धरामायणकाव्यस्य उपादेयता -

रामायणानि बहूनि दृश्यन्ते साहित्यप्रपञ्चे । वाल्मीकि रामायणम्, आध्यात्मरामायणम्; सुन्दररामायणम्, आश्चर्य-रामायणादीनि कथां स्वस्वभावभेदैः चक्रुः ।

ततः काव्यकर्तारः अपि केचन रामकथां श्रव्यकाव्यरूपेण निर्मितवन्तः रघुवंशादयः। केचन नाटकनि अरचन् रामकथां महावीरचरित, उत्तररामचरितादीनि ।

केचन चम्पूकाव्यानि अपि अकुर्वन्। रामायणचम्पू आदयः ।

पूर्वोदाहृतग्रन्थेषु रसालङ्कार प्राधान्येन उपवर्णितम्। नैकत्राऽपि शब्दालंकाराः न स्पृष्टाः इति शब्दालङ्कारेषु बद्धं काव्यम् अवश्यं काव्यप्रपञ्चे भवितुमर्हति। प्राचीनः काश्चन रामायणं कङ्कणबन्धेषु

चकार। परं तत्र शब्दालङ्कारा: न स्पृष्टाः यमकार्णवमिति अन्यत् काव्यं दृश्यते। परं तत्रापि यमकालङ्कारस्य प्राधान्यमिति शब्दालङ्कार जगदपुर्णमेव। रामकृष्णविलोम काव्यादीनि उपलभ्यन्ते तत्र अनुलोमप्रतिलोमप्रकारः उपवर्णितः इति पूर्णता न साहित्यम्।

साहित्यप्रपञ्चसमाकलनाय, साहित्यप्रपञ्चे शब्दालङ्कार साहित्यन्यूनतापूरणाय अपूर्वशब्दालंकारप्रधानं चित्रबन्धरामायणम् वैङ्केटेश्वरकविः व्यरचत्। न केवलं शब्दालङ्काराः अर्थालङ्काराश्च स्पृष्टाः। तेषु उपमा, अर्थान्तरन्यास, विरोधाभासालङ्काराः अत्यन्तं पुष्टिं गताः।

अर्थान्तरन्यासालङ्कांरस्य उद्वेजकं श्लोकं अयोध्याकाण्ड-नामकद्वितीयसर्गे —

राज्यलक्ष्मी विहायैनं चकमे रघुनन्दनम् ।
वृद्धं सन्त्यज्य युवतिः युवानं खलु वाच्छति ।।२-८।।

तथा उत्प्रेक्षालङ्कारस्याऽपि दशरथस्य जरावस्थावर्णने -

स राजा दुर्भरं भूरि जरावेशवशालसः ।
परिमन्दशिरः कम्पैः न्यषेधि दिव भूभरम् ।।

तथा सन्ध्यावर्णनावसरे सुन्दरकाण्डनामक पञ्चमसर्गे -

तदानीं पाटलीभूताः जीमूताः विरराजिरे ।
सन्ध्यादुर्गामुदेदत्ता बलिमां सोत्करा इव ।। ५-१४

अत्र जीमूत बलिमांसोत्कराणां च उपमानोपमेय भावः इति उपमालङ्कारः।

शब्दालङ्कारेषु अनुप्रासादयः वर्णिताः

तत्र -

पात्रत्वं नातपत्रस्य चामरं त्यज पामर ।। ६-३६ ।।

सत्यत्र अनयनुप्रासः विहितः ।

इत्थं रामायणकथामनुसृत्य विना रसभङ्गं कविः स्व रचनां चकार। शब्दालङ्कारनिवेशोऽपि तदनुसारेण कृतमिति अति मुदावहविषयः।

हास्यरस पोषकं शब्दालङ्कारं उपनिबध्नाति कालावधि उल्लङ्घिताय सुग्रीवाय रामः स्वसन्देशं लक्ष्मणेन प्रेषयति। तदाचित्रबन्धरामायणे एकाक्षरबन्धे -

शाशशेशा शुशा श्शाशे शशे शाशिशिशोशशः ।
शशाशशं शशशश शाशाश शशशो शिशिः ।।

इति अन्ते शशशश शश इति। त्रिवचनेन पलायानं कुरु इति व त्रिवारं वदतीति अतीव हास्यपूर्वकं निवेदितवान् इति। अनेन प्रकारेण सर्वलक्षितत्वात् महाकाव्यत्वाच्च इदंकाव्य उपादेयं सर्वैः सहृदयैः।

शब्दालङ्कारप्रधानकाव्यनामितिहासः।

अलङ्कारशब्दस्य व्युत्पत्तिः द्वाभ्यां पदाभ्यामभूत् तत्र अलङ्करोतीति अलङ्कारः। अथवा अलङ्क्रियते अनेन इति करण व्युत्पत्या वा वक्तुं शक्यते। शब्दालङ्काराः उपलक्ष्यन्ते अनेन अलंकारशब्देन।

वेदादिशास्त्राणि शब्दप्रधानानि इति वेदकालादारभ्य शब्दालङ्काराः परिदृश्यन्ते। मूलतः शब्दालङ्काराणां व्रेद एव उद्वेजकः यतः घन जटादि पाठानां दर्शनेन काव्येषु अपि यदि एवं भव्रेत् कथं भवेदिति ऊहया रचिताः स्युः शब्दालङ्काराः यतः एकाक्षरादिषु, घनपाठसदृशो भवति।

आलङ्कारिकेषु प्राचीनतमः भरतः स्वनाट्यशास्त्रे केषाञ्चन शब्दलङ्काराणां लक्षणानि कृतवानिति भरतः एव प्रथमलक्षण कर्ता इति वक्तुं च शक्यते। तेन यमकस्य कथानावसरे "शब्दाभासस्तु यमकम्" २६-६२ इति उवाच।

ततः अलंङ्कारप्रस्थानस्य मूलकर्ता भामहः स्व भामहालङ्कारे अनुप्रास, यमक, नामकशब्दालङ्कारान् निर्दिदेश। तथा दण्डीस्वकाव्यादर्शे अनुप्रासायमकादिशब्दालङ्काराणां भेदप्रभेदम् अलिक्षयिषत्।

उद्भटः स्व ग्रन्थे चत्वारः अलङ्काराः उपवर्णिताः। परं एतैः आचार्यैः न कुत्रऽपि शब्दालङ्कारणां पृथक् निर्देशनकृतम्।

वामनः स्व काव्यालङ्कारे चतुर्थाधिकारणस्य प्रथमाध्याये शब्दालङ्काराणां विवेचनं कृतम्। रुद्रटः स्व काव्यालङ्कारे

शब्दालङ्काराणां, बन्धानां च विस्तृतं विवरणं द्वितीयाध्यायादारभ्य पञ्चमाध्यायपर्यन्तं कृतवान्। भोजः सरस्वतीकण्ठाभरणेऽपि शब्दालङ्काराणां भेदाश्च उपवर्णिवान्।

एवमेव मम्मट, आनन्दवर्धनादयोऽपि शब्दालङ्कारणां रसोपकारकत्वं न अङ्गीकुर्वन्ति। परं शब्दालङ्काराः न निर्धारिता, यतः आलङ्कारिकेषु नास्ति ऐकमत्यं अस्मिन् विषये।

केचन अनुप्रास, यमक, पुनरुक्तिवदाभासाः चित्रं शब्दालङ्कारा इति वदन्ति।

अन्ततः शब्दालङ्काराः षड् इति केचन । अनुप्रासः, यमक, पुनरुक्तिवदाभासाः, श्लेषः, वक्रोक्तिः चित्रमिति अङ्गीकुर्वन्ति।

परं श्लेषस्य उभयालङ्कारत्वं सर्वसम्मतं भवति। परं केचन अर्थालङ्कारत्वमात्रमङ्गीकुर्वन्ति। परिणामतः उभयत्वमेव वरम्।

चित्रबन्धरामायणकाव्येऽपि शब्दालङ्काराः, अर्थालङ्कारश्च उपवर्णिताः इति शब्दार्थोभयकाव्यम् भवति।

साहित्यक्षेत्र प्रस्थानानि -

साहित्यक्षेत्रे नवप्रस्थानानि सन्ति। परिपूर्णविकासं न सर्वाणि अविन्दन्। तेषु षट्प्रस्थानानि सर्वैरालंकारिकैः अङ्गीक्रियन्ते। यतः प्रवर्तकानुयायिनश्च बहवः अभूवन्निति।

तत्र साहित्य प्रस्थानानि

१- ध्वनिप्रस्थानम्- अस्य प्रस्थानस्य प्रवर्तकः आनन्दवर्धनाचार्याः। ते स्व ध्वन्यालोक ग्रन्थे विपक्षखण्डनपूर्वकं स्व अभिष्टविषयं दृष्टान्तपुरस्सरं प्रतिपादितवन्तः आसन्। ध्वनिः काव्यस्य आत्मा इत्यङ्गीकरोति। रसध्वनेः साहित्यशास्त्रे अत्युत्कृष्टत्वं च वक्ति। अपि च रस असलक्ष्यक्रम ध्वनेर्विषयः अनन्तश्च भवति इति एतेषां आशयः। ध्वनि भेदाः यद्यपि अनन्ताः तताऽपि स्थूलरूपेण एक पंचाशत् भेदाः भवन्ति इति वदति।

तत्पश्चात् आलङ्काराणां पृथकत्वमङ्गीकृर्वन्ति । परं ध्वनेः काव्यात्मत्वं विजिज्ञापयिषन्ति। अनन्तकालीनेषु महिमभट्टात् अन्यः

न कश्चित् अस्ति विमतिः। ततः अभिनवगुप्तपादाः लोचनग्रन्थे स्वध्वनिसिद्धान्तं, परमतखण्डनं च कुर्वन्ति इति अकुण्ठतः सिद्धान्तोऽयं विस्तृतमिति सर्वैः अङ्गीक्रियते।

गुणप्रस्थानम्- दण्डिरेव अस्य प्रस्थानस्यास्य उत्थापकः। अयं स्वकाव्यादर्शे गुणानां काव्यत्मत्वमङ्गीकरोति। सर्वे आलङ्कारिकाः गुणानां उपस्थितिमङ्गीकुर्वन्ति, न तथा काव्यात्मत्वेन। रसधर्मोगुणाः इति रसधर्मत्वेन।

रीतिप्रस्थानम्- अस्य उद्बोधकः वामनः स्वकाव्यालङ्कारसूत्रवृत्तौ रीतिरात्माकव्यस्य इति काव्यात्मतां अङ्गीकरोति, पदसङ्घटना रीतिरिति रीति लक्षणम्। ततः अलङ्कारिकास्सर्वे पदसंघटनात्वेन अङ्गीकृतम् किन्तु न तथा काव्यात्मत्वेन।

वक्रोक्तिप्रस्थानम्- वक्रोक्तिप्रस्तावकः कुन्तकः स्ववक्रोक्तिजीविते वक्रोक्त्यलङ्कार एव काव्यात्मेति प्रतिपादयति। सर्वेभ्यः वक्रोक्तिः अत्यन्तचमत्कारत्वं काव्यात्मकत्वं च विजिज्ञापयिषति।

औचित्यम् :- औचित्यप्रस्तावकः क्षेमेन्द्रः स्व औचित्यविचार नामक ग्रन्थे औचित्यस्य काव्यत्मतां प्रत्यपादयत्।

चित्रबन्धरामायणस्य अलङ्कारप्रस्थानान्तगतत्वम्-

अस्मिन् काव्ये प्राधान्येन उपमा, उत्प्रेक्षा, अर्थान्तरन्यासादि अर्थालङ्काराणां, यमक, अनुप्रासादि शब्दालङ्काराणां सर्वतोभद्र, मुराजादि बन्धानां वर्णनं कृतम्।

कुत्रचित् ध्वनीनां, रसानां च स्थानं प्रकल्पितम्। तथाऽपि, प्रामुख्यं नास्तीति रसकाव्यं नाम उत्तम काव्यं भवतुं नार्हति।

प्राधान्येन व्यवदेशाः भवन्ति इति शब्दालङ्काराः प्रधानाः इति ततः अर्थालङ्काराः उपवर्णिता इति प्राणभूतव्यंङ्ग्यकाव्यस्य उत्तमकाव्यस्य लक्ष्यं भवितुं नार्हतीति। अधमकाव्यस्याऽपि काव्यत्वं महाकविसम्प्रदायेषु परिदृश्यते इति महाकाव्यत्वमस्ति एवं अलङ्कारप्रस्थानेऽपि अन्तर्भावमिति दिक्।

❖❖❖

अथ

श्रीवेङ्कटेश्वरविरचितम्

।। चित्रबन्धरामायणम् ।।

श्रीयज्ञनारायणभट्टकृतबालप्रबोधाख्यव्याख्योपेतम्

प्रथमः सर्गः

(श्रीगणेशाय नमः)

लक्ष्मीकटाक्षा मयि ते प्रसरन्तु[1] समन्ततः ।
येषां[2] महिम्ना जगतामीश्वरोऽभूज्जनार्दनः ।।१।।

बालप्रबोधाख्यव्याख्या

पूर्तये सम्पदां चारुकीर्तये दलितार्तये[3] ।
दक्षिणामूर्तये नित्यं नमोऽस्तु शिवमूर्तये ।।१।।
विहताक्षरणद्यूतमन्याधूतं विभूतये ।
सम्पद्धूतं महद्भूतं[4] रामदूतं नमाम्यहम् ।।२।।
स्वपुत्ररचितं चित्रबन्धरामायणाह्वयम् ।
व्याकरोति महाकाव्यं यज्ञनारायणः सुधीः ।।३।।
अवस्थानेऽपि जिह्वाग्रे शब्दालङ्कारशास्त्रयोः ।
बुधानां सुखबोधार्थमर्थमात्रं विलिख्यते ।।४।।

अत्र वेङ्कटेश्वरनामा महाकविः स्वप्नप्रसन्नभ्रमराम्बिकावरप्रसादलब्धसहजसारस्वतः चित्रबन्धरामायणाख्यं काव्यं व्याचिकीर्षुः 'काव्यं काव्यविषयतां च पश्यन् चिकीर्षितस्य काव्यस्य निर्विघ्नपरिसमाप्त्यर्थं प्रचयगमनाय च स्वेष्टदेवताप्रार्थनारूपं मङ्गलमादावाचरति ।

लक्ष्मीति। ते वक्ष्यमाणमहिमसम्पन्ना लक्ष्मीकटाक्षाः मयि समन्ततः प्रसरन्तु। तेषां सामर्थ्यमेव प्रकटयति। येषामिति। येषां लक्ष्मीकटाक्षाणां महिम्ना जनार्दनोऽपि जगतामीश्वरोऽभूत् किं पूनर्ब्रह्मेन्द्रादय इति भावः। इदं काव्यं वेङ्कटेशकविना काव्यादिश्लोके सर्गान्तश्लोकेषु च लक्ष्मीपदाङ्कितं कृतमिति बोध्यम्॥१।

शारदा शारदाकाशनीरदाकारशालिनी ।
श्रितस्य रसनारङ्गे लास्यलीलाः क्रियात्सदा ।।२।।

(निरोष्ठ्यम्)

शारदेति। शरत्कालसम्बन्धी शारदः स चासावकाशश्च तस्मिन् यो नीरदो मेघः तस्याकारेण शालितुं शोभितुं शीलमस्यास्तीति शालिनी शरत्कालमेघपाण्डुरेत्यर्थः। तादृशी शरदा। श्रितस्य ममेति शेषः। रसना जिह्वा सैव रङ्गस्थलं तस्मिन् सदा लास्यलीला नृत्तविशेषलीलाः क्रियात् करोत्वित्यर्थः। करोतेराशीर्लिङ्॥२॥

नाटकीकृतषट्[१]शास्त्रं स्तोत्ररत्नाकराकरम् ।
चूडामणिकृतं वन्दे तातं[२] यज्ञेश्वराह्वयम् ।।३।।

इष्टदेवताप्रार्थनं कृत्वा 'यस्य देवे पराभक्तिरिति न्यायमनुवृत्य पितरं नमस्करोति- नाटकीकृतेति। अनाटकानि नाटकानि सम्पद्यमानानि कृतानि नाटकीकृतानि षट्शास्त्राणि येन सः तथोक्तः तम्। अपूर्वचन्द्रोदयशब्दोदयन्यायविजयादिसकलशास्त्र-प्रमेयानुसारिनाटककर्तारमित्यर्थः स्तोत्ररत्नाकरो नाम सकलदेवतास्तुतिपरः यज्ञनारायणभट्टकृतः कृतिविशेषः तस्याकरः स्थानं तत्कर्तारमित्यर्थः। चूडामणिर्नाम चिन्तामणिखण्डनपरो ग्रन्थविशेषः शास्त्रचूडामणिरित्यर्थः। तं करोतीति चूडामणिकृत् तम्। इदमुपलक्षणं विवरणो[३]ज्जीवनादिमहाग्रन्थकर्तारमपि बोध्यम्। तादृशं यज्ञेश्वराह्वयम् तातं पितरं वन्दे॥३॥

वेङ्कटेशेन कविना चरकूरिकुलेन्दुना ।
रामायणं कविप्रीत्यै चित्रबन्धैर्निबध्यते ।।४।।

इदानीं स्वचिकीर्षितं प्रतिजानीते-वेङ्कटेशेनेति। चरकूरिकुलस्येन्दुः श्रेष्ठः, तेन वेङ्कटेशेन वेङ्कटेश्वरनामधेयेन कविना, कविप्रीत्यै कविसन्तोषाय। चित्राश्च बन्धाश्च ते चित्रबन्धाः *मुरजबन्धसर्वतोभद्रबन्धादि* नानाविधबन्धा इत्यर्थः। इदमन्येषां शब्दचित्राणामप्युपलक्षणं तैर्निबध्यते क्रियते। बन्धः कर्मणि लट् ॥४॥

साकेतसंज्ञानगरी नगरीति गृहोज्ज्वला ।
इहास्ति भूरिवरणावरणा धरणीतले ॥५॥

(सन्दष्टयमकम्)

कथामुपक्रमते - साकेतेति। इह धरणीतले नगानां रीतिरिव रीतिर्येषां ते नगरीतयः पर्वतसमा इत्यर्थः। ते च ते गृहाश्च तैरुज्ज्वला, भूरि अधिकं वरणावरणं प्राकारावरणम् 'प्राकारो वरणः साल" इत्यभरः। तद्यस्या सा तथोक्ता अयोध्यानामेत्यर्थः। नगरी अस्ति। सन्दष्टयमकम् ॥५॥

यत्र भ्रमन्त्यः संरेजुर्दारुयन्त्रे नृपाङ्गणे ।
मेरुप्रदक्षिणरता गणिकास्तारका इव ॥६॥

षड्भिः श्लोकैरयोध्यामेव वर्णयति-यत्रेति। यत्र अयोध्यायां नृपाणां राज्ञाम् अङ्गणे गृहाङ्गणे दारूणां यन्त्रे दारुयन्त्रे तन्तुनिर्माणयन्त्रवत् भ्रमणपरे यन्त्रविशेष इत्यर्थः। तत्र भ्रमन्त्यः गणिकाः मेरोः प्रदक्षिणं तत्र रताः निरतास्तारका इव रेजुः मेरुदृष्टान्तेन दारुयन्त्राणामतिसौन्दर्यं व्यज्यते ॥६॥

चलन्त्यो वारकामिन्यो विलासैर्यत्र कामुकान् ।
मोहयन्तीव साकारा माया इव मनोभुवः ॥६॥

चलन्त्य इति। यत्र अयोध्यायां चलन्त्यो वारकामिन्यः वारकान्ताः साकाराः आकारसहिताः मनोभुवो मन्मथस्य मांया इव विलासैः श्रृङ्गारचेष्टाभिः कामुकान् मोहयन्ति स्म। व्यामोहितवत्यः ॥७॥

यस्यां सौधशिरःकुम्भाः शातकुम्भमया दधुः ।
मग्ना हीरप्रभापूरे ब्रह्माण्डश्रियमम्भसि ॥८॥

यस्यामिति। यस्यामयोध्यायां शातकुम्भमयाः स्वर्णविकाराः हीरप्रभापूरे वज्रकान्तिसमूहे मग्नाः सौधानां शिरांसि तेषु कुम्भाः कलशाः ऐश्वर्यमहिमप्रकटनार्थं निहिता इत्यर्थः। अम्भसि जले वर्तमानं यद्ब्रह्माण्डं तस्य श्रियं दधुः। तद्वद्बभुरित्यर्थः। ब्रह्माण्डभाण्डस्य जलान्तरावस्थानम् "आप एव ससर्जादौ" इत्यादिपुराणवचनैर्बोध्यम्। निदर्शनालङ्कारः ॥८॥

परिखालक्षितो यस्याः प्रतिबिम्बो महावृतेः ।

अभूत् पातालनगरी प्राकाराकारशङ्कितः ॥९॥

(परिखेति।) यस्या अयोध्याया महावृतेः महाप्राकारस्य प्रतिबिम्बपरे नगरसंरक्षणार्थमभितो निर्मितजलखाते लक्षितः सन् पातालनगरी भोगवती तस्याकार इति शङ्कितोऽभूत् ॥९॥

प्रासादशिखरालोलपताकातर्जनीमिषात् ।

अतर्जयन् दिवो लक्ष्मीं यस्या मन्दिरसम्पदः[1] ॥१०॥

प्रासादेति। यस्यामयोध्यायां मन्दिरसम्पदः गृहलक्ष्म्यः कर्त्र्यः प्रासादानां शिखराणि तेषु आलोलाश्चञ्चलाः पताका एव तर्जन्यः। आलोलाश्च ताः पताकाः तर्जन्यश्च तासां मिषात् व्याजात् दिवः स्वर्गस्य लक्ष्मीं शोभामतर्जयन् त्वं नास्माकं सदृशीति तर्जितवत्य इवेत्यर्थः। अपह्नवालङ्कारः ॥१०॥

संरक्षितायां यत्रासन् रघुराजभुजाबलैः ॥

दुर्गरक्षाविधानानि मण्डनायैव केवलम् ॥११॥

संरक्षितायामिति। रघुराजानां हरिश्चन्द्रादीनां भुजबलैः भुजपराक्रमैः रक्षितायां पालितायां यत्रायोध्यायां दुर्गस्य रक्षा दुर्गरक्षा सा विधीयते एभिरिति दुर्गरक्षाविधानानि लोहयन्त्रादीनि केवलं मण्डनायैव अलङ्कारायैवासन्। अत्र रघुराजभुजपराक्रमस्य सहायान्तरानपेक्षत्वं व्यज्यते ॥११॥

१- धूपानगर, 'क'

बभूव सा पुरी साधु भूभुजा रञ्जिताजिना ।
लक्ष्यमाणनटत्केतुभूभुजा रञ्जिताजिना ।।१२।।

आजिना लक्ष्यमाणनटत्केतुभूभुजा। अरम् । जिताजिना

बभूवेति। (भूवं[१] भुनक्तीति भूभुक्) भूपः। भुजाः बाहवः। केतव एव भुवो बाहवः यदि वा) भूभुजाः। नटन्तश्च ते केतुभूभुजाश्च लक्ष्यमाणाः दृश्यमानाः नटत्केतुभूभुजाः यस्यां सा तथोक्ता सा पुरी अयोध्या। जिता आजिर्युद्धं येन सः। जिताजिरनेन अजस्यापत्यं पुमानाजिः। अत इनि ठनाविति[२] इनि प्रत्ययः, तेन भूभुजा भूपालेन दशरथेनेत्यर्थः। अरम् अलं रलयोरभेदः। साधु यथा तथा रञ्जिता पालिता बभूव। अत्र श्लोके केतूनां नटद्भूभुजत्वरूपेण, [३]भूमिरात्मनो दशरथसमो वल्लभो नास्तीति सन्तोषेण सहस्ताभिनयं नटतीवेति ध्वन्यते इत्यलङ्कारेणालङ्कारध्वनिः ।।१२।।

नाना नादेन दूनाने दीने दीने दिनेदिने ।
दानिना दानिना नोदं ददाने दिननीनिना ।।१३।।
नाना ।नादेन ।दूनाने ।दीने ।दीने दिनेदिने ।
दानिना ।दानिना ।नोदम् ।दादाने ।दिननीनिना ।।

नानेति। दिनेदिने प्रतिदिनं नाना (नादेन बहुविधक्रोशनेन) दूनाने दूनस्तप्तः 'अनः माणो यस्य' स तथोक्तः तस्मिन्। दीने दीने कृपणे कृपणे प्रतिकृपणमित्यर्थः। दानिना दानवता सकलार्थिने वाञ्छितार्थं ददा(ने) नेत्यर्थः। विवक्षातः कारकाणि भवन्तीति न्यायेन न चतुर्थी। नोदं तापं ददाने शत्राविवित्यर्थः। दानिना खण्डनवता शत्रुसंहर्त्रा इत्यर्थः। दोऽवखण्डन इत्यास्माल्युडन्तादिनिप्रत्ययः। दिननीनिना दिनं नयतीति दिननीः दिननाथः सूर्य इत्यर्थः। तेन इनिना (स्वाभिमता) सूर्यकुलोत्पन्नेनेत्यर्थः। तादृशेन अजिना रञ्जिता बभूवेति पूर्वेणान्वयः। द्व्यक्षरी ।।१३।।

१- भुवः, 'क'
२- अष्टाध्यायी, ५/२/११४
३- न भूमि, 'क'

यत्खड्गः शत्रुकुम्भीन्द्रकुम्भपाटनलीलया ।
लग्नमुक्ताफलच्छेदो जातदंष्ट्र इवाबभौ ॥१४॥

श्लोकद्वयेन दशरथस्य प्रतापं वर्णयति -

यत्खड्गेत्यादिने (ति) यस्य दशरथस्य खड्गः यत्खड्गः शत्रूणां कुम्भीन्द्रा गजेन्द्रास्तेषां कुम्भयोः पाटनं विदारणं तदेव लीलया हेतुना लग्नाः मुक्ताफलच्छेदाः गजकुम्भस्थमौक्तिकशकलानि यस्य सः तथोक्तः सन् जातदंष्ट्रः उत्पन्नदंष्ट्राङ्कुर इव आबभौ रराज। भातेर्लिट्। अत्र खड्गधारालग्नमौक्तिकशकलानां दंष्ट्रात्मनोत्प्रेक्षणात् उत्प्रेक्षालङ्कारः ॥१४॥

दुःसहेन रविर्यस्य प्रतापतपनोष्मणा ।
प्रतप्तः पश्चिमाम्भोधौ नूनमद्यापि मज्यति ॥१५॥

दुःसहेनेति। यस्य दशरथस्य दुःसहेन दुःखेन सोढुं शक्येन प्रतापतपन एव तपनः तस्य ऊष्मणा उष्णेन प्रतप्तः प्रतापितः सन् अद्यापि इदानीमपि पश्चिमाम्भोधौ पश्चिमसमुद्रे मज्जति मग्नो भवति नूनम्। अनेन दशरथप्रतापसूर्यस्य प्रसिद्धसूर्यादपि अतिशयो व्यज्यते। कूटस्थस्य स्ववंश्यात्तिरस्कारो भूषणमेव न तु दूषणमिति भावः ॥१५॥

आचकांक्षे स सन्तानं परलोकप्रसाधनम् ।
पूर्वं कलशवाराशेर्मन्थनादिव वासवः ॥१६॥

आचकांक्ष इति । स दशरथः कलशवाराशेः क्षीरब्धेः मन्थनात् लोडनात् पूर्वं वासव इव महेन्द्र इव परलोकस्य स्वर्गस्य साधनम् उत्कष्टकारणम् अन्यत्र परलोकस्य प्रसाधनम् अलङ्कारभूतं सन्तानमपत्यं कल्पतरुञ्च, 'सन्तानः कल्पवृक्षश्चे'त्यमरः। आचकांक्षे कांक्षितवान्। श्लेषोद्दीपितोपमालङ्कारः। सन्तानस्य परलोकसाधनत्त्वेनापुत्रस्य लोको नास्तीत्यादिश्रुतिरेव तत्र प्रमाणमिति भावः ॥१६॥

स शान्ता[illegible]वं [illegible]ुमा[illegible]ु [illegible]ूजयन्मुनिम् ।
क्[illegible]न्तुं [illegible] [illegible]ुं स[illegible]न्तु प्रचक्रमे ॥२७॥

स इति। स दशरथः ततोऽनन्तरम् आगन्तुं आगतं मन्त्रिभिराकारितमित्यर्थः। शान्तायाः रोमपादकनामकराजकन्यायाः नवं कन्तुमभिनव मन्मथकल्पं मुनिमृष्यश्रृङ्गं पूजयन् सन् कुलतन्तुं सन्तानं गन्तुं प्राप्तुं सप्ततन्तुं यागं प्रचक्रमे प्रकान्तवान्। क्रमेः कर्तरि लिट्।।१७।।

ददद‍ादं दाददादी लीलालोलालिलालिलूः ।
नानानेनाः ननानेन ययुयायी ययोऽययः ।।१८।।

ददत् । आदम् । दाददादी । लीलालोला । (अ) लिलालिलूः ।
नानानेनाः । नन । अनेन । ययुयायी । ययः । अययः ।।
(चतुरक्षरम्)

ननु कोऽयं तन्तुरनेन प्रकान्त इत्याशङ्क्याश्वमेध इत्याह -

ददर्दिति। अनेन दशरथेन आदमन्नं ददत् ददानः अन्नसमृद्धिमानित्यर्थः। दाददादी दादं दक्षिणादानं ददाति यच्छतीति दाददादी परिपूर्णदक्षिण इत्यर्थः। लीलालोलालिलालिलूः लीला व्यापारस्तस्यां लोलाः लम्पटाः ते च ते अरयश्च। रलयोरभेदः। लीलालोलारयः। तान् लालयन्ति लीलालोलालिलालिनः शत्रुपक्षपातिन इत्यर्थः। तान् लुनाति छिनत्तीति लीलालोलालिलालिलूः। नानानेनाः नानाविधानि अनेनांसि सुकृतानि यस्मिन् सः नानानेनाः बहुपुण्यसाधक इत्यर्थः। अययः अयः शुभावहो विधिः तं यातीति अययः अनेक शुभसम्पन्न इत्यर्थः। आतोऽनुपसर्गे कः[१] इति क प्रत्ययः एतादृशः ययुयायी अश्वमेध इत्यर्थः। (न) न यय इति। न प्राप्त इति नाकं तु प्राप्त एवेत्यर्थः। यातेः कर्मणि लिट्। चतुरक्षरी ।।१८।।

प्रापुर्हरिं सुरा रक्षः सभयाखण्डलालसाः ।
यथाद्रयोऽब्धिं यमिनां सभयाखण्डलालसाः ।।१९।।

रक्षः सभयाखण्डलालसाः । सभया । खण्डलालसाः ।
(पादयमकम्)

१- अष्टाध्यायी ३/२/३

तदानीमेव देवाः रावणपीडिताः विष्णुं प्रार्थयितुमागता इत्याह -

प्रापुरिति। रक्षः सभयाखण्डलालसाः रक्षो रावणः तस्मात्सभयः भयेन सहितः स चासावाखण्डलश्च तेनालसाः खिन्नाः। महेन्द्रभयं दृष्ट्वा स्वयमपि खिन्ना इत्यर्थः। सुरा देवा यमिनां ऋषीणां सभयाखण्डलालसाः खण्डाद् वज्रायुधकृतखण्डनात्। लालसाः चञ्चलाः अद्रयः पर्वताः अब्धिं यथा समुद्रमिव प्रापुः प्राप्ताः। आपेर्लिट्। उपमालङ्कारः। पादयमकम् ।।१६।।

उदधेरवधेः श्रीशः सविधे बहुधेरितैः
विविधेऽनवधेयात्मा बुबुधे विबुधेडितैः ।।२०।।

उदधेरिति। अनवधेयः अपरिच्छेद्यः आत्मा स्वरूपं यस्य सः अनवधेयात्मा श्रीशः लक्ष्मीकान्तो विष्णुर्निद्रायमाणमिति भावः। उदधेः समुद्रस्य अवधेर्मर्यादायाः विविधे नानाविधे सविधे निकटे बहुधा बहुप्रकारेण ईरितैरुक्तैः विबुधानामीडितैः स्तोत्रैर्बुबुधे बुद्धवान्। बुधेः कर्तरि लिट् ।।२०।।

शशङ्के पुण्डरीकाक्षः फुल्ललोचनमण्डलः ।
चन्द्रभानुसुतापूरः पुण्डरीकाभिमण्डितः ।।२१।।

एकेन श्लोकेन प्रबुद्धं विष्णुं वर्णयति -

शशङ्के इति। पुण्डरीकाक्षो विष्णुः फुल्ले प्रबोधविकसिते फुल्लविकसन इत्यस्माद्धातोः पचाद्यच् लोचनमण्डले यस्य स तथोक्तः सन् पुण्डरीकाभ्यां सिताम्भोजाभ्याम् अभिमण्डितः अलङ्कृतः चन्द्रभानुसुतायाः यमुनायाः पूरः प्रवाहः शशङ्के। यमुनाप्रवाह इति शङ्कित इत्यर्थः। शङ्कतेः कर्मणि लिट् ।।२९।।

निर्जरार्थनयाथाङ्गीचक्रे दशरथाज्जनिः ।
शार्ङ्गिणा श्रितरक्षायै रचयन्ति न किं घनाः ।।२२।।

(निरोष्ठ्यम्)

निर्जरेति। अथ अनन्तरं शार्ङ्गिणा नारायणेन ण्यासश्रन्थो युजि'ति युच्प्रत्यः। दशरथात् जनिः उत्पत्तिः अङ्गीचक्रे अङ्गीकृता। करोतेः कर्मणि लिट्। ननु भगवता कुत्सितं मनुष्यजन्म किमर्थमङ्गीकृतमित्याशयार्थान्तरन्यासेन परिहरति। तथा हीति। घना महान्तः श्रितरक्षायै आश्रितसंरक्षणाय किं न रचयन्ति। सर्वं कुर्वन्त्येव कुत्सितं कर्मापि कुर्वन्त्येवेति यावत् अर्थान्तरन्यासोऽलङ्कारः। निरोष्ठ्यम्॥२२॥

पत्नीभ्यः पायसीं पात्रीं भूप सन्ध्यानलोदिताम्।
ददौ ततश्चकोरीभ्यः चन्द्रिकामिव चन्द्रमाः॥२३॥

पत्नीभ्य इति। ततः अनन्तरं भूपो दशरथः सन्ध्यावत् अनलः सन्ध्यानलः अत्रानलशब्देन अश्वमेधान्तानुष्ठी[२](?) यमानपुत्रेष्टिहोमानलो विवक्षितः तस्मादुदिताम्। अन्यत्र अनल इव सन्ध्यानलः तस्मादुदितां पायसीं पायसमयीं पात्रीं पायसपात्रमित्यर्थः। पत्नीभ्यः कौसल्यादिभ्यः चन्द्रमाः चकोरीभ्यः चन्द्रिकामिव ददौ॥२३॥

भूपस्वातीघनादिष्टं भागशः पायसामृतम्।
दयिताः शुक्तयः प्राश्य गर्भान् लोकादृतान् दधुः॥२४॥

भूप इति॥ दयिताः कौशल्यादयः कर्त्र्यः भूप एव स्वातीघनः स्वाती महानक्षत्रोदितमेघः तेन आदिष्टं दत्तं पायसमेवामृतं पायसामृतं भागशः स्वस्वभागप्रकारेण भक्षयित्वा लोकादृतान् गर्भान् दधुः। कौसल्यादिगर्भाणां विष्णुमयत्वे शुक्तिगर्भाणां मौक्तिकमयत्वेन च लोकादृतत्वं बोध्यम्। [३]पायस विभागस्तु श्रीरामायणोक्तरीत्या द्रष्टव्यः॥२४॥

पुंरत्नं निजगर्भेषु धृत्वा भुवननायकम्।
भूपतेरभवन् पत्नयो रत्नगर्भाधिकप्रिया॥२५॥

१- अष्टाध्यायी ३/३/१०७
२- ह्नि, 'क'

पुंरत्नेति। पत्नयः कौसल्यादयः निजगर्भेषु भुवननायकं सकललोकाधिपम् अन्यत्र लोकोत्तरनरं पुंरत्नं पुरुषोत्तमं विष्णुं पुरुषरत्नं च। वज्रस्य (वज्रमणे) पुरुषरत्नत्वमितरेषां नास्ति रत्नत्वञ्च। रत्नपरीक्षकत्वसम्प्रदायमिति बोध्यम्। धृत्वा दशभूपतेर्दशरथस्य रत्नानि गर्भे यस्याः सा रत्नगर्भा भूमिः तत अधिकप्रिया अधिकप्रीत्यास्पदा अभवन् आसन्। भातेर्लङ्। कौसल्यादिषु लोकोत्तरनायकपुरुषरत्नगर्भत्वेन रत्नगर्भातोऽपि भूपतेरधिकप्रीतिर्जायत इति भावः ॥२५॥

भक्षयन्तिस्म तास्तिस्रः सार्वभौमस्य वल्लभाः ।
गर्भिण्यश्चिरसापत्न्यबद्धद्वेषा इवावनीम् ॥२६॥

अथ द्वाभ्यां श्लोकाभ्यां कौसल्यादीनां गर्भचिह्नानि वर्णयति-

भक्षयन्तीत्यादिना। गर्भिण्यः प्रशस्तगर्भसम्पन्नाः सर्वभूमेरधिपतिः सार्वभौमो दशरथः। अनुशतिकादित्वादुभयपदवृद्धिः। तस्य वल्लभाः प्रियाः तास्तिस्रः कौसल्यादयः चिरं सापत्न्येन बद्धद्वेषा इव बद्धेर्ष्या इव अवनीं भूमिं भक्षयन्ति स्म अत्र गर्भिणीनां स्वाभाविकमृद्भक्षणस्य सापत्न्यद्वेषहेतुकत्वेनोत्प्रेक्षणादुत्प्रेक्षालङ्कारः ॥२६॥

विश्वम्भरं वहन्त्यस्ताः गर्भेषु पुरुषोत्तमम् ।
तद्भारातिशयेनेव बभूवुः कृशविग्रहाः ॥२७॥

विश्वम्भरमिति। ताः कौसल्यादयः गर्भेषु विश्वम्भरं विश्वं बिभ्रतं हेतुगर्भविशेषणं पुरुषोत्तमं वहन्त्यः सत्यः तद्भारातिशयेनेव विश्वम्भरणजनितभाराधिक्येनेव कृशविग्रहाः कृशशरीराः बभूवुः। भवतेर्लिट्। अत्रापि पूर्वोक्त एवालङ्कारः ॥२७॥

काले सुषुविरे तिस्रः परतापहरान् सुतान् ।
अर्कस्येव पयोबिन्दून् पक्वगर्भामरीचयः ॥२८॥

काले इति। तिस्रः कौसल्यादयः पक्वगर्भाः सत्यः काले द्वादशमासे चैत्रे नावमिके तिथावित्यादिश्रीरामायणवचनात्। न च दशमे मासि सुषुव इति श्रुतिविरोधः। तस्याः पुरुषमात्रप्रसव-

विषयत्वेन उत्तमपुरुषप्रसवविषयत्वाभावात्। न च दशमे मासि कौशल्या सुषुवे पुत्रमद्वयमित्यध्यात्मरामायणवचनविरोधः। तस्य गर्भाभिव्यक्त्यनन्तरं दशमासेत्यत्र तात्पर्यादित्यलं विस्तरेण। सर्वतापहरान् रामादीनां लोककण्टकरावणादिसंहारार्थमुदयादिति भावः। सुतान् पुत्रान् अर्कस्य मरीचयः पक्वगर्भाः सत्यः सर्वतापहरान् पयोबिन्दूनिव सुषुविरे प्रसूतवत्यः। सूतेः कर्तरि लिट्। धर्मान्तप्रयोबिन्दूनामतिशैत्यात्तापहरत्वमिति भावः। सूर्यकिरणानां वर्षकत्त्वं सकलपुराणकविवचनसिद्धमिति बोध्यम्। तथा च कालिदासः गर्भं दधत्यर्कमरीचयोस्मादि'ति। उपमालङ्कारः ॥२८॥

कौसल्यातनयं रामं भरतं कैकयीसुतम् ।
राजा लक्ष्मणशत्रुघ्नौ सौमित्रेयौ व्यवाहरत् ॥२६॥

अथ जातसूतकानन्तरं पुत्राणां व्यवहारनामानि राजा कृतवानित्याह-

कौसल्येति। राजा दशरथः कौसल्यातनयं रामनामानं कैकयीसुतं भरतनामानं सौमित्रेयी सुमित्रातनयौ 'स्त्रीभ्योढगि[१]'ति ढक्प्रत्ययः। लक्ष्मणशत्रुघ्ननामानौ व्युदाहरत् व्यवहृतवान्। हरतेर्लङ् ॥२९॥

अयोध्यायामभूद्रामो रघुवंशे यदा तदा ।
लङ्कायां राक्षसस्त्रीणां विरामो भाग्यसम्पदाम् ॥३०॥

रामावतारकाल एव लङ्कायामनर्थः संसूचित इत्याह -

अयोध्यायामिति। रामः अयोध्यायां रघुवंशे यदाभूत् अवतीर्णवान् तदाकालं लङ्कायां राक्षसस्त्रीणां भाग्यसम्पदां सौभाग्यवैभवानां विरामः अवसानमभूत्। दौर्भाग्यसूचकं दुर्निमित्तमभूदित्यर्थः। वाक्यार्थहेतुकं काव्यलिङ्गालङ्कारः ॥३०॥

१- स्त्रीभ्यो ढक् ४/१/१२०
२- अष्टाध्यायी ३/२/२९

रामादयः कुमारास्ते स्वस्वधात्रीस्तनन्धयाः ।
आनन्देन गुरोः साकमभिवृद्धिं समाययुः ।३१।।

रामादय इति । ते रामादयः कुमाराः स्वस्वधात्रीणां स्वस्वोपमातृणां स्तनन्धयाः स्तन्यपायिनः सन्तः । नासिकस्तनयोर्ध्माधेटो[२] रिति खश्प्रत्ययः । अरुर्द्विषदित्यादिना मुमागमः । गुरोः पितुः आनन्देन साकं सन्तोषेण सह अभिवृद्धिं उपचयं समाययुः प्राप्तवन्तः । सहालङ्कारः । लक्षणं विस्तरभयान्न लिख्यते ।३१।।

मारामरोऽमरामीरो रामारामो रमारमः ।
मुरमारोऽरिरैरोऽरं रामो रेमेऽरिरीरुरुः ।।३२।।
मारामरः । अमरामीरः । रामारामः । रमारमः ।
मुरमारः । अरिरैरः । अरं रामः । रेमे । अरिरीः । उरुः ।।

तत्र राममेकेन श्लोकेन वर्णयति ।

मारेति । मारामरः मारवत् मन्मथवत् अमलः सुन्दरः रलयोरभेदः । अमरामीरः । न मींलयतीत्यमीलः विकास इत्यर्थः । अमराणाममीरः रामारामः रामाणां क्रीडानामारामः स्थानम् आत्माराम इत्यर्थः । रामारमः लक्ष्मीरमणः मुरमारः मुरोनाम कश्चिदसुरः तं मारयतीति मुरमारः । अरिरैरः अरीणं शत्रुणां रायं धनं राति आददातीति अरिरैरः । अतोऽनुपसर्गेकः[१] इति कप्रत्ययः । अरीरेः अरमस्यास्तीत्यरी चक्रम् । तत् रीणाति प्रक्षिपती[२] त्यरिरिः चक्रधर इत्यर्थः । गुरुः सर्वगुणाधिकः रामः अरं रेमे खुरलीविहारादि बाल्योचितक्रीडां कृतवानित्यर्थः । द्व्यक्षरी ।।३२।।

१- क्तारकर्तेरक
२- त्रातीत्यरीरिः ।

अधीते स्मानुजैस्साकमुपनीतो रघूत्तमः ।।
साङ्गमाचार्यविश्वासी निजनिःश्वासभारतीम् ।।३३।।

अधीत इति। रघुषु उत्तमः रघूत्तमः रामः यद्वा रघूणामुत्तम इति पञ्चमीतत्पुरुषो वा। उपनीतः सन् उपनयनं कृतः सन् अनुजै साकमुपनीतैरिति भावः आचार्यविश्वासी सन् साङ्गां व्याकरणादिसहितां निजनिःश्वासभारतीं स्वीयश्वसितायमानसरस्वतीं वेदानित्यर्थः। वेदानां परमात्मनिःश्वासरूपत्वम्। "तस्य महतोभूतस्य निःश्वसित" मित्यादिश्रुतिसिद्धं बोध्यम्। अधीते स्म अधीतवान्। भूते लट्।।३३।।

स गुरोराज्ञया कर्तुं विश्वामित्रमहं तया ।
अन्वगात् सानुजो हन्तुं विश्वामित्रमहन्तया ।।३४।।

विश्वमित्रमहम्। तया । विश्वामित्रम्। अहन्तया।

अथ रामः विश्वामित्रप्रार्थितस्य पितुराज्ञया विश्वामित्रमनुसृतवान् इत्याह - स इति। सः रामः सानुजः सन् गुरोः पितुः अज्ञया विश्वामित्रमहं कौशिकोत्सवं कर्तुं यागसंरक्षणेनेति भावः। तया प्रसिद्ध्या अहन्तया अहङ्कारेण विश्वश्चासौ मित्रश्च विश्वामित्रः तम्। जातावेकवचनम्। सर्वशत्रूनित्यर्थः। हन्तुमन्वगात् अनुसृतवान् तमिति शेषः। इणो गालुङीति गादेशः। पादयमकम्।।३४।।

बलाबलाबलालम्बौ बलौ बिलबिलाबिलाम् ।
वनिं नवावनीनीवीं वनीवननवाविनौ ।।३५।।

बलेति। वनीवननवाविनौ वनीवननं यागभिक्षां वाति प्राप्नोतीति वनीवननवः यागसंरक्षणार्थमागतः कौशिक इत्यर्थः। वनीवननं यागभिक्षेति मीमांसकवचनात्। तम् अवितुं रक्षितुं शीलमनयोरस्तीति वनीवननवाविनौ रामलक्ष्मणौ। बलाबलाबलालम्बौ बलानाम क्षुत्पिपासाद्युपशमनार्थं कौशिकोपदिष्टा विद्या। अतिबलाया अप्युपलक्षणमिदम्। सैवाबला स्त्री मातेति यावत्। तस्याः बलं सामर्थ्यमेव आलम्बौ ययोस्तौ तथोक्तौ सन्तौ। बिलिबिलाबिलां बिलिनः पर्वताः तेषां बिलानि गुहाः तै अविलां भयङ्करामित्यर्थः।

बवयोरभेदन्यायेन वकारोच्चारणम्। नवावनीनीवीम् अवनेर्भूमेर्नीविः न वा च सा अवनीनीविश्च नवावनीनीवी, तां नीवीकल्पामित्यर्थः। (वनिं अरण्यं प्रति[1]) बलौ बलौ चलितवन्तावित्यर्थः। बल सञ्चलन इति धातोः पचाद्यच् चतुरक्षरी ॥३५॥

काकिकाकाककङ्काङ्कां काकुकेकिककेककाम् ।
काकुकैकाकिकोकौकः कौ कौ किङ्कैककाककाम् ॥३६॥

काकिकाः[2] काककङ्काङ्काम्। काकुकेकिककेककाम्।
काकुकैकाकिकोकौकः। कौ। कौ। किं कैककाककाम्॥
(एकाक्षरी)

एकेन श्लोकेन अटवीमेव वर्णयति -

काकिकेति। काकिकाकाककङ्काङ्काम्। काकिकाः काक्यः काकाः पुं-व्यक्तयः कङ्काः पक्षिविशेषः त एव अङ्काः चिह्नानि यस्याः सा तथोक्ता ताम्। काकुकेकिककेककाम्। केकिनां मयूराणां स्वार्थे कन् प्रत्ययः। केककाः केकारवाः, काकवः विस्वराः ताटकाया दुर्निमित्त सूचनार्थमिति भावः। केकिककेकका यस्याः सा काकुकेकिककेकका ताम्। 'केकाशब्दादुदीचामानस्थाने यकपूर्वायाः[3], इति विकल्पाश्रयणादिडभावः। काकुकैकाकिकोकौकः, के जले अकु अकुत्सितं कायन्ति ध्वनन्ति काकुकाः। कैशब्द इत्यस्माद्धातोः क्विवत्प्रत्ययः। एकाकिनः सायंकालादौ स्त्रीव्यक्तिरहिताः ते च ते कोकाश्च, ते एकाकिकोकाश्च काकु कैकाकिकोकाः तेषामोकः स्थानं चक्रवाकनिवासभूतमित्यर्थः। कौ कौ भूमौ भूमौ प्रतिदिशमित्यर्थः। किं कैककाककाम् किं कुत्सितः प्रचण्ड इति यावत्। स चासौ कश्च वायुश्च किं कः। किं शब्दः कुत्सितपरः तेन एककं मुख्यं अकं दुःखं यस्यां सा किंकैककाककाम्। प्रचण्डवायुजनितप्राणिदुःखमित्यर्थः। तादृशीं वनीं प्रतिबलविति। पूर्वेणान्वयः। एकाक्षरी ॥३६॥

१- वनी अरण्यानां प्रति।
२- काकी काका। ककङ्काङ्काम्। 'क'
३- अष्टाध्यायी ७/३/४६

राघवोटङ्किता तत्र शशङ्के चापटङ्कृतिः ।
रक्षो वधागमारम्भः स्फुरदोङ्कारवैखरी ।।३७।।

तत्र वने राघवेण रामेण अट्टङ्किता उद्भासिता चापटङ्कृतिः धनोः ज्या-आस्फालन शब्दः रक्षो वधागमारम्भः रक्षसां भाविवधस्य प्रारम्भः। स्फुरत् ध्वनत् ओंकारवैखरी ओमिति शब्दोच्चारः तत् शशङ्के। रूपकानुप्राणितोत्प्रेक्षालङ्कारः ।।३७।।

तामाकर्ण्याटवीवाट्यां ताटका तोटकोद्धता ।
रटन्ती विकटाटोपं टिटीके निकटं तयोः ।३८।।

तामिति। चापटङ्कृतिम् आकर्ण्य श्रुत्वा अटवीवाट्यां अटवीमार्गे ताटका तोटकेन रोषसंभ्रमवचनेन उद्धता सती 'रोषसंभ्रमवचनं तोटकमि'त्यलङ्कारिकाः। विकट आटोपो यस्मिन् कर्मणि। रटन्ती ध्वनन्ती सती तयोः रामलक्ष्मणयोः निकटं टिटीके प्राप्तवती। टीकतेः कर्तरि लिट्। वृत्यनुप्रासः शब्दालङ्कारः। २८।।

लालोना गगनालोला धूरिता ननतारिधूः ।
स्राविकाननकाविस्रा दारिताननतारिदाः ।।३९।।

लालोना। गगनालोला। धूरिता ननतारिधूः ।।
स्राविकाननकाविस्रा दारिताननतारिदा ।।

(अर्थपादप्रतिलोमम्)

द्वाभ्यां श्लोकाभ्यां ताटकां वर्णयति -

लालेत्यादिना। लालोना लालया जिह्वाजलेन ऊना रहिता राम भयादनार्द्रजिह्वेत्यर्थः। गगनालोला आकाशे चञ्चला धूरिता धुरं भारं श्रिता प्राप्ता सकललोकभारायमाणेत्यर्थः। ननतारिधूः ननताः प्रणताः अवशगाः शत्रव इति यावत्, तेषामलिः समूहः रलयोरभेदः तां धुनोति कम्पयतीति ननतालिधूः शत्रुमण्डलकम्पिनीत्यर्थः। स्रावः अस्यास्तीति स्राविकं लालादिजलयुक्तमित्यर्थः। आननमेव आननकः। स्वार्थे कः। स्रावि च तत् अननकम् च तस्मिन् अविस्रा समन्तादामगन्धिः। 'विस्रं' स्यादामगन्धियदित्यमरः। दारितं व्यात्तम् आननं मुखं यया सा दारितानना तस्या भावः दारिताननता तया अरीन् शत्रून् द्यति खण्डयतीति सा तथोक्ता। मुखव्यादानमात्रेण शत्रु संहारिणीत्यर्थः। अर्धपादप्रतिलोमम् ।।३९।।

साहसानलसामग्री महसापरसामरा ।
रामसारविसामर्थ्या तामसानलसामता ।।४०।।

साहसानलसामग्री । महसा । अपरसामरा ।
रामसारविसामर्थ्या । तामसानलसा । अमता ।।

(मुरजबन्धः)

साहसेति । साहसमेव अनलः अग्निः तस्य सामग्री पुष्कलकारणसम्पत्तिरूपा महसा तेजसा प्रतापेन हेतुना अपरसामरा अपगतः रसः उत्साहः येषां ते अपरसाः अमराः देवा यस्याः सा तथोक्ता रामसारो रामबलं तेन विगतं सामर्थ्यं यस्याः सा यथोक्ता, तामसेषु तमोगुणयुक्तेषु राक्षसेषु अनलसा प्रबला अमता सकललोकविमता एतादृशी ताटका तयोर्निकटं टिटीक इति पूर्वेणान्वयः । मुरजबन्धः । बन्धोद्दारप्रकारस्तु पञ्चतिर्यग्रेखा लिखित्वा चतुसृषु तिर्यग्वीथिषु क्रमेण पादचतुष्टयं लिखेत् । तत्र प्रथमवीथिप्रथमाक्षरद्वितीयवीथिद्वितीयाक्षर-तृतीयवीथितृतीयाक्षर-चतुर्थवीथिचतुर्थपञ्चमाक्षरद्वितीयवीथिद्वितीयाक्षर-तृतीयवीथिषष्टाक्षर द्वितीयवीथिसप्तमाक्षर-प्रथमवीथ्यष्टमाक्षराणां क्रमेणपाठे सति प्रथमपादो भवति । चतुर्थवीथ्याम् अन्त्यपाद प्रथमाक्षरतृतीयवीथिद्वितीयाक्षरतृतीयवीथिद्वितीयाक्षर द्वितीयवीथि तृतीयाक्षर प्रथमवीथि चतुर्थपञ्चमाक्षर द्वितीयवीथि षष्ठाक्षर तृतीयवीथिसप्तमाक्षर-तृतीयचतुर्थवीथ्याष्टमाक्षराणां क्रमेण पाठे सति प्रथमापादो भवति । चतुर्थवीथ्याम् अन्त्यपादप्रथमाक्षरतृतीयवीथि-द्वितीयाक्षर द्वितीयवीथि तृतीयाक्षर-प्रथमवीथिचतुर्थपञ्चमाक्षर-द्वितीयवीथिषष्ठाक्षर तृतीयवीथिसप्तमाक्षर-तृतीयचतुर्थवीथ्यष्टमाक्षराणां क्रमेण पाठे अन्त्यपादो भवति । मुरजाकारश्च भवति । शिष्टं पादद्वयं मुरजमुखयोः पततीति मुरजबन्धसंक्षेपः ।।४०।।

रामसायकवातस्य घातेन शिथिलीकृता ।
सा पपाताम्बरे लोला रक्षोवंशपताकिका ।।४१।।

रामेति। अम्बरे आकाशे लोला अन्यत्र वस्त्रे चञ्चला रक्षोवंशपताकिका राक्षसवंशश्रेष्ठा सा ताटका वेणुदण्डबद्धपताका च गम्यते। रामसायको रामबाणः तस्य वातः वायुः तस्य घातेन अभिघातेन शिथिलीकृता सती निपपात पतितवती। अत्र वेणुदण्डबद्धपताकापातो व्यज्यते इति शब्दशक्तिमूलध्वनिः ॥४१॥

पुष्पवृष्टिः पपातास्मिन् नवा मन्दारवालिनी ।
संजगौ किं यशस्तस्य न वामन्दारवालिनी ॥४२॥

नवा मन्दारवालिनी। न। वा। अमन्दारवा। अलिनी।

पुष्पवृष्टिरिति। नवा नूतना मन्दरात् कल्पतरोः वलने चलतीति मन्दारवालिनी पुष्पवृष्टि अस्मिन् रामे पपात पतितवती तदा अलिनी भृङ्गी अमन्दारवा अधिक रुता सती तस्य रामस्य यशः न संजगौ वा किम्। संजगाविवेत्यर्थः। अत्र काकुरनुसन्धेया वा शब्दोऽत्र इवार्थे वर्तते। उत्पेक्षालङ्कारः ॥४२॥

द्युतिं वह्निरिव प्रातर्मुनिर्मन्देहवैरिणे ।
सोदयायाथ रामाय वितताराऽस्त्रसम्पदम् ॥४३॥

द्युतिमिति। अथ ताटकवधानन्तरं मुनिर्विश्वामित्रः सोदयाय साभ्युदयाय रामाय अस्त्रसम्पदं जृम्भकादिमहास्त्रसमृद्धिं प्रातः उषसि वह्निः मन्देहवैरिणे मन्देहानाम केचन राक्षसाः तेषां वैरी सूर्यः तस्मै द्युतिमिव विततार वितीर्णवान्। अग्नेः सायंकाले सूर्यतेजोग्रहणं पुनः प्रातःकाले तत्प्रत्यर्पणं च। ''अग्निं वावादित्य सायं प्रविशति'' इत्यादि श्रुतिसिद्धमिति भावः। उपामालङ्कारः ॥४३॥

रामपादाम्बुजन्यासैः ततो भुवनपावनैः ।
अपि निन्ये महौन्नत्यं तत्क्षणे वामनाश्रमः ॥४४॥

रामेति। ततः अनन्तरं भुवनपावनैः रामपादाम्बुजन्यासैः रामपादारविन्दप्रक्षेपैः तत्क्षणे प्रक्षेपकाल एव वामनाश्रमोऽपि

महौन्नत्यमत्युन्नतत्वं निन्ये नीतः अत्र वामनाश्रमे ह्रस्वाश्रमः रामपादन्यासैः औन्नत्यं नीत इति शब्दतो विरोधः वामनस्य वामनावतारस्य हरेराश्रमः तैरेवौन्नत्यं प्रसिद्धिं निन्य इत्यर्थतः परिहारः इति विरोधाभासोऽलङ्कारः ।।४४।।

आश्रमं प्राप्य गाधेयस्ततोऽभूत् मखदीक्षितः ।
अश्रमं राघवावेत्य रक्षःसंहारदीक्षितौ ।।४५।।

आश्रममिति। ततः अनन्तरं गाधेयो विश्वामित्रः आश्रमं सिद्धाश्रमं प्राप्य मखे दीक्षितः अभूत्। राघवौ रामलक्ष्मणौ अश्रमं श्रमाभावं चैत्य रक्षसां राक्षसानां संहारे दीक्षितौ बद्धकक्ष्यौ अभूतामिति शेषः ।।४५।।

ताम्यां मण्डलितौ चण्डौ चापदण्डौ हिरण्मयौ ।
चक्राते प्राप्तवीरश्री हेमाताटङ्कविभ्रमम् ।।४६।।

ताभ्यामिति। ताभ्यां रामलक्ष्मणाभ्यां मण्डलितौ मण्डलीकृतौ चण्डौ भयङ्करौ हिरण्मयौ सुवर्णविकारौ चापदण्डौ कोदण्डयष्टी, प्राप्ता आसन्ना सा च सा वीरश्रीश्च तस्याः हेमताटङ्कविभ्रमं सुवर्णकर्णावतंसविशेषविलासं चक्राते कृतवन्तौ। करोतेर्लिट्। निदर्शनालङ्कारः ।।४६।।

निर्जराखेटके दक्षास्ताटकेयादयस्तदा ।
साक्षान्मुनेः सप्ततन्तोरन्तराया इवागमन् ।।४७।।

(निर्जरेति)। तदा तस्मिन् काले निर्जराणामाखेटे मृगयायां संहार इति यावत् दक्षा कुशलाः ताटकेयादयः मारीचादयः मुनेर्विश्वामित्रस्य सप्ततन्तोः क्रतोः साक्षादन्तरायाः प्रत्यक्षविघ्ना इवागमन्। आगतादमेर्लुङ् ।।४७।।

तन्मुक्तरक्तवर्षेण यागभूमिर्न केवलम् ।
कषायितापि रामस्य दृष्टिस्तत्कर्मगोचरा ।।४८।।

तन्मुक्तेति। तैर्मारीचादिभिर्मुक्तं च तद्रक्तवर्षं च तेन

किन्तु तत्कर्मगोचरा तेषां मारीचादीनां कर्म रक्तवर्षादिचेष्टा सैव गोचरादिविषयो यस्याः सा तथोक्ता रामस्य दृष्टिरपि कषायिता अभूदिति शेषः। तेषां दुश्चेष्टां दृष्ट्वा रामस्य नयनमपि रक्तमभूदित्यर्थः ।।४८।।

तन्मण्डलितकोदण्डचण्डमार्तण्डमण्डलात् ।
मन्देहानामतिक्रूरा निर्ययुर्बाणभानवः ।।४९।।

तदिति। तेन रामेण मण्डलितं कुण्डलितं तच्च तत्कोदण्डं च तदेव चण्डमार्तण्डमण्डलं घर्मकालोदितसूर्यमण्डलं, तस्मात् मन्देहानां मतिहीनानां मरीचादीनाम् अन्यत्र मन्देहानामकाराक्षसानामतिक्रूराः अतिभयङ्काराः बाणा एव भानवः किरणाः निर्ययुः निर्याता। यातेर्लिट्। परम्परितरूपकालङ्कारः ।।

रामजीमूतपोतेन शरवृष्टिर्निरन्तरा ।
मुमुचे खेचरेन्द्राणामूर्ध्वमद्भुतदायिनी ।।५०।।

रामेति। राम एव जीमूतपोतः नीलमेघार्भकः तेन कर्त्रा निरन्तरा नीरन्ध्रा खेचरेन्द्राणां देवानाम् अद्भुतदायिनी आश्चर्यकारिणी शरवृष्टिर्बाणवृष्टिर्जलवृष्टिश्च ऊर्ध्वं यथा तथा मुमुचे मुक्ता। मुचेः कर्मणि लिट्। मेघकृतोर्ध्ववर्षस्य कदाचिदप्यननुभवा देवानामप्याश्चर्यमभूदिति भावः ।।५०।।

मरुतामखिलारिघ्नगुरुतादभ्रतारिका ।
कारिताभ्रलताशङ्का सारिता मखिताशया ।।५१।।

(मुरजबन्धः)

एकेन श्लोकेन रामशरवृष्टिं वर्णयति -

मरुतामिति। मरुतां देवानां ये अखिला अरयः शत्रवः राक्षसाः इत्यर्थः तान् हन्तीत्यखिलारिघ्ना तादृशी गुरुता गौरवं यस्याः सा तथोक्ता, 'गौरवे मेरुमन्दरादिति रामायणवचनाद्रामशरवृष्टेरतिगौरवमिति भावः। अदभ्रतारिका अदभ्रमधिकं यथा तथा तरति गच्छतीत्यदभ्रतारिका वेगाद्दूरगामिनीत्यर्थः कारिता अभ्रसम्पादित

अभ्रलतानां गगनसञ्जातलतानां शङ्का यया सा तथोक्ता, मखिताशया मखितायाः यागवत्तायाः आशया इच्छया सारिता प्रवर्तिता, विश्वामित्रो मखीभूयादिति वाञ्छया रामेण प्रसारितेत्यर्थः। एतादृशी शरवृष्टिर्मुमुच इति पूर्वेणान्वयः। मुरजबन्धोऽयम्। बन्धोद्धारप्रकारस्तु प्रागेवो (क्तम्)[1] इति द्रष्टव्यम्॥५१॥

सायके ताटकारातेः सुबाहुरवसायके।
सायकेऽस्याहुतिरभूत् (?)[2] वह्न्यामे रंहसायके॥५२॥

(आद्यन्तयमकम्)

तत्रैकेन बाणेन सुबाहुर्हत इत्याह -

सायके (इति) अयेन शुभावहतिथि (?)[3]ना सहेति सायके; अवसायके शत्रूणामवसानकारिणि, वह्न्याभेऽग्निसदृशि, अस्य रामस्य, सायके आहुतिः प्रथमाहुतिरभूत् रामशराग्निना दग्धोऽभूदित्यर्थः। (किम्भूते सायके रंहसा वेगेन अयने गमनशालिनि इत्यर्थः।) आद्यन्तयमकम्॥५२॥

मारीचो नीचगीस्तस्य नाराचश्वासवायुना।
दूरीचक्रेऽब्धिपातेन सारी चलत्तृणं यथा॥५३॥

मारीच इति। सारी बलवान् नीचगीः निर्वचनः मारीचः तस्य रामस्य नाराचश्वासवायुना बाणश्वासमनेन अस्त्रेण[4](?) वायव्यास्त्रेणेत्यर्थः। अब्धिपातेन हेतुना चलत्तृणः यथा चलिततृणमिव दूरीचक्रे दूरीकृतः॥५३॥

अन्यानभिसमुत्पेतुः सान्द्रा रामशिलीमुखाः।
मन्दारकैरधः पेतुरिन्द्रारामशिलीमुखा॥५४॥

अन्यानिति। सान्द्राः निविडाः रामशिलीमुखाः रामबाणाः अन्यान् इतरान् राक्षसान् प्रति सुमुत्पेतुः समुत्पतिताः। तदानीमेव

१- वोत्तरम्, 'क'
२- हुतिरमा, 'क'
३- दितिना, 'क'
४- कर्त्रेण, 'क'

इन्द्रारामस्य नन्दनवनस्य सम्बन्धिनः शिलीमुखाः भृङ्गाः मन्दारकैः कल्पतरुकुसुमैः सह अधः अधस्तात् पेतुः पतिताः। राक्षससंहारसमये पुष्पवृष्टिरपीह पपातेति भावः। उभयत्रापि पतेर्लिट् ॥५४॥

गाधेयोऽवभृथस्नानं वितेने विमलोदकैः ।

मखान्ते मखशत्रूणां शोणितैः काननद्रुमाः ॥५५॥

गाधेय इति। गाधेयो विश्वामित्रः मखान्ते यज्ञान्ते विमलोदकैः अवभृथस्नानं वितेने कृतवान्। तनोतेर्लिट्। काननद्रुमाः आश्रमवनद्रुमाः मखशत्रूणां राक्षसानां शोणितैः रक्तैः अवभृथस्नानं वितेनुरिति वचनव्यत्ययेनान्वयः। राक्षसवधात् तत्रस्थ वृक्षाणामपि सन्तोषो जात इति भावः ॥५५॥

रामोऽथ मुनिना निन्ये मिथिलां शिथिलापदा ।

सीतया दृढसापत्न्यं कर्तुं तद्विजयश्रियः ॥५६॥

राम इति। अथ यज्ञानन्तरं शिथिलापदा अपगतयज्ञविघ्नरूपविपत्तिना मुनिना विश्वामित्रेण कर्त्रा रामः सलक्ष्मण इति भावः। विजयश्रियः रामविजयलक्ष्म्याः सीतया दृढसापत्न्यं कर्तुं मिथिलां जनकनगरीं निन्ये नीतः विजयलक्ष्मीप्राप्त्यनन्तरम् विश्वामित्रेण सीताविवाहार्थं रामोऽपि प्रतिनीत इत्यर्थः ॥५६॥

हरिपादारविन्दाग्रमरन्दस्यन्दनिम्नगा ।

अतारि रघुपुत्राभ्यामध्वजश्रमनाशिनी ॥५७॥

हरीति। रघुपुत्राभ्यां रामलक्ष्मणाभ्यां कर्तृभ्याम् अध्वजश्रमनाशिनी मार्गजन्यखेदहारिणी हरेः विष्णोः पादारविन्दाग्रस्य पादपद्माञ्चलस्य मकरन्दस्यन्दः मकरन्दस्रावरूपा निम्नगा नदी गङ्गेत्यर्थः। अतारितीर्णा तरतेः कर्मणि लुङ् ॥५७॥

चतुर्भिः श्लोकैः गङ्गां वर्णयति -

स्वर्गारोहणसोपानरूपवीचिपरम्परा ।

रममाणसुरस्त्रीणां कुचकोकैरलङ्कृता ।।५८।।

स्वर्गेति। स्वर्गारोहणाय सोपानानि, तेषां रूपमिव रूपं यस्याः सा तादृशी वीचिपरम्परा तरङ्गसन्ततिर्यस्याः सा तथोक्ता। रममाणाः क्रीडन्त्यः याश्च ताः सुरस्त्रियश्च तासां कुचकोकैः स्तनचक्रवाकैः अलङ्कृता भूषिता ॥५८॥

पातालोत्था हि भोगाभमग्नाङ्गविहगाननैः ।

हंसैर्वेगादिवानीतैर्लक्ष्म्या हैमवतोपलैः ।।५९।।

पातालेति। पातालादुत्तिष्ठन्तीति पातालोत्था ते च ते अहयश्च सर्पाः तेषां भोगाः फणाः तेषां कान्तिः भा येषां तानि तथोक्तानि मग्नानि अङ्गानि शरीराणि येषां ते तथोक्ताः, ते च ते विहगाश्च जलकुक्कुटा इत्यर्तः। तेषामाननानि मुखानि पातालोत्था हि भोगाभानि च तानि मग्नाङ्गविहगाननानि च तैर्वेगाज्जलवेगात् आनीतैश्च हैमवतोपलैः हिमवद्गिरिसम्बन्धिपाषाणैरिवाङ्कितैः हंसैश्च लक्ष्या दर्शनीया ॥५९॥

सागता शमितायासा रावायामिति धामभूः ।

निजमारुतधूताधापाता सन्ततभा भुवि ।।६०।।

सा। आगता। शमितायासा। आरावाया। अमितिधामभूः।

निजमारुतधूताघापाता। सन्ततभा। भुवि॥

सेति। सकललोकप्रसिद्धा भुवि आगता शमितः अपहृतः आयासो जनखेदो यया सा शमितायासा, आरावं तरङ्गध्वनिं अयतेः प्राप्नोतीत्यारावाया अयतेः पचाद्यच्प्रत्ययः। न विद्यते मितिः सादृश्यं येषां तानि अमितीनि असदृशीनि यद्वा अमितीनि अपरिमितानि, अपरिमितानि च तानि धामानि स्वर्गादीनि च तेषां भूः कारणं स्वर्गादिपुण्यलोकप्रदेत्यर्थः। निजश्चासौ मारुतश्च तेन धूतः अपनीतः अधापातः पापागमः यस्याः सा तथोक्ताः, सन्तता अविच्छिन्ना भा कान्तिर्यस्याः सा तथोक्ता। अनुलोमश्लोकः ॥६०॥

विभुभाततसन्तापाघातादूः (स) तरुमाजनिः ।
भूमदा (?) तिमियावारा सायाता शमितागसा ।।६१।।

विभ्विति। विभ्वी सर्वतो व्याप्ता मा कान्तिर्यस्या विभुभा आततः विस्तृतः स चासौ सन्तापश्च तेन आधूतः सन्तापजनितप्राणिखेद इत्यर्थः। तमाधुन्वति अयं गमयन्तीत्याधूतध्वः 'धूञ् कम्पन' इत्यस्मात् क्विप्। ते च तरवश्च तीरोत्पन्ना वृक्षाः तेषां मा लक्ष्मीः तस्या जनिरुत्पत्तिस्थानम् आततसन्तापाघातरूमाजनिः। भूमानं वैभवं ददातीति पोषयतीति भूमदा वैभवप्रदेत्यर्थः। तिमीन् मत्स्यविशेषान् याति प्राप्नोतीति तिमिया आयातेन आगमेन सपोता सा। शमितं आगः अपराधो येन तथोक्तं तेन वारा जलेन उपालक्षिता गङ्गा अतारीति पूर्वेणान्वयः ।।६२।।

महेन्द्रजारतासाक्षी सान्द्रपादपसङ्कुलः ।
रामलक्ष्मणगाधेयैः प्रपेदे गौतमाश्रमः ।।६२।।

महेन्द्रेति। रामलक्ष्मणगाधेयैः कर्तृभिः। महेन्द्रस्य जारता जारत्वं तस्या साक्षिणः ते च ते सान्द्रपादपाश्च तैः सङ्कुलः व्याप्तः गौतमाश्रमः प्रपेदे प्राप्तः। पदेः कर्मणि लिट्।।

चलत्काषायशाटीभिर्जपापाटलकान्तिभिः ।
उपासनप्रसन्नाभिस्सन्ध्याभिरिव भूषितः ।।६३।।

त्रिभिः श्लोकैः गौतमाश्रमं वर्णयति -

चलदित्यादिना। जयाकुसुमवत् पाटला कान्तिर्यासां तास्ताभिः अत एव उपासनेन प्रसन्नाभिः प्रत्यक्षाभिः सन्ध्याभिरिव स्थिताभिः चलन्त्यश्च ताः काषायशाट्यश्च ताभिर्भूषितः अलङ्कृतः ।।६३।।

१- मथा, 'क'

न्याये जिगीषयान्योन्यं कृतदूषणभूषणैः ।
शोभितः कोटरालीनशारिकाशुकशावकैः ।।६४।।

न्याय इति। न्याये गौतमोक्तप्रमाणादिषोडशपदार्थ-निरूपणप्रधानशास्त्रे अन्योन्यं जिगीषया जेतुमिच्छया दूषणानि च भूषणानि च। (भूषणा दूषणा) कृतानि यैस्तैः परमतमालम्ब्य शारिकाशावकैः दूषणे क्रियमाणे शुकशावकाः गौतममतं स्थापयन्तीति भावः। शारिकाशुकानां शावका डिम्भाः तैः भूषिता अलङ्कृतः। तत्र मुनयः शास्त्रेषु परस्परं विवदन्त इति किमु वक्तव्यमिति भावः ।।६४।।

शार्दूलनखनिर्धूतकण्डूभिर्मण्डलैर्गवाम् ।
अलङ्कृतोऽभितो बर्हिपिच्छच्छायेशयाहिभिः ।।६५।।

शार्दूलेति । शार्दूलनखैः निर्धूता नाशिता कण्डूतिः येषां तानि, तैः गवां मण्डलैः बर्हिपिच्छानां मयूरकलापानां छाया बर्हिच्छाया तत्र शेरत इति शयाः, ते च अहयश्च सर्पाः तैः छायाबाहुल्य इत्येकवद्भावः 'तत्पुरुषे कृति बहुलमिति'[१] सप्तम्या अलुक्। अभितः अलङ्कृतः अनेन तत्रत्यमृगपक्ष्यादीनां मुनितपोमहिम्ना परस्परविरोधो नास्तीत्युक्तं बोध्यम्। एतादृशो गौतमश्रमः प्रपेद इति पूर्वेणान्वयः ।।६५।।

जनको मुक्तिकान्तायास्सिन्धुकान्तासहोदरः ।
रामपादपरागोऽत्र मुनिकान्तामजीजनत् ।।६६।।

जनक इति । अत्र गौतमाश्रमे मुक्तिरेव कान्ता मुक्तिकान्ता तस्या जनकः उत्तमु (?)... सिन्धुकान्ता) गङ्गा तस्याः सहोदरः। उभयोरपि विष्णुपादोत्पन्नत्वादिति भावः। रामपादपरागः मुनिकान्तामहल्यां शापदग्धामितिभावः। अजीजनत् प्रादुर्भूतां कृतवान् ।।६६।।

१- अष्टाध्यायी ६/३/१४

अहल्यां शापनिर्मुक्तां प्रपेदे पादलोचनः ।

विधुन्तुदसमुद्गीर्णां कलामिव कलानिधिः ।।६७।।

अहल्यामिति। पादे लोचनं यस्य स पादलोचनो गौतमः शापनिर्मुक्तामहल्यां... (?) कलानिधिश्चन्द्रः। विदुन्तुदसमुद्गीर्णां राहूज्झितां कलामिव प्रपेदे प्राप्तवान्। उपमालङ्कारः ।।६७।।

सपर्यया दारचितमहसा रञ्जितोदयः ।

स पर्ययादारचितमहसा रञ्जितोदयः ।।६८।।

सः पर्ययात्। आरचितमहसारम्। जितोदयः। (अर्धयमकम्)

सपर्ययेति। जितः उदयः शत्रूणामुदयो येन सः जितोदयः स रामः दारचितमहसा दारैरहल्यया चितं सम्पादितं महस्तेजो यस्य स तथोक्तः तेन गौतमेन कृत इति शेषः। सपर्यया पूजया रञ्जितः पूजितः कृतातिथ्यः सन्नित्यर्थः। अतएव दयत इति दयः आदरवान् सन्, दयतेः पचाद्यच् प्रत्ययः। आरचितमहसारम् आरचितः कृतः महसारः (?)[१] उत्सवश्रेष्ठो यस्मिन् कर्मणि तद्यथा तथा पर्ययात् गौतमाश्रमाग्निगत इत्यर्थः। अयतेर्लङ् अर्धयमकम् ।।३८।।

त्रयस्ते मिथिलामेत्य जनकेन प्रपूजिरे ।

शतानन्दसनाथेनाप्यनन्तानन्दशालिना ।।६९।।

त्रयस्तेति - ते त्रयः रामलक्ष्मणविश्वामित्राः मिथिलामेत्य प्राप्य शतानन्दसनाथेनापि शतानन्दयुक्तेनापि अनन्तानन्दशालिना जनकेन। (प्र)पूजिरे पूजिताः। पूजेः कर्मणि लिट्। अत्र शतसंख्यानन्दसहितेनाप्यनन्तानन्दशालिनेति शब्दतो विरोधः। शतानन्दो नाम गौतमपुत्रः स्वपुरोहितः। तत्सहितेन

१- महसाग्र, 'क'

अनन्तानन्दशालिना अपरिमितसंतोषशालिनेति परिहारः। विरोधाभासोऽलङ्कारः ॥६९॥

ततोऽनयद्धनूरत्नं गाधेयस्य गिरीशितुः।

नृपो मग्ना (?)[1] नृपाः सारेऽगाधे यस्य गिरीशितुः ॥७०॥

गाधेयस्य । गिरि । ईशितुः । अगाधे । यस्य । गिरीशितुः ।

तत इति। ततो अनन्तरं नृपः जनकः ईशितुरैश्वर्यसम्पन्नस्य गाधेयस्य। विश्वामित्रस्य गिरि वचसि तस्यां गिरीशितुर्महादेवस्य धनूरत्नं धनुः श्रेष्ठम् अनयत् नीतवान्। धनुरेव वर्णयति। यस्येति यस्य धनुषः अगाधसारे बले नृपा राजानो मग्ना। धनुः चालयितुमपि न शक्ता इत्यर्थः। पादयमकम् ॥७०॥

करेण हरकोदण्डं उद्धधार स राघवः।

करेण कलभः साक्षादिक्षुकाण्डमिवायतम् ॥७१॥

करेणेति। सः राघवः करेण हस्तेन हरकोदण्डं महादेवचापं करेणुः कलभः आयतम् इक्षुकाण्डमिव साक्षात् सर्वप्रत्यक्षं यथा तथा उद्दधार उद्धृतवान् धरतेर्लिट्। उपमालङ्कारः ॥७१॥

मेरुचापधनुर्भङ्गमतिंवर्षन्न केवलम्।

वितेने ताटकारातिर्मानभङ्गं च मानिनाम् ॥७२॥

मेरुचापेति। अतिकर्षन् श्रुत्यन्तं कर्षन् ताटकारातिः रामः मेरुश्चापो यस्य स मेरुचापः शम्भुः तस्य धनुर्भङ्गमेव केवलं न वितेने किन्तु मानिनां मानभङ्गञ्च वितेन इति सम्बन्धः। रामेण धनुर्भङ्गे क्रियमाणे मानिनां मानभङ्गो जात इति भावः ॥७२॥

सार्वत्रिकेण तद्भङ्गस्फारबाणेन रावणः।

लङ्कायां स्वधनुर्भङ्गशङ्कया विह्वलोऽभवत् ॥७३॥

१- मग्नो, 'क'

सार्वत्रिकेणेति। रावणः लङ्कायां सार्वत्रिकेण सर्वत्रव्याप्तेन तस्य धनुषो भङ्गस्तद्भङ्गस्तेन स्फारः स्फुरितः स चासौ बाणश्च तेन स्वधनुर्भङ्ग शङ्कया स्वचापभङ्गभ्रान्त्या विह्वलश्चकितोऽभवत्। धनुर्भङ्गध्वनिना लङ्कायां रावणस्य दुर्निमित्तसूचनमभूदिति भावः। भ्रान्तिमदलङ्कारः ।।६३।।

विपुला विचलालङ्का विपुलागकुलालका ।
काललां कुटिलालन्न काललापि च लालसा ।।७४।।

विपुला / विचला लङ्का / विपुला / अगकुलालका।
कालला। कुटिला / अलम्। न का / लला। अपि च लालसा।
(मुरजबन्धः)

धनुर्भङ्गध्वनिना लङ्का भूमिश्चोभयं चचालेत्याह -

विपुलेति। विपुला विशाला लङ्का विचला अभूदिति शेषः। धनुर्भङ्गध्वनिनेति भावः। अपि च अगकुलालकाः अगानां नगानां कुलान्येवालका यस्याः सा तथोक्ता। कालं लाति आददातीति कालला कालसहितेत्यर्थः। लालसा शोभमाना का विपुलाभूमिः कुटिला सती अलं न विचचाल। सर्वापि भूमिः कालेन सह तदानीं चलितेति भावः कालस्योत्पातसाहित्यमेव चलनमिति बोध्यम्। मुरजबन्धः ।।७४।।

सबन्धुतां ततोऽतीतापत्तिपङ्क्तिरथायुताम् ।
मैथिलोऽनीनयत् सेभपत्तिपङ्क्तिरथायुताम् ।।७५

स। बन्धुताम्। ततः। अतीतापत्तिपङ्क्तिरथायुताम् ।।
मैथिलः। अनीनयत्। सेभपत्तिपङ्क्तिरथायुताम् ।।

स इति। ततः धनुर्भङ्गानन्तरं स मैथिलो जनकः अतीताः पत्तिपङ्क्तयः रथायुतानि इत्यतीतापत्तिपङ्क्तिरथायुताम्, इभाश्च पत्तिपङ्क्तयश्च रथायुतानि इत्येकवद्भावः। अनीनयत् नीतवान्, ग्रामजनेनेत्यादिना दशरथादिबन्धुसमूहमाकारितवानित्यर्थः। पादयमकम् ।।७५।।

निर्मितानेकमाणिक्यकायमाना समन्ततः ।
पुरी रराज मुद्वृद्धकायमानासमन्ततः ।।७६।।
कायमाना । समन्ततः । कायमाना । असमम् । ततः ।
(पादयमकम्)

निर्मितेति । ततोऽनन्तरं समन्ततः सर्वत्र माणिक्यानां कायमाना महोर्ध्व स्तम्भनिर्मिताः तिर्यग्वेणुदण्डाच्छादिता आवासविशेषा अनेके च ते माणिक्यकायमानाश्च निर्मिताः अनेकमाणिक्यकायमानाः यस्यां सा तथोक्ता पुरी मिथिला मुद्वृद्धकायमाना मुदा सन्तोषेण वृद्धम् अभिवृद्धिं कायमाना पौरजनशरीराणां मानं परिमाणं यस्यां सा तथोक्ता सति। असमं असदृशं यथा तथा रराज राजितवती । राजेर्लिट् । पादयमकम् ।।६७।।

स तां रामस्सतामग्रे प्रतिजग्राह जानकीम् ।
जनकान्मेनकापुत्रीं पिनाकीव हिमाचलात् ।।७७।।

स इति । स रामः सतां सत्पुरुषाणाम् अग्रे जनकात् सकाशात् तां प्रसिद्धां जानकीं सीतां हिमाचलात् सकाशात् मेनकापुत्रीं पार्वतीं पिनाकीव परमेश्वर इव प्रतिजग्राह प्रतिगृहीतवान् ।।७७।।

उद्दामविलसत्तेजः कृशानौ रघुपुङ्गवः ।
कार्तवीर्यस्य वैरीव लाजहोमं समातनोत् ।।७८।।

उद्दामेति । रघुपुङ्गवो रामः कार्तवीर्यस्य वैरी जामदग्न्य इव उद्दाम प्रौढं विलसत् प्रकाशमानं च तेजो[1](?) यस्य सः तथोक्तः, सचासौ कृशानुश्च वैवाहिकाग्निः वैवाहः तस्मिन् उद्दामविलसत्तेजः कृशानुः प्रतापाग्निस्तस्मिन् इत्यर्थः । लाजहोमं लाजानां होमम् अन्यत्र राज्ञां होमं लरयोरभेदः इति न्यायात् समातनोत् कृतवान् ।।७८।।

१- चेतो 'क'

माण्डवीं भरतः श्रीमानूर्मिलामपि लक्ष्मणः ।

शत्रुघ्नः श्रुतकीर्तिञ्च श्रुतिकीर्तिरिवावहत् ।।७९।।

माण्डवीति । श्रीमान् भरतः माण्डवीनामकन्यकां लक्ष्मणोऽपि ऊर्मिलानामकन्यां श्रुतिकीर्तिः शत्रुघ्नः श्रुतकीर्तिर्नामिकन्यकाम् उदावहत् परिणीतवानिति प्रत्येकं सम्बन्धः । उर्मिला जनकस्य और (सी) पुत्री माण्डवीश्रुतकीर्ती तु कुशध्वजस्य पुत्र्यौ इति ज्ञेयम् ।।७९।।

तदानद्धैः समुत्तालैः ननृते दिवि नर्तकैः ।

तदानद्धैः समुत्तालैर्निपेते पुष्पवृष्टिभिः ।।८०।।

तदेति - तदा विवाहकाले । तदानद्धै; तैः नर्तकैरानद्धैः तदानद्धैः बद्धैः समुत्तालैः सम्यगुत्तालैः गम्भीरैः आनद्धैः मुरजादिवाद्यैः आनद्धं मुरजादिकमित्यमरः। तालैः कालस्य वाद्यविशेषैश्च उपलक्षितैः नर्तकैः अक्षरो मुख्यो दिव्ये गगने समुत् सहर्षं यथा तथा ननृते। नृत्तं नृत्यतेर्भावे लिट्। पुष्पवृष्टिभिश्च निपेते। निपतितम् गगनादिति भावः। पतेर्भावे लिट् ।।८०।।

तनयैराजगामाथ सूर्यान्वयसमुन्नतैः ।

सहायोध्यां दशरथः सूर्यान्वयसमुन्नतैः ।।८१।।

तनयैरिति । अथविवाहानन्तरं दशरथः सूर्यान्वयसमुन्नतैः सूर्यवंशमहोन्नतैः सूर्यान्वयसमुन्नतैः सूर्यानां नवोढानाम् अन्वयेन सम्बन्धेन समुदः सन्तोषाः ते च ते नताश्च विनताः विशेषेण समासः तैः तनयैः रामादिभिः पुत्रैः सह अयोध्यां प्रति आजगाम गतवान्। गमेर्लिट्। पादयमकम् ।।८१।।

सारभूरितरसाहसेनया सार भूरितरसा हसे नया ।

सारभूरितरसा हसेनया सारभूरितरसाह सेनया ।।८२।।

सारभूः । इतरसाहसेन । या । सा । आर । भूरितरसा । हसे (नया)
सारभूरितरसा । हसेनया । सारभूः । इतरसा । आह । सेनया ।।

(चतुष्पादयमकम्)

सारेति। अस्य प्र[१](?) विभागः-सारभूः इतरसाहसेन। या। सा आर। भूरितरसा। हसे। नया। सारभूरितरसा। हसेनया। सारभूः। इतरसा। आह। सेनया। सारेण बलेन भवति प्रादुर्भवतीति सारभूः इतरसाहसेन इतरेषु शत्रुषु विषये साहसेन उपलक्षिता सा प्रसिद्धा हसेन हासेन या नीतिप्रति उचितस्थल एव सा साहसं कुर्वतीत्यर्थः। सारभूरितरसा, अरैः सहितानि साराणि चक्राणि तैः भूरितः भूरीकृतः। भूरिशब्दात्तत्करोतीति ण्यन्तात्कर्मणि क्तः। रसः उत्साहो यस्यास्सा तथोक्ता। हसेनया हसन्तीति हसाः ते च ते इनाश्च राजन इत्यर्थः, तान् याति प्राप्नोतीति हसेनया हसद्राजयुक्तेत्यर्थः। इतरसा प्राप्तरसा आक्रान्तभूमीति यावत् या सेना भूरितरसा अधिकवेगेन इह मार्गे आर आगतवती। यत्तदोर्नित्यसम्बन्धात्। तयेति पदमध्याहर्तव्यं तथा च तया सेनया उपलक्षितः सारभूः सारा श्रेष्ठा भूः भूमिर्यस्य सः। उत्तरकोसलेश्वरो दशरथ आह वसिष्ठं प्रत्युक्तवानित्यर्थः। आहेति तत्कालापेक्षया वर्तमानत्वनिर्देश इति न कोऽपि दोषः। चतुष्पाद यमकम्॥८२॥

प्रदक्षिणं मे हरिणा वहन्ति
खगाः कथन्नु प्रतिकूलभावम्।
इत्यूचिषि क्ष्माभृति तत्र रामो
दुःशासरागा इतिघोष आसीत्॥

दशरथवचनमेवाह-प्रदक्षिणमिति। हे भगवन्निति शेषः। मे मम हरिणाः मृगाः प्रदक्षिणं वहन्ति प्रदक्षिणं कुर्वन्तीत्यर्थः। खगाः पक्षिणः प्रतिकूलभावं प्रातिकूल्यं कथन्नु वहन्ति अपशकुनं कथं कुर्वन्तीत्यर्थः। इत्यनेन प्रकारेण क्ष्माभृति दशरथे ऊचिषि सति उक्तवति सति तत्र तस्मिन् समये दुःशासनः दुःखेन शासितुं शक्यः। शासे कृच्छ्रार्थे औणादिक उकारः। रामो जामदग्न्य आगात् आगतः इति घोषः सेना कलकला आसीत्। आस्तेर्लङ्। वैदिकश्चतुर्थपादः॥८३॥

१- द, 'क'

भृगुपतिधनुराशु भूरि कर्षन्
रघुतिलकोपजहार तस्य तेजः ।
उदयगत इवातुषारभानु-
स्तुहिनरुचेरिव स क्षपावसाने ।।८४।।

भृग्विति। रघुतिलकः सः रामः भूरि अधिकं भृगुपतिधनुर्जामदग्न्यचापं कर्षन् तस्य जामदग्नेः तेजः कर्मक्षपावसाने प्रातःकाले उदयगतः उदयाचलस्थितः अतुषारभानुः सूर्यस्तुहिनरुचेश्चन्द्रस्य तेज इव आशु शीघ्रं अपजहार अपहृतवान् धनुषकर्षणमात्रेण जामदग्न्यः पराभूत इति भावः ।।८४।।

अमुचद्विशिखं रघुवंशमणि-
भृगुरामसमागमनात्कुपितः ।
अयमस्य परः परलोकगते -
र्विनिवारणकृत्परिघो व्यजनि[1](?) ।।८५।।

अमुचदिति। भृगुरामस्य समागमनात् कुपितः रघुवंशमणिः। (रामो) विशिखं बाणम् अमुचत्। मुचेर्लङ्। पर उत्कृष्टः अयं बाणः अस्य जामदग्नेः परलोकगतेः विनिवारणकृत् निवृत्तिकरः परिघः द्वारावरोध दण्डः व्यजनि जातः। तोटकवृत्तम् ।।८५।।

तनयविजयलक्ष्मीदर्शनप्रतिचेतान्
प्रविमलतरमुक्तातोरणालीपरीताम् ।।
पुरमविशदुदारां पौरुहूतस्सखायं
शरदुदितसुधांशुर्द्यौरिवोदीततारा म् ।।८६।।

१- रजनि, 'क'

इति श्रीचरकूरिकोण्डुभट्टोपाध्यायपौत्रेण यज्ञनारायणभट्टतनयेन वेङ्कटेश्वरेण सर्वाम्बिकागर्भशुक्तिमुक्तामणिना विरचिते चित्रबन्धरामायणे महाकाव्ये बालकाण्डकथा सम्पूर्णा प्रथमःसर्गः।

तनयेति। तनयस्य रामस्य विजयलक्ष्म्याः दर्शनेन प्रीतं चेतो यस्य स तथोक्तः। पौरुहूतः इन्द्रसम्बन्धिसखा अयं दशरथः प्रविमलत (र) श्च ताः मुक्ताश्च तासां तोरणाल्यस्ताभिः परीतां व्याप्ताम् उदारां पुरीमयोध्यां रेफान्तोऽयं शब्दः। शरदुदितसुधांशुः शरत्कालचन्द्रः उदितताराढ्यां (द्यौरिव) आकाशमिव अविशत् प्रविष्टः। विशेर्लङ्। उपमालङ्कारः। मालिनीवृत्तं तल्लक्षणं तु ननमयययुतेयं मालिनीभोगिलोकैरिति ॥८६॥

इति श्रीचरकूरिकोण्डुभट्टोपाध्यायतनययज्ञनारायणभट्टविरचितायां चित्रबन्धरामायणव्याख्यायां बाल (प्रबो)धायां प्रथमः सर्गः।

❖❖❖

द्वितीयः सर्गः

सशत्रुघ्नः शुभरतो भरतो मातुलालयम् ।
ततो जगाम पुरतः पुरतोगामिवाहनः ।।१।।

इदानीं वेङ्कटेश्वरकविरयोध्याकाण्डकथामुपक्रमते -

स इति । ततः अयोध्याप्रवेशानन्तरं शुभरतः कल्याणनिरतः सशत्रुघ्नः शत्रुघ्न सहितः भरतः पुरतोगामिवाहनः पुरोगताश्च सन् पुरतः अयोध्यायास्सकाशात् मातुलालयं युधाजिद्गृहं प्रति जगाम गतः । सन्दष्टयमकम् ।।१ ।।

राजराजो राजराजराजो जररजा जजः ।
राराजोऽजरराजाजौ रराजाजिर्जरारुजा ।।२।।

राजराजः । राजराजराजः । जररजाः । जजः ।
रराजः । अजरराजाजौ । रराज । आजिः । जरारुजा ।।

(द्व्यक्षरी)

राजेति । राज्ञां राजा राजराजः कुबेरः तद्वद्राजते प्रकाशत इति राजराजराजो जरति जरं जीर्णं रजः रजोगुणो यस्य सः जररजाः ।

अजरराजः निर्जरराजः इन्द्रः तस्याजौ युद्धे रराजः अत्यन्तं प्रकाशमानः 'राजेर्यङन्तात्पचाद्यच्' जजः योद्धा जज आयोधन इत्यस्मात्पचाद्यच्। राजराजः राजश्रेष्ठः आजिर्दशरथः जरारुजा जरैव रुग् रोगः तया रराज राजितवान्। द्व्यक्षरी ॥२॥

स राजा दुर्भरं भूरिजरावेशवशालसः ।
परिमन्दशिरःकम्पैर्न्यषेधिदिव भूभरम् ॥३॥

द्वाभ्यां श्लोकाभ्यां दशरथस्य जरामेव वर्णयति -

स इति। भूरिजरावेशवशेन अधिकवार्धकप्रवेशबलेन अलसः श्रान्तः स राजा दशरथः परिमन्दशिरःकम्पैः दुर्भरं भूभरं भूमिभारं न्यषेधिदिव निषिद्धवानिवेत्युत्प्रेक्षा। सेधतेर्लुङ्। अहं जीर्णोऽस्मि, इतः परं मया भूमिर्धर्तुं न शक्यते इति निषेधं कृतवानिवेत्यर्थः ॥३॥

पलितं तस्य केशेषु स्खलितं क्रमणोदये ।
गलितं स्वरसम्यक्त्वे चलितं हृदि चाभवत् ॥४॥

पलितमिति। तस्य दशरथस्य केशेषु पलितं पाण्डुरत्वं क्रमणोदये गमनप्रादुर्भावे स्खलितं स्खालित्यं स्वरसम्यक्त्वे कण्ठस्वरसामञ्जस्ये गलितं भ्रंशनं हृदि मनसि चलितं चाञ्चल्यं च अभवदिति प्रत्येकं सम्बन्धः। स्खलितादौ स्थलत्रयेऽपि भावे क्तप्रत्ययः ॥४॥

कलासाकल्यसम्पन्नं स्फायत्कुवलयोत्सवम् ।
रामचन्द्रं तदालोक्य मुमुदे पार्थिवाम्बुधिः ॥५॥

कलेति। पार्थिवः दशरथः स एवाम्बुधिः तदा जराप्रवेशसमये कलानां विद्यानां साकल्यं तेन सम्पन्नं चन्द्रपक्षे स्पष्टोऽर्थः। स्फायन् वर्धमानः कुवलयोत्सवः भूमण्डलोत्सवः अन्यत्र कुवलयोत्सवो नीलोत्पलोत्सवः येन सः तथोक्तः तम्। राम एव चन्द्रः तमालोक्य मुमुदे मुदितवान्। रामस्य सार्वभौमलक्षणलक्षितत्वादिति भावः ॥५॥

सर्वतो विबुधैर्गीतो यदीयः कीर्तिमण्डलः ।
बम्भ्रम्यते सम्भ्रमेण सर्वतोभद्रबन्धवत् ।।६।।

द्वाभ्यां श्लोकाभ्यां रामचन्द्रस्य कीर्तिमेव वर्णयति -

सर्वत इति। यदीयः यस्य रामस्य सम्बन्धी कीर्तिमण्डलः विबुधैर्देवैरन्यत्र पण्डितैः गीतः सन् सर्वतोभद्रबन्धवत् सर्वतोभद्रबन्धेन तुल्यं सम्भ्रमेण सर्वतः बम्भ्रम्यते, पुनः पुनः भ्रमति 'भ्रमेः कर्तरियङ्प्रत्ययः। सर्वदिगन्तेषु समन्ततो विभ्रान्तो भवतीत्यर्थः। सर्वतोभद्रबन्धस्य सर्वतोभ्रमणप्रकारस्तु अस्मिन् सर्गे स्वस्थापन एव वक्ष्यते ।।६।।

हारन्ति हरितां वारिपूरन्ति गिरिसानुषु ।
कर्पूरन्त्यधुना यस्य यशांसि जगदण्डके ।।७।।

हारन्तीति। यस्य रामस्य यशांसि अधुना इदानीमपि हरितां दिशां हारन्ति हारा इवाचरन्ति। हारशब्दात् आचारात् क्विप्। 'नाद्यन्ता धातव' इति धातुसंज्ञायां शवाद्युत्पत्तिः। एवमुत्तरत्रापि द्रष्टव्यम्। गिरिसानुषु पर्वतप्रस्थेषु वारिपूरन्ति वारिपूरो निर्झरास्तइवाचरन्ति। जगदण्डके ब्रह्माण्डभाण्डे कर्पूरन्ति कर्पूर इवाचरन्ति। रामकीर्तिः कर्पूरसाम्येन ब्रह्माण्डभाण्डस्य करण्डसाम्यं व्यज्यत इत्यलङ्कारेण अलङ्कारध्वनिः ।।७।।

राज्यलक्ष्मीर्विहायैनं चकमे रघुनन्दनम् ।
वृद्धं संत्यज्य युवतीर्युवानं खलु वाञ्छति ।।८।।

राज्येति। राज्यलक्ष्मीः एवं दशरथं विहाय रघुनन्दनं चकमे कांक्षितवती। कमेर्लिट्। तथाहि युवतीवृद्धं सन्त्यज्य युवानं वाञ्छति खलु। सामान्यस्य विशेषसमर्थनरूपोऽर्थान्तरन्यासः। अनेन रामचन्द्रस्य दशरथादप्यधिकगुणशालित्वं व्यज्यते ।।८।।

राज्येऽभिषेक्तुं तं धीमानवनीतलवारिभिः ।
इयेष मौक्तिकस्फारनवनीतलवारिभिः ।।९।।

अवनीतलवारिभिः नवनीतलवारिभिः ।

राज्य इति। धीमान् दशरथः तं रामं राज्ये मौक्तिकस्फारनवनीतलवारिभिः मौक्तिकवत् स्फारा रम्याः नवा नूतनाः नीताः प्राप्तलवालयः बिन्दुपरम्पराः येषां तानि तथोक्तानि तैः अवनीतलवारिभिः भूतलानेकतीर्थैः अभिषेक्तुमियेष इष्टवान्। इषेर्लिट् ॥९॥

अलङ्कुर्वस्तदाकर्ण्य सहितो नगरञ्जनः ।
वसन्त इव रेजे श्रीसहितो नगरञ्जनः ॥१०॥

सहित / नगरम् / जनः / श्रीसहितः / नगरञ्जनः /

अलमिति। सहितः। मित्रवर्गसहितः जनः पौरजनः तत् रामाभिषेक रूपं कृत्यमाकर्ण्य नगरमयोध्यानगरम् अलङ्कुर्वन् सन् अतएव श्रीसहितः लक्ष्मीसम्पन्नः नगान् वृक्षान् रञ्जयति पुष्पितान् करोति (इति) नगरञ्जनः, वसन्त इव रेजे राजितवान् ॥१०॥

रोहिण्येवाम्बरे चन्द्रः श्रीकामः पितुराज्ञया ।
राघवः सीतयागारे निषसाद धृतव्रतः ॥११॥

(वैदिकश्चतुर्थपादः)

रोहिण्येति। राघवः रामः पितुराज्ञया श्रीकामः राज्यलक्ष्मीकामः सन् अतएव सीतया सह आगारे देवतागृहे धृतव्रतः बद्ध(क)क्ष(ः) सन् अम्बरे आकाशे रोहिण्या सह श्रीकामः तेजस्कामश्चन्द्र इव निषसाद निविष्टवान्। सदेर्लिट्। चतुर्थपादो वैदिकः ॥११॥

तेन कोपारुणा रेजे रघुवंशविभेदिनी ।
धूमायमानवदना दावकीलेव मन्थरा ॥१२॥

तेनेति। रघुवंशं विभेत्तुं शीलमस्या अस्तीति रघुवंशविभेदिनी रघुकुले मित्रभेदक (रणेक्षमा)त एव मन्थरानाम काचन कैकेयीदासी तेन रामोत्सवेन हेतुना कोपारुणा क्रोधरक्ताङ्गी सती धूममुद्वमत् धूमायमानं वदनं यस्याः सा तथोक्ता विवर्णमुखी सतीत्यर्थः अतएव (अ) (?) वेणुदाहिका धूमायमानवदना दावकीला दावाग्निज्वालेव रेजे राजितवती ॥१२॥

तया गिरा निर्मथिते कैकेयीहृदयाम्बुधौ ।
तत्क्षणे विकटः कोपः कालकूटानलोऽजनि ।।१३।।

तयेति । तया मन्थरया गिरा करणेन मन्थराकल्पयेति भावः । कैकेय्याः केकयराजपुत्र्याः 'केकय (मित्रयु) प्रलयानां यादेरिया'देशः[१] । हृदयमेवाम्बुधिः समुद्रस्तस्मिन् निर्मथिते सति तत्क्षणे मथनसमये एव विकटः सकललोकभयङ्करः कोपश्च कालकूटानलः अजनि जातः ।।१३।।

मध्येऽगारं निराहारा सा रुषा न्यपतद्भुवि ।
महोल्केवाचिरादेष्यत् सर्वानर्थस्य सूचिका ।।१४।।

मध्य इति । केकयी मध्येऽगरं (राजभवनमध्ये निराहारा) भोजनरहिता सती रुषा कोपेन अचिराच्छीघ्रमेव एष्यतः सर्वानर्थस्य रामप्रवासादि रूपस्येत्यर्थः सूचिका सूचयित्री महोल्केव भुवि न्यपतत् पतिता ।।१४।।

गलिताः क्ष्मामलञ्चक्रुः तस्या भङ्गुरहारतः ।
मुक्तास्तदा करादिन्दोर्वनीं हिमकणा इव ।।१५।।

गलिता इति । सा तदा तत्काले तस्याः कैकेय्याः । (भङ्गुरहारतः) भग्नहारात् गलिताः भ्रष्टा मुक्ताः मौक्तिकानि इन्दोश्चन्द्रस्य करात् किरणाद् गलिता हिमकणाः तुषारबिन्दवः वनीम् अटवीमिव क्ष्मां भूमिम् अलञ्चक्रुः अलङ्कृतवत्यः ।।१४।।

भूमौ भीमामिमां भामामपि पापोपमां प्रभुः ।
भीभूम्नाभिभवं प्राप्तो बभ्राम प्राप्य भूमिपः ।।१६।।

(ओष्ठ्यक्षरम्)

भूमाविति । प्रभुः भर्ता (भूमि)पो दशरथः भूमौ स्थितामिति शेषः ।
अतएव भीमां भयङ्करीं पपोपमां साकारपापतुल्याम् इमां भामां कैकेयीं प्राप्य भीभूम्ना भयातिशयेन अभिभवं तिरस्कारं प्राप्तः सन् बभ्रामापि भ्रान्तश्चेत्यर्थः ओष्ठ्यक्षरम् । श्लोकप्रधानाक्षराणामोष्ठ्यत्वात् ।।१६।।

१- अष्टाध्यायी ७/३/२

अनेन साथ पृष्टेयमनेन विभुना भृशम् ।
सावनेः वरयोः स्मारं भावनेवोदजीजनत् ।।१७।।

अनेनेति। यथानन्तरम् अनेनसा पापरहितेन अनेन अवनेर्विभुना भूपतिना दशरथेनेति यावत् इयं कैकेयी भृशं पृष्टा। सा कैकेयी भावनेव भावनासंस्कार इव भावनानाम स्मृतिहेतुः भुवनजन्यसंस्कारविशेष इति तद्विदः, वरयोः पूर्वदत्तयोरिति भावः, स्मारं स्मरणम् उदजीजनत्। जनितवती ।।१७।।

सिंहासने वने वासं रामस्यैकेन सान्यतः ।
सिंहासनेऽवने वासं भरतस्यान्वयाचत ।।१८।।

सिंहासने। वने। वासम्। सिंहासने। अवने। वा। आसम्।

तयोः वरयोः याचनाप्रकारमेवाह - सिंहासन इति। सा कैकेयी एकेन वरेण सिंहानामासने स्थाने वने विपिने रामस्य वासं स्थानम् अन्यतः अन्येन वरेण 'सार्वविभक्तिकस्तसिल्', भरतस्य सिंहासने भद्रपीठे अवनेः रक्षणनिमित्ते आसं वा उपवेशं च। वा शब्दश्चार्थः। अन्वयाचत याचितवती ।।१८।।

पितुरादेशमास्थाय वने गन्तुमियेष सः ।
रामः सत्कुलजाः श्रेयो मन्यन्ते गुरुशासनम् ।।१९।।

पितुरिति। रामः पितुः दशरथस्यादेशमाज्ञां वने गच्छेति नियोगमिति यावत् आस्थाय अङ्गीकृत्य वनं गन्तुमियेष इष्टवान्। इषेर्लिट्। तथा हि सत्कुलजाः सत्कुलप्रसूताः पुरुषाः गुरुशासनं गुर्वाज्ञां श्रेयो मन्यन्ते इति भावः ।।१९।।

माकामी नामुकः कामं कामिनीकामकामुकः ।
मानिकः कामकामोकमनुमेने कुकाननम् ।।२०।।

माकामिति। मां लक्ष्मीं कामयतीति माकामी आदौ राज्यलक्ष्मीकामः इत्यर्थः। अनन्तरं कामिन्याः कैकेय्याः कामस्य मनोरथस्य कामुकः कैकेयीमनोरथपूरण एव कृतसङ्कल्प इत्यर्थः। मानिकः अभिमानी पितुराज्ञामेव करोमीत्यभिमानवानित्यर्थः।

'अतइनि ठनाविति[१] ठन्प्रत्ययः। कामकामः मन्यथमन्मथः अमुकः असौ पुरुषः राम इत्यर्थः। अकं दुःखरूपकुकाननं कुत्सितवनं काममत्यन्तम् अनुमेने अङ्गीचक्रे। त्र्यक्षरी ॥२०॥

वसाने वल्कले तस्मिन् वभूवुर्मुदिताः सुराः।
न कांक्षन्ति परश्रेयो लोके स्वार्थपरायणाः ॥२१॥

वसान इति। तस्मिन् रामे वल्कले चीरवसने विपिनवसने आच्छादयति सति सुराः मुदिताः सन्तुष्टाः बभूवुः। तथाहि लोके स्वार्थपरायणाः स्वप्रयोजननिरताः। पुरुषाः परस्य। (ज)नस्य श्रेयः न कांक्षन्ति ॥२१॥

द्वाभ्यां श्लोकाभ्यां रामप्रयाणं कुलकेनाह -

नागराणां घनश्वासवातनिर्धूतधूलिना।
निरन्तराश्रुपातेन निषिक्तेनाशु वर्त्मना ॥२२॥

नागराणामिति। नागराणां पौराणां घनेन अधिकेन श्वासवायुना निर्धूता अपगामिता धूलिर्यस्मिन् तत्तथोक्तं तेन निरन्तरेण अश्रुपातेन आशु श्रीघ्रं निषिक्तेन वर्त्मना मार्गेण रामो निर्ययाविति उत्तरेण सम्बन्धः। अनेन राजागमनवेलायां क्रियमाणो राजोपचारो व्यज्यते ॥२२॥

छायातपयुतोऽनन्तं गहनं भानुमानिव।
ससीतलक्ष्मणो रामो रथमारुह्य निर्ययौ ॥२३॥

छायेति। ससीतालक्ष्मणो रामः छायातपाभ्यां युतः भानुमान् सूर्य इव रथामारुह्य अनन्तमपारं गहनं वनं प्रति अन्यत्र गहनं गम्भीरं अनन्तमाकाशं प्रति निर्ययौ यातवान्। यातेर्लिट् ॥२३॥

अयोध्यानगरी सर्वा गुणाकृष्टा तमन्वगात्।
प्राकारपरिखासौधवीथिकाभित्तिभिर्विना ॥२४॥

१- अष्टाध्यायी ५।२।११५

अयोध्येति। सर्वा अयोध्यानगरी गुणाकृष्टा रामगुणाकृष्टा ते रामं प्राकारपरिखासौधवीथिकाभित्तिभिर्विना अन्वगात् अनुसृतवती। अचेतनं वस्तुर्विना सर्वं चेतनाज्जातमनुयातमिति। विनोक्तिरलङ्कारः ॥२४॥

दीनाकारैर्निराकुर्वन् कैकेयीपुटभेदनम्।
हाहाकारैर्ययौ कुर्वन् ब्रह्माण्डपुटभेदनम् ॥२५॥

दीनाकारैरिति। पुटभेदनमयोध्यानगरं दीनाकारैः कैकेयीं निराकुर्वन् सन् हाहाकारैः ब्रह्माण्डपुटस्य भेदनं पाटनक्रियां कुर्वन् सन् ययौ ॥२५॥

कौसल्यायाः करालम्बमालम्ब्य वसुधाधिपः।
गात्रेणैव परं गेहं जगाहे मनसा विना ॥२६॥

कौसल्याया इति। वसुधाधिपो दशरथः कौसल्यायाः करालम्बं भुजयष्टिम् आलम्ब्य मनसा विना गात्रेणैव शरीरेणैव परं केवलं गेहं जगाहे प्रविवेश। मनस्तु राममनुसृत्य गतमिति भावः ॥२६॥

श्रवणेऽलङ्क्रियां चक्रे चक्रिरे यद्गुणा नृणाम्।
श्रवणेऽलङ्क्रियां चक्रे रामः सीतानुजानुगः ॥२७॥
श्रवणे। अलङ्क्रियाम्। चक्रे श्रवणे। अलम्। क्रियाम्। चक्रे।

श्रवण इति। यद् गुणाः यस्य रामस्य गुणाः नृणां मनुष्याणां चक्रे चक्राकारे श्रवणे श्रोत्रे कर्णशष्कुल्यामिति जातावेकवचनम्। अलङ्क्रियाम् अलङ्कारं चक्रिरे कृतवन्तः। सकलजनश्रोत्राभिराम इत्यर्थः, स इति शेषः। यत्तदोर्नित्यसम्बन्धात्। सीता च अनुजश्च सीतानुजौ तावेवानुगौ यस्य स तथोक्तः। रामः श्रवणे श्रवणनामनक्षत्रे या क्रिया चेष्टा ताम्, अलम् अत्यर्थं चक्रे कृतवान्। श्रवणस्यापि नक्षत्रत्रयात्मकत्वादिति भावः। सीतारामलक्ष्मणानां नक्षत्रत्रयात्मकश्रवणनक्षत्रचेष्टासदृशवर्णनात् निदर्शनालङ्कारः ॥२७॥

रामो गङ्गा(तटे) रूढं शृङ्गबेरं रसाधिकम्।
निषेव्य नगरं ताभ्यां सह तापज्वरं जहौ ॥२८॥

राम इति। रामः गङ्गातटे रूढं प्रसिद्धं रसाधिकं भूसारश्रेष्ठं षड्रससम्पन्नं वा श्रृङ्गबेरं नाम नगरं निषेव्य ताभ्यां सीतालक्ष्मणाभ्यां सह ताप एव ज्वरः तापज्वरः तम् अध्वश्रममित्यर्थः, जहौ त्यक्तवान्। अन्यत्र गङ्गातटे रूढं जातं रसाधिकं रससम्पन्नं नगरं विषहरं श्रृङ्गबेरमार्द्रं शुण्ठीं निषेव्य तापज्वरं जहाविति अपकृतज्वरातुरसाम्यस्य गम्यत्वात् समासोक्तिरलङ्कारः ।।२८।।

गुणसौरभ्यसम्पन्नौ गङ्गावीचिमरुद्गुहौ ।
शीतलप्रकृती तत्र रामं साधूपचेरतुः ।।२९।।

गुणेति। गुणानां सौरभ्यं गुणसौरभ्यं मरुत्पक्षे गुणश्चासौ सौरभ्यं च तेन सम्पन्नौ शीतलप्रकृती शीतलस्वभावौ गुहपक्षे शान्तिगुणात् मरुत्पक्षे तरङ्गसम्बन्धाच्चेति भावः। गङ्गावीचिमरुद् गङ्गातरङ्गवायुः स च गुहश्च तौ, रामं साधु यथा तथा उपचेरतुः उपचरितवन्तौ स्वोचितसेवां कृतवन्तावित्यर्थः ।।२९।।

राजपुत्रौ जटाजालशोभिनौ वनलोभिनौ ।
गुहेन सीतया गङ्गां तारितौ न तु वारितौ ।।३०।।

राजेति। वनलोभिनौ वनवासलुब्धौ राजपुत्रौ जटाजालशोभिनौ सन्तौ सीतया सह गुहेन गङ्गां तारितौ, गुहेन गङ्गातरणमेव कारितं वनवासनिवारणं तु न कारितमिति भावः ।।३०।।

वनं नवं निनानादिनदादानवरारवम् ।
गतोऽतोऽगजराराजं रामो मारो मनोनमः ।।३१।।

वनम् । नवम् । दिनानादिनदादानवरारवम् ।।
गतः । अतः । अगजराराजम् । रामः । मारः । मनोनमः ।
(प्रतिपदविलोमम्)

वनमिति। अतः गङ्गायाः परं पारात् मारः मन्मथकल्पः मनसा अनमः अनतो (?) मनोनमः गम्भीरमानस इत्यर्थः रामं नवं नूतनं दिनेषु अनादयः अनागन्तुका अनश्वरा इत्यर्थः। ते च ते नदाश्च तेषामादानं स्वीकारं तेन वरश्रेष्ठ आरवः ध्वनिः यस्य तथोक्तम्। अगजराराजम् अगानां वृक्षाणां जरया राजं राजमानं जीर्णवृक्षैः शोभमानमित्यर्थः। राजतेः पचाद्यच्प्रत्ययः। वनं गतः गतवान्। प्रतिपदप्रतिलोमं व्यञ्जनानां प्रधानानामेव प्रातिलोम्यं विवक्षितमिति न कोऽपि दोषः ॥३१॥

यागप्रयोगयोगेद्धं प्रयागवनमेत्य सः।
अतोषयद्भरद्वाजं नियोग इव कर्मणा[1] ॥३२॥

यागेति। सः रामः यागप्रयोगः क्रत्वनुष्ठानं तेन योगस्सम्बन्धः तेन इद्धं प्रकाशमानं प्रयागवनमेत्य प्राप्य कर्मणा नियोग इव कर्मसम्बन्धिसाकाराः पूर्वमिव भरद्वाजम् अतोषयत् सन्तोषितवान्। तुषाण्यन्ताल्लङ्। विष्णुसाक्षात्कारस्य क्रतुसाफल्यसम्पादकत्वादिति भावः ॥३२॥

चित्रकूटवनं प्राप्तौ सीतया सह राघवौ।
पुष्पश्रिया तदादिष्टौ मधुमन्दानिलाविव ॥३३॥

चित्रेति। राघवौ रामलक्ष्मणौ तेन भरद्वाजेन आदिष्टौ सन्तौ सीतया सह पुष्पश्रिया पुष्पलक्ष्म्या सह मधुमन्दानिलाविव वसन्तमलयानिलाविव चित्रकूटवनं प्राप्तौ प्राप्तवन्तौ ॥३३॥

चित्रकूटे महाकूटे कृत्वा पर्णकुटीमुभौ।
अकूटौ सह वैदेह्या तस्थतुः कूटगामिनौ ॥३४॥

चित्रकूट इति। अकूटौ कपटरहितौ सीतया सह कूटगामिनौ मेलनं प्राप्तौ उभौ रामलक्ष्मणौ महाकूटे उन्नतशिखरे चित्रकूटे पर्णशालां कृत्वा तस्थतुः स्थितवन्तौ ॥३४॥

१- कर्मणाम्, 'क'

गुहामुखविनिर्यातैर्व्यालनिःश्वासमारुतैः ।
यो भूमिभारजायासान्निशश्वासेव सन्ततम् ।।३५।।

सप्तभिः श्लोकैः चित्रकूटमेव वर्णयति- गुहेत्यादिना। यश्चित्रकूटः गुहामुकेभ्यो विनिर्यातैः व्यालानां सर्पाणां निःश्वासमारुतैः हेतुभिः भूमिभारजायासात् भूभरणजातश्रान्तेः सन्ततं निशश्वासेव निःश्वासवानिवेत्युत्प्रेक्षा ।।३५।।

तटाकोर्मिस्फुटैरर्कप्रतिबिम्बैरसंख्यकैः ।
पस्पर्ध इव यो मूर्ध्नि सैकभानूदयोदयम् ।।३६।।

तटाकेति। यश्चित्रकूटः असंख्यकैः अनन्तैः मूर्ध्नि शिखरे तटाकोर्मिस्फुटैः। तटाकतरङ्गप्रकटैर्दृश्यमानैरित्यर्थः। अर्कस्य प्रतिबिम्बैर्हेतुभिः सैकभानूदयः एकसूर्योदयसहितः स चासावुदयश्च उदयपर्वतः तं पस्पर्ध इव। त्वय्येक एव सूर्योदयः मयि त्वनन्तसूर्योदय इति स्पर्धितवानिवेत्युत्प्रेक्षा ।।३६।।

धातुभिर्विविधाकारैराख्यातप्रत्ययास्पदैः ।
साधु नानापतच्छब्दो यः शाब्दिक इवाबभौ ।।३७।।

धातुभिरिति। यश्चित्रकूटः आख्यातप्रत्ययास्पदैः विविधाकारैर्नानाविधविलपितादिरूपैः अन्यत्र नानाविधरूपैः धातुभिः गैरिकादिधातुभिः अन्यत्र भ्वादिधातुभिः उपलक्षितः साधुनानाविधाः पततां पक्षिणां शब्दा यस्य स तथोक्तः, अन्यत्र साधवो नानाविधाः पतन्तः सिध्यन्तः शब्दास्सुबन्तरूपा यस्य स तथोक्तः रराज ।।३७।।

लतातालतरुरूतशोभिभिः शोभनो नभः ।
यातोऽतोयाधरोऽरोधकोलो लोकोत्तमो मतः ।।३८।।

लतातालतरुरूतशोभिभिः शोभनः ।नभः ।

यातः । अतोयाधरः । अरोधकोलः । लोकोत्तमः । मतः ।

लतेति। लताभिश्च तालतरूभिश्च तरूर्यथा तथा ऊतः प्रोतः आक्रान्त इति यावत्, स चासौ शोभि चेति विशेषणकर्मधारयः इति

शोभनः नभोयातः' अभ्रङ्कषः न धरतीत्यर्थः। तोयस्य अधरः तोयाधरः स न भरतीत्यतोयाधरः। निर्झरादिजलाशयवानित्यर्थः। अरोधकोलः निर्विरोधवराहः 'कोलः पोत्री किरः किटिरि'त्यमरः। लोकोत्तमः भूलोकश्रेष्ठः मतः सर्वेषां विहारभूमित्वेन सम्मतः यश्चित्रकूटः आबभाविति पूर्वेणान्वयः ॥३८॥

सिंहनादसमाकीर्णो भृगुवंशविवर्धनः ।
जामदग्न्य इवाभाति यः कषन् राजमण्डलम् ॥३९॥

सिंहनादेति। यश्चित्रकूटः सिंहनादेन समाकीर्णः अन्यत्र सिंहनादेन युद्धकालक्रियमाणध्वनिविशेषेण समाकीर्णः सन्, भृगुषु सानुषु वंशाः वेणवः तान् विवर्धयतीति विवर्धनः। अन्यत्र भृगुमुनिकुलविवर्धनः सन् राजमण्डलं चन्द्रमण्डलं कषन् स्पृशन् अन्यत्र राजमण्डलं क्षत्रियसमूहं कषन् निरून्धन् अतएव जामदग्न्य इव परशुराम इव आभाति इदानीमपीति शेषः। श्लेषानुप्राणितोपमालङ्कारः ॥३९॥

उदितेऽर्के प्रयात्यस्तमिन्दौ यो वेणुकेतनः ।
अनुचक्रे रथं दिव्यं चक्रद्वितयकीलितम् ॥४०॥

उदित इति। वेणवः एव केतनानि यस्य तथोक्तः यश्चित्रकूटः अर्के उदिते सति इन्द्रौ चन्द्रे अस्तं प्रयाति सति चक्रद्वितयेन रथाङ्गद्वयेन कलितं दिव्यं रथम् अनुचक्रे अनुकृतवान् रामजयार्थी द्विचक्रो दिव्य रथ इव स्थित इति भावः ॥४०॥

दीनसारसभारासा साराभा सरसा नदी ।
तस्य का च दरारावा वारारादचकास्यत ॥४१॥

दीनसारसभारासा । साराभा । सरसा । नदी ।
तस्य । का । च । दरारावा । वारा । आरात् । अचकास्यत ।

(पादप्रतिलोमम्)

देनेति। तस्य चित्रकूटस्य आरात् समीपं दीनसारसभारा सादिना सारसभाराणां हंससमूहानाम् आसा स्थानी यस्या सा तथोक्ता,

रामवनवासं दृष्ट्वा पक्षिणामपि दैन्यमागतमिति (भावः) भासः सारा श्रेष्ठा आभा कान्तिर्यस्यास्सा, रसा माधुर्यरससहिता दरारावा दरः मन्दः आरावो ध्वनिर्यस्यास्सा तथोक्ता का च नदी कापि नदी मन्दाकिनीत्यर्थः। वारा जलेन अचकास्यत प्रकाशिता। कासृदीप्तावित्यस्मात् कर्मणि लङ्। पादप्रतिलोमम्।।४१।।

अध्यारोहति रामे तमयोध्यामेत्य कोविदः।
सुमन्त्रस्तस्य वृत्तान्तैः स्वर्गमारोहयन्नृपम्।।४२।।

अध्यारोहतीति। तं चित्रकूटं रामे अध्यारोहति सति कोविदः राम वृत्तान्ताभिज्ञः सुमन्त्रः अयोध्यामेत्य प्राप्य तस्य[1](?) रामस्य वृत्तन्तैः वनवासवार्ताकथनैः नृपं दशरथम् आरोहयत् आरोपितवान् रामवार्तां श्रुत्वा दशरथः मृत इति भावः।।४२।।

अराजके तदावासाः केवलं न कपाटिताः।
अयोध्यायां धनाढ्यानां मुखपद्मा नृणामपिं।।४३।।

अराजक इति। तदा तस्मिन् समये अयोध्यायां अराजके सति धनाढ्यानां नृणां वासा एव केवलं न कपाटिता किन्तु मुखपद्मा अपि कपाटिता। अराजके धनिका भाषितुमपि बिभ्यन्ति स्मेति भावः।।४३।।

मन्त्रिणो वीक्ष्य तद्धूत मन्त्रैर्मातुलमन्दिरात्।
तमाकर्षन् प्रयोगज्ञाः भरतं सानुजं हितैः।।४४।।

मन्त्रिण इति। प्रयोगज्ञा अन्यत्र राज्यकार्यविचारज्ञा अन्यत्र उच्चाटनाकर्षणादि षड्विधप्रयोगज्ञाः मन्त्रिणः अमात्याः मान्त्रिकाश्च तत् अराजकं वीक्ष्य हितैः (हुतैः) इष्टैः अन्यत्र अवर्णचक्रसिद्ध-सुसिद्धादिशुभकोटिपतितैः हूता मन्त्रास्तैः[2] (आहूता मन्त्रास्तैः) मातुलमन्दिरात् सानुजं सशत्रुघ्नं भरतम् आकर्षन् आकृष्टवन्तः अन्यत्र आकर्षणप्रयोगं चक्रुः।।४४।।

१- तारास्य, 'क'
२- दूत्वावमन्त्रास्तैः। 'क'

इनेन रहिता गाढदिग्धूमतमसावृता ।
अयोध्या द्यौरिवास्फारा प्रपेदे भरतेन्दुना ।।४५।।

इनेनेति । भरत एव इन्दुस्तेन भरतेन्दुना इनेन स्वामिना रहिता गाढं निबिडं दिग्धूम एव तमः[१] तेन आवृता अन्यत्र दिग्धूमसदृशतमसा अतएव अस्फारा अप्रकाशमाना द्यौरिव स्थिता अयोध्या प्रपेदे ।।४५।।

द्वाभ्याम् अयोध्यां वर्णयति -

विवारहाहारवाविवादमाननमा दवा ।
रमारतातारमारहानतातततानहा ।।४६।।

विवारहाहारवाविवाविवादमाननमा । दवा ।
रमारता । अतारमारहानताततता । अनहा ।

(सर्वतोभद्रबन्धः)

विवारेत्यादिना । वियतः वारो निवारणं येषां ते विवाराः ते च तेहा हारवा हाहाकाराः तान् अवन्ति पुष्णन्ति कुर्वन्तीतिहाहारवाविनः जनाः तेषां वादाः श्लोकवाक्यानि तेषां मानः प्रमाणमिति भार इति यावत् तेन नमन्तीति नमा, अत एव (दुनोतीति दवा)[२] दुन्वन्तीत्यर्थः... (?) अतएव, रामायामरता अनिरता (?)[३] अलक्ष्मिकेत्यर्थः ([४]अतारमारहानम् अतारे तरणरहिते तरितुमशक्ये, मारहानं मरणहानिः यस्य स तथोक्तः । स चासौ तातः दशरथस्तस्य नता व्याप्ता अत्र हानिशब्देन पुत्रविवासादिकं विवक्षितमिति न पौनरुक्त्यम् । अनहा नह्यति सन्नह्यतीति नहा सा न भवतीत्यनहा ।

१- मतः, 'क'
२- दुनोतीति, 'क'
३- अवनिता, 'क'
४- 'अतारहानना तातं तेनामारहानं मरणहानी अतारे तरणरहिते तरितुमशक्ये मानहाने यस्य स तथोक्तः स चासौ ततो दशस्तिनतं ता व्याप्ता अत्र आनिशब्देन पुत्रविवासादिकं विवक्षितमिति न पौनरुक्त्यम् अनहानह्यति सन्तह्यतीति न हा सा न भवतीत्यनहा सन्नाहरहितेत्यर्थः । 'इति मातृकापाठः'

सन्नाहरहितेत्यर्थः। ईदृग्विधा अयोध्या प्रपेदे इति पूर्वेणान्वयः। अत्र वदनह (शब्दौ पचाद्यजन्तौ)[१] सर्वतोभद्रबन्धः, तदुद्धारप्रकारस्तु चतुरङ्गपालिं लिखित्वा चतसृषु विधिषु पादचतुष्टयं क्रमेण लिखेत्। अवशिष्टासु चतसृषु पुनरवरोह[२] क्रमेण पादचतुष्टयं विलिखेत् एवं लेखने सर्वतोभद्रभ्रमणं भवतीति संक्षेपः ।।४६।।

सा रागाददगा रासा राजिताहि हिताजिरा ।
राका वाशशवाकाराराजिकागगकाजिरा ।।४७।।

सा। रागाददगा। रासा। अराजिता। अ(ह) हिताजितरा।
राका। वा। अशशवाकारा। अराजिका। अगगकाजिरा।।

सेति। सा प्रसिद्धरागेण अदन्ति भुञ्जत इति रागादन्ति तानि च तानि अगाराणि च अगारशब्देन तन्निष्ठा जना लक्ष्यन्ते तानि अस्यति क्षिपतीति रागाददगारासा रामविवासदुःखेन भुञ्जानान् निषेधन्तीत्यर्थः। राजिताश्च अहयश्च सर्पास्तेषां हितानि इष्टानि अजिराणि गृहाङ्गणानि यस्यां सा तथोक्ता गृहाङ्गणेषु सर्पास्सञ्चरन्तीति भावः। अराजका राजरहिता अतएव शशंशंसतीति (?) शशवः चन्द्रः तस्य आकारः शशवाकारः स न विद्यते यस्यां सा अशशवाकारा राका वा राकेव चन्द्रहीना पौर्णमासीव स्थितेत्यर्थः। अगा वृक्षाः तान् गच्छतीत्यगगका काजिरा ईषज्जरा (?) यस्यां सा तथोक्ता, अराजिके वृक्षाणामपि ईषज्जरा सम्भवन्तीति भावः। एतादृशीप्रपेद इति पूर्वेणान्वयः। अर्धपादप्रतिलोमम् ।।४७।।

वनान्तरं गतं रामं पितरं भुवनान्तरम् ।
घनात्यये चातकवदाकर्ण्य भरतोऽखिदत् ।।४८।।

वनान्तरमिति। भरतः वनान्तरं गतं रामं भुवनान्तरं गतं पितरं चाकर्ण्य घनात्यये चातकवत् अखिदत् जीर्णवान् (खेदं प्राप्तवानित्यर्थः ?) पुषादित्वादङ् ।।४८।।

१- वदनहशङ्गा पयाधचं तौ, 'क'
२- सुनरवराह, 'क'

तते तातेऽतीततातेतातताततेति तुत्ततिम् ।
ततोऽतत्त ततैतत्ते ततातत्तातिते ततः ।।४९।।

तते । ताते । अतीतताते । तात । तात । इति । तुत्ततिम् ।
ततः अतत्त । ततैतत्ते । तता तत्तातिते । ततः ।।

(एकाक्षरी)

तत इति । ताते दशरथे, अतीतता अतीतत्त्वं मरणम् अतीत प्राप्नोत । व्यतीतताते सति । 'अत सातत्यगमनम्' इत्यस्मात् पचाद्यच् । अतत्त ततैतत्ते न विद्यते तत्त तत्त वाद्यानुकरणशब्दविशेषो यस्मिन् तत्तथोक्तं तस्मिन् ततात्तातिते, ततं वीणावाद्यं तस्य अतत्ता अपूर्वावस्था ताम् अतीतं प्राप्तं तत्तथोक्तं तस्मिन् तते विस्मृते ततः तस्मिन् अयोध्यानगरे सार्वविभक्तिकस्तसिल् प्रत्ययः । तातताततितुत्ततिं हि हे पितः हे पित इति (?)[१] व्यथापरम्परा । तु शब्दो भावेक्विबन्तः । तुद् व्यथन इति धातोरुत्पन्नः । तातः कृतवान् । कर्तरि क्तः । भरत इति शेषः । एकाक्षरी ।।४९।।

गुर्वाज्ञया पितुस्तस्मिन् कुर्वाणे पारलौकिकम् ।
मन्थरादीन् स किंकृद्धश्शत्रुघ्नहरिरैक्षत ।।५०।।

गुर्विति । तस्मिन् भरते गुर्वाज्ञया वसिष्ठाज्ञया पितुः पारलौकिकं परलोकसाधनं कर्म कुर्वाणे सति शत्रुघ्न एव हरिः सिंहः क्रुद्धः सन् मन्थरादीन् (जनान्)[२] ऐक्षत दृष्टवान् ।।५०।।

करेणालम्ब्य शिरसि गलत्पुष्पं चलद्रजः ।
विचकर्ष रुष दासीं वल्लरीमिव वारणः ।।५१।।

करेणेति । स शत्रुघ्नः दासीं मन्थरां वल्लरीं लतां वारणः गज इव करेण निजहस्तेन तुण्डेन च शिरसि केशेषु शिरोभागे च आलम्ब्य गृहीत्वा गलत्पुष्पं स्रस्तकुसुमं चलद्रजः चलत् रजः भूरजः पुष्परजश्च यस्मिन् कर्मणि तत्पुरुषो रोषेण विचकर्ष आकृष्टवान् ।।५१।।

१- हपित हेपितरेति, 'क'
२- मन्थरैव शुक्तितां, 'क'

तं वारयित्वा भरतो रामं नेतुमनाः पुरीम् ।
ययावनीतिमार्गेण नीतिमार्गेण चाटवीम् ।।५२।।

तमिति। भरतः तं शत्रुघ्नं वारयित्वा रामं पुरीं नेतुमनाः प्रापयितुमनाः अनीतिमार्गेण नीतिमार्गे(ण) च अटवीं ययौ। अनीतिमार्गेण नीतिमार्गेण चेत्यत्र शब्दतो विरोधः प्रतीयते। (नार्थतः इति) विरोधाभासोऽलङ्कारः ।।५२।।

चञ्चलासिलताचापशरजालोज्ज्वला चमूः ।
पर्जन्यमिव गर्जन्ती मेघमाला तमन्वगात् ।।५३।।

चञ्चलेति। चञ्चलाभिः लोलाभिः असिलताभिश्च चापैश्च शरजालैश्च उज्ज्वला अन्यत्र असिलता इव चञ्चलाः विद्युतः चञ्चलासिलताः ताभिश्च चापेन इन्द्रचापेन च शरजालैः जलधाराभिश्च उज्वला गर्जन्ती कोलाहलं कुर्वन्ती अन्यत्र गर्जितानि च । कुर्वन्ती चमूः तं भरतं मेघमाला पर्जन्यं वरुणमिव अन्वगात् अनुसृतवती। इणो गालुङि[1]ति गादेशः ।।५३।।

हयेनलालानयेह येनगा ननगा नय ।
नगानिजाजा निगानला नजागगजानला ।।५४।।

हयेनलालानया । इह । या इनगा । ननगा । नय ।
नगानिजा । अजा । निगानला । नजागगजानला ।।

(सर्वतोभद्रबन्धः)

एकेन श्लोकेन सेनामेव वर्णयति- हयेनेति। इह भुवि हयानाम् इनाः हयेनाः उत्तमाश्वाः तेषां लाला। जिह्वाजलं तं नयति प्रापयति हयेनलालानया भूपतितलालायुक्तो उत्तमाश्वा इत्यर्थः। इनगा स्वाभिमाना धावन्तीत्यर्थः। नये नीतौ ननगा न गच्छन्तीति न, किन्तु गच्छन्त्येवेत्यर्थः। नीतिमार्ग एव गच्छन्तीत्यर्थः। नगानां मार्गस्य वृक्षाणाम् अनिजा अस्वकीया विरोधिनो वृक्षान् भञ्जनेति यावत् अजा अनादिमूलबलात्मिकेत्यर्थः। निगानलानजा नितरां गानं तस्य लानम्

१- अष्टाध्यायी २।४।५४

आदानं तदाकारः तेन जा(य)ते प्रादुर्भवतीति निगानलानजा भरतगुणान् गायन्तीत्यर्थः। अगगजानला अगाः पर्वताः तत्सदृशा गजास्त एव अनला यस्यां सा तथोक्ता ये। दारुणत्वेन गजानामनलसाम्यं बोध्यम्। या सेना अन्वगादिति पूर्वेणान्वयः सर्वतोभद्रबन्धोद्धारप्रकारस्तु पूर्वमेवोक्तः ॥५४॥

पृतना वासवी वासीदुच्चैरावणवारणा ।
गुहेन लालिता गङ्गाकूले सा भारती चमूः ॥५५॥

पृतनेति। उच्चैरावयन्ति ध्वनयन्तीति उच्चैरावणाः वारणाः गजा यस्यां सा तथोक्ता। अन्यत्र उच्चैः उन्नतः ऐरावणवारणो ऐरावताख्यगंजो यस्यां सा, तथोक्ता भारती भरतसम्बन्धिनी सा चमूः वासवी इन्द्रसम्बन्धिनी पृतनेव सेनेव गङ्गाकूले जाह्नवीतटे अन्यत्र मन्दाकिनीतीरे गुहेन गुहनामकेन निषादाधिपतिना अन्यत्र कुमारस्वामिना लालिता आसीत् ॥५५॥

सहायशस्तूलजालैः कैकेय्याः शिबिरे कुटीं[1] ।
चित्रं तरन्ती सा गङ्गां दीपयामास वाहिनी ॥५६॥

सहेति। गङ्गां तरन्ती सा वाहिनी चमूः नदी चेति व्यज्यते। शिबिरे सेनानिवेशे कुटीं वाणी कुटी(?) कुटिलावाणीं तां कैकेय्या अयशस्तूलजालैः अपकीर्तितूलसंघैः सह दीपयामास ददाह। चित्रम् अश्चर्यं वाहिन्याः दाहकत्वमिदमाश्चर्यकरमिति भावः। भरतस्य रामं प्रत्यभिगमनेनैव कैकेय्यपकीर्तिरपि अपगतेति भावः। उत्तरत्र कुशलसिद्ध्यर्थं सैनिकाः सेनानिवेशं दहन्तीति किंवदन्ती ॥५६॥

प्रयागं प्राप्य कामैः स्वैर्मुनिना तर्पितान्यथ ।
बलान्यपि बलान्यापुर्भारतानि सुदानिना ॥५७॥

प्रयागमिति। अथ अनन्तरं भारतानि भरतसम्बन्धिनी बलान्यपि सैन्यान्यपि प्रयागं प्राप्य सुदानिना दानशीलेन मुनिना भरद्वाजेन स्वैः

१- कुटी, 'क'

स्वकीयैः (कामैः) मनोरथैः तर्पितानि तृप्तिं प्रापितानि सन्ति। बलाः बलानि सत्वानि आपुः। बलानामपि बलप्राप्तिराश्चर्यकरीत्यपि शब्देनैव द्योतते ।।५७।।

तीर्त्वा कलिन्दजां वीतलाघवाश्रममापगाम् ।
तदादिष्टां ततः सेना राघवाश्रममाप गाम् ।।५८।।

वीतलाघवा। आश्रमम्। आपगाम्। राघवाश्रमम्। आप। गाम्।

तीर्त्वेति। ततोऽन्तरं वीतलाघवं यस्याः सा तथोक्ता भरद्वाजाद्गौरवप्राप्तिरिति भावः। सेना भरतसेना कलिन्दजामापगां नदीं यमुनाम् अश्रमं श्रमरहितं यथा तथा तीर्त्वा तेन भरद्वाजेन आदिष्टां कथितां राघवस्य रामस्याश्रमम् आश्रमभूतां गां भूमिमाप प्राप। पादयमकम्।। ५८ ।।

पस्पन्दे भरतेनाराद्ववन्दे रघुनन्दनः ।
निनिन्दे बहुधा माता ननन्दे हृदि साधुना ।।५९।।

पस्पन्दे (इ)ति। साधुना भरतेन कर्त्रा आरात् समीपं पस्पन्दे प्रचले स्पन्देर्भावे लिट्। रघुनन्दनो ववन्दे वन्दितः। वन्देः कर्मणि लिट्। बहुधा बहुभिः प्रकारैर्माता कैकेयी निनिन्दे निन्दिता। हृदि हृदये ननन्दे नन्दितं रामचन्द्रपादारविन्ददर्शनादिति[१] भावः ।।५९।।

वाराचक्रे पितुर्धीमानिवापन्नयनाटिना ।
अथ रामो नदीवारा नीवापन्नयनाटिना ।।६०।।

वारा। चक्रे। पितुः। धीमान्। इव। आपन्नयनाटिना।
रामः। नदीवारा। नीवापम्। नयनाटिना।।

वारेति। अथानन्तरं धीमान् रामः आपन्नयम् आपत्कालनीतिं नाटयतीति आपन्नयनाटितेन नयनाटितानि नयनाभ्याम् अटति स्रवतीति नयनाटितेन हि नयनवारा जलेन अश्रुजलेन नदीवारा[२] मन्दाकिनीजलेनेव पितुः दशरथस्य नीवापं तर्पणं चक्रे। पित्रादिमरणकाले अश्रुमोचनस्य कर्तव्यत्वेन विधानात्, तेन पितृतृप्तिरिति ।।६०।।

१- सन्दर्शनाद्धि, 'क'
२- नदीवारे, 'क'

ननाम स महारामं राज्यदित्सुर्महीधरः ।

न नाम समहाः रामं लेभे लोभोऽपि किञ्चन ।।६१।।

ननाम । सः । महारामम् । न नाम । समहाः । रामम् ।

लेभे । लोभः । अपि । किञ्चन ॥

(ननामेति ।) स तेजस्कः स महीधरो भरतः राज्यं दित्सुः दातुमिच्छुस्सन् स निमीमे अङ्घ्रिसमीपे इसादेशः महानाम उत्सवानामारामं निधिभूतं ननाम नतवान्। लोभः राज्यलोभः रामं किञ्चनापि किञ्चिदपि न लेभे। नामशब्दो वाक्यालङ्कारे.... (?) भरतेन दीयमानं राज्यं रामो न स्वीकृतवानित्यर्थः। पादयमकम् ॥६१॥

नाचकांक्षि महीं रामः प्रार्थितो बहुधामुना ।

नियोगं गुरुणा दत्तं गुरवो न त्यजन्ति हि ।। ६२।।

नेति। रामः अमुना भरतेन बहुप्रकारैः प्रार्थितस्सन् महीं भूमिं नाचकांक्षे न कांक्षितवान्। तथाहि गुरवो महान्तः गुरुणा पित्रादिना देशिकेन दत्तं नियोगमाज्ञं न त्यजन्ति किन्तु परिपालयन्त्येवेति भावः। अत्र गुरवः प्रभाकरमतानुसारिणो गुरुणा प्रभाकरेण दत्तं प्रतिपादितं नियोगं वाक्यार्थभूतमपूर्वं न त्यजन्तीति च व्यज्यते। अर्थान्तरन्यासोलङ्कारः ॥६२॥

निदधे भूभरं सद्यः स निजे पादुकायुगे ।

यस्य भूपकिरीटानि भूषयन्ति रजोभराः ।।६३।।

निदध इति। सः रामः सद्यः निजपादुकायुगे भूभरं भूभारं निदधे निहितवान्। पादुकायुगमेव भूपालीकृतवानित्यर्थः। ननु रामपादुकायुगलस्य भूपरिपालनसामर्थ्यं कुत इत्याशङ्क्याह। यस्येति। यस्य पादुकायुगलस्य रजोभराः रेणुनिचयाः भूपकिरीटान् राजमौलीन् भूषयन्ति अलङ्कुर्वन्ति अतस्तस्य तस्सामर्थ्यम्। किंवात्राश्चर्यमिति भावः॥६३॥

हरिदन्तरदन्तीन्द्रं दन्तसन्ततिदन्तुरम् ।
रामचन्द्रयशोजालं विशालं यद्दधाविव ।।६४।।

पादुकायुगलमेव श्लोकत्रयेण वर्णयति ।-

हरिदन्तेति। हरिदन्तरेषु दिगन्तरेषु दन्तीन्द्राः गजश्रेष्ठाः तेषां दन्तानां दन्तशकलानं सन्तत्या पङ्क्त्या दन्तुरं उन्नतोन्नतं खचितमित्यर्थः। यत्पादुकायुगलं विशालं रामचन्द्रयशोजालं दधाविवेत्युत्प्रेक्षा। पादुकायुगलस्य दिग्गजदन्तकलितत्वेन वस्तुना सकलदिग्विजयसामर्थ्यं वस्तु व्यज्यत इति वस्तुध्वनिः ।।६४।।

यच्चारुशिखरस्फारहीरोदारमरीचिभिः ।
फणागणभृतक्षोणीं जहासेवाहिवल्लभम् ।।६५।।

यदिति। यत्पादुकायुगलं चारुणोः शिखरयोः स्फाराणां प्रकाशमानानां हीराणां वज्राणाम् उदाराभिः मरीचिभिः कान्तिभिः' हेतुभिः फणागणेन भोगसहस्रेण भृता क्षोणीर्यस्य स तथोक्तः तम् अहिवल्लभं शेषं जहासेवेत्युत्प्रेक्षा। त्वया फणसहस्रेण भृता भूमिः मया शिखरद्वयेनैव भृतेति शेषं जहासेवेत्यर्थः ।।६५।।

शिखरोपरि कीर्णाभिर्यदिन्द्रोपलकान्तिभिः ।
भृत्वा विश्वम्भराभारं बभारेवाम्बरस्थलम् ।।६६।।

शिखर इति। यत्पादुकायुगलं शिखरयोरुपरि कीर्णाभिः व्याप्ताभिः इन्द्रोपलकान्तिभिः इन्द्रनीलमणिकान्तिभिः हेतुभिः विश्वम्भराभरं भूभारं भृत्वा अम्बरस्थलं गगनस्थलं बभारेवेत्युत्प्रेक्षा। अनेन रामपादुकायुग्मस्य सकललोकभरणसामर्थ्यं व्यज्यते। इत्यलङ्कारेण वस्तुध्वनिः ।।६६।।

निधाय भरतो मूर्ध्नि नन्दिग्राममुपाययौ ।
मुदा तत्पादुकाद्वन्द्वं नन्दिग्रामकृतस्तवम् ।।६७।।

निधायेति। भरतः नन्दिग्रामैः मागधसमूहैः कृतस्तवो यस्य स तथोक्तं पादुकाद्वन्द्वं मुदा सन्तोषेण मूर्ध्नि निधाय नन्दिग्राममुपाययौ उपागतः ॥६७॥

जनाना जननी नाना निजाजनि जनी जनौ ।
रिपुरैपे परापारे पौरपूरपुरे पुरा ॥६८॥

जानाना। जननी। नाना। निजा। अजनि। जनी। जनौ।
रिपुरैपे। परा। अपारे। पौरपूरपुरे। पुरा॥

(चतुरक्षरी)

जानानेति। निजा स्वकीया परा उत्कृष्टा, जानाना विवेकसम्पन्ना, नाना अनेका, जननी जनन्यः जातावेकवचनम्। पुरा पूर्वम् रिरुरैपे रिपूणां रायं धनं पिबतीति रिपुरैपस्तस्मिन्। जननीनां स्त्रीणां जनावुत्पत्तिस्थाने अपारे विस्तीर्णे पौरे नागरजनैः पूर्यत इति पौरपूरं तस्मिन् पुरे अयोध्यायाम् अजनि जाता स्थितेत्यर्थः। जननीवर्गस्याङ्के स्थित इति भावः। जनेः कर्तरि णिच्। चतुरक्षरी ॥६८॥

रामोऽपि विहरन्नद्रौ काञ्चनागमदारुणे ।
मेराविव मुदं पूषा काञ्चनागमदारुणे ॥६९॥

काञ्चन[1]। अगमत्। आरुणे। काञ्चनागमदारुणे।

राम इति। रामोऽपि काञ्चनवृक्षैः दारुणे भीषणे आरुणे गैरिकादिधातुभिस्समन्ताद्रक्तवर्णे अद्रौ चित्रकूटे मेरौ पूषेव सूर्य इव विहरन् काञ्चन कामपि अनिर्वाच्यां मुदम् अगमत् प्राप्तः गमेर्लुट्॥६९॥

स्तनकोकस्पृशं पत्न्याः काकं पाकारिजं विभुः ।
तृणकोणेन बाणेन काणीचक्रे क्षणाद्द्विजम् ॥७०॥

स्तनेति। विभुः रामपत्न्याः सीतायाः स्तनकोकौ स्पृशतीति स्तन कोकस्पृक् तं पाकारिजं इन्द्रोत्पन्नं काकं नाम द्विजं पक्षिणं

१- अकाञ्चन, 'क'

ब्राह्मणमिति च गम्यते तृणकोणेन तृणाग्रेण बाणेन ऐषिकास्त्रेणेत्यर्थः। क्षणात् काणीचक्रे। अक्षिहीनी कृतवानित्यर्थः। राजापराधिनो द्विजस्य नेत्रदण्डनौचित्यादिति भावः ।।७०।।

अथ सन्त्यज्य तं रामः सिषेवे तापहारिणम् ।
सुधांशुजननस्थाननयनं मुनिपुङ्गवम् ।।७१।।

(अथेति।) अथ रामः चित्रकूटं सन्त्यज्य सुधांशोः चन्द्रस्य जननस्थानं उत्पत्तिस्थानं नयनं यस्य तं तथोक्तम् अतएव तापहारिणं मुनिपुङ्गवं मुनिश्रेष्टम् अत्रिमित्यर्थः। सिषेवे सेवितवान् ।।७१।।

रामं सहर्षं क्षमया विधूतस्थिरानसूया रचिताङ्गरागा ।
सन्ध्यारुणी द्यौरिव मैथिली सा स्थिरानसूया रचिताङ्गरागा ।।७२।।

विधूतस्थिरा। अनसूया। आर। चिताङ्गरागा।
स्थिरा। अनसूया रचिताङ्गरागा।

राममिति। क्षमया शान्त्या विधूता तिरस्कृता स्थिारा भूमिः यया सा विधूतस्थिरा, अनसूया असूयारहिता सा मैथिली सीता स्थिरः अनुसूयया आत्रिपत्न्या रचितः अङ्गरागः कुङ्कुमादिगन्धानुलेपनं यस्यास्सा, तथोक्ता सती अतएव सन्ध्यया अरुणा रक्तवर्णा द्यौरिव स्थिता सती चितः उपचितः वर्धितः इति यावत्। अङ्गे शरीरे रागः अनुरागो यया सा तथोक्ता सती सहर्षं रामम् आर प्राप्तवती। अनसूया गृहादिति भावः ।।७२।।

संहर्तुमुद्यम्य स राक्षसालिं भयानकोद्यद्भुजदण्डकायाम् ।
अखण्डकोदण्डकलाप्रचण्डो विहारमाकांक्षत दण्डकायाम् ।।७३।।

संहर्तुमिति। अखण्डायां कोदण्डकलायां धनुर्विद्यायां प्रचण्डः प्रवीणः सः रामः भयानकाः उद्यन्तः विलसन्तः भुजदण्डाश्च काया शरीराणि च यस्यास्सा तथोक्ता तां राक्षसानामलिं पङ्क्तिं संहर्तुमुद्यम्य उद्युज्य दण्डकायां दण्डकावने विहारं सञ्चारकेलिम आकांक्षत कांक्षितवान् ।।७३।।

वीरलक्ष्मीसखाथो तृतीयः स्वयम् रक्षसां कारणं केचराकारणम् ।
चण्डतेजा इव व्योम रामोऽविशच्चण्डधूकाननं दण्डकाकाननम् ।।७४।।

इति श्रीचरकूरिकोण्डुभट्टोपाध्यायपौत्रेण यज्ञानारायणभट्टतनयेन वेङ्कटेश्वरेण सर्वाम्बिकागर्भशुक्तिमुक्तामणिना विरचिते चित्रबन्धरामायणे महाकाव्ये अयोध्याकाण्डकथा सम्पूर्णा द्वितीयः सर्गः ।।

वीरेति । अथ अनन्तरं वीरलक्ष्म्याः सखा वीरलक्ष्मीसखः वीरलक्ष्मीसहित इत्यर्थः । स्वयं तृतीयः ससीतालक्ष्मण इत्यर्थः । रामः राक्षसां विराधादिराक्षसानां कारणं निधानं खेचरान् पक्षिणः आकारयन्तीति (तं) खेचराकारणं जटायुमुख्यविहंगाक्रान्तमित्यर्थः । चण्डानि (भ) यदाकारभयङ्कराणि धूकानामाननानि मुखानि यस्मिन् तत्तथोक्तं दण्डकाकाननं चण्डतेजः उष्णरश्मिः व्योमाकाशमिव अविशत् प्रविष्टवान् ।।७४।।

इति श्रीचरकूरियज्ञनारायणभट्टविरचितायां
चित्रबन्धरामायणव्याख्यायां द्वितीयः सर्गः ।।

❖❖❖

तृतीयः सर्गः

अथ रामो ददर्शाघिस्वान्ताभं तमसाकुलम् ।
परभूदारनिरतं हरिद्वेषपरायणम् ।।१।।

अथेति । अथ अनन्तरं रामः तमसाकुलम् अतएव अघिनः पापिनो जनस्य स्वान्ताभं चेतोनिभम् अतएव परभूदारनिरतं परेषां भूदारेषु क्षेत्रकलत्रेषु निरतमासक्तं परभूदारनिरतं काननमिति विशेष्यमुत्तरत्र वक्ष्यते ।[१]परा श्रेष्ठ भुवं दारयन्तीति भूदाराः वराहाः तैर्निरन्तरसम्पूर्णम्, अन्यत्र हरिद्वेषपरायणं हरिद्वेषाः वा(रा) हद्विषन्तः महिषा इत्यर्थः । तेषां परायणं मुख्यस्थानं) ददर्श दृष्टवान् ।।१।।

कालेकाले लोलकालिकोलीकलकलाकुलम् ।
लोकालीकं कोकिलाली काकलीकुलकैः कलम् ।।२।।

काले । काले । लोलकालिकोलीकलकलाकुलम् ।
लोकालीकम् । कोकिलाली काकलीकुलकैः । कलम् ।।
(द्व्यक्षरी)

१- एतत्स्थलं द्वितीयसर्गे त्रिसप्ततितमस्य श्लोकस्य टीकायां मातृकायाम् अव्यवस्थया मिलति । तत एव गहीत्वा व्यवस्थितः ।

काल इति। काले काले प्रतिकालं, लोलानां चञ्चलानां कालिनां नीलवर्णानां कोलिनां वाराहिणां कलकलैः आकुलम् लोकानामलीकमप्रियं कोकिलानां पिकपङ्क्तीनां काकलीकुलकैः काकली स्वरसमूहैः कलम् अव्यक्त मधुरम्। द्व्यक्षरी ।।२।।

नानोकः केकिकोकानां नैककाकानकैः कनम् ।
नाकिनां नानकं[1] नैकं कनकाकानि काननम् ।।३।।

नानोकः । केकिकोकानाम् । नैककाकानकैः कनम् ।
नाकिनाम् । नानकम् । नैकम् । कनकाकानि । काननम् ।।

नानेति। केकीनां कोकानां च अनोको न अस्थानन्तु न किन्तु स्थानमेवेत्यर्थः। नैके बहवः ते च ते काकाश्च अतएव आनका वाद्यविशेषाः तैः कनं शोभितं नाकिनां देवानाम् न अकम्। अदुःखकरं न किन्तु दुःखकरमेवेत्यर्थः। वैद्यकसाधारणं कनकैः धत्तूरैः आसमन्तात् कनाति शोभत इति कनकाकानि काननं ददर्शेति पूर्वेणान्वयः। (उ)त्पेक्षते ।।३।।

तत्र सीतां समालोक्य मायामिव विमोहिनीम् ।
आयान्विराधः सम्मूढः स्वगतं प्रत्यभाषत ।।४।।

तत्रेति। तत्र दण्डकारण्ये आयान् आगच्छन् सम्मूढः विराधः मायामिव विमोहिनीं मोहयन्तीं सीतां समालोक्य स्वगतं प्रत्यभाषत स्वयं स्वं प्रत्यवददित्यर्थः ।।४।।

मोमामामामिमामामामिमौ मा মমমা মম ।
मा ममौ मा ममौ मा मे मामा माममुमामुमुत् ।।५।।

मोमामामाम् । इमाम् । आमाम् । इमौ मा ममसा मम ।
मां । ममौ । मा । ममौ । मा मे । मा । अमा । माम् । अमुम् । आमुमुत् ।

(एकाक्षरी)

१- नानके, 'क'

वचनरीतिमेवाह -

मेति। मोमामामां मा लक्ष्मीः उमा पार्वती तयोः अमा परिमाणा मा कान्तिरिव कान्तिर्यस्यास्सा तथोक्ता, ताम् इमां स्त्रियम् आमाम् अध्यगच्छं दृष्टवानहमित्यर्थः। मातेर्भाविलङ्[१]। इमौ रामलक्ष्मणौ मामामाभूतामित्यर्थः। अस्यां नीराजो भवतामित्यर्थः मम मे मममा मनुतां बुद्धिः व्य)ज्यते (इ)ति शेषः। तस्यामितिभावः। मे मम, मा लक्ष्मीः भाग्यमिति यावत्। मामममौमाममो अपरिमिता अपरिमितेत्यर्थः। सम्भ्रमवशाद् द्विरुक्तिः। मे मम अमा अलक्ष्मीः अमा मास्त्रीत्यर्थः। अस्याः प्राप्त्या लक्ष्मीरपि निवर्तत इत्यर्थः। अत एव अमुं माम् अमुमुत् नूतसन्तोषः प्राप्नोतीति शेषः। एकाक्षरी। पूर्वत्र अमेत्यत्र माशब्दः परिमाणवाचको[२] भावे क्विबन्तः ॥५॥

इत्युक्त्वा मैथिलीहेतोर्हत्वा धावन्तमाशु सः।
सुरानाराधयामास विराधमपराधिनम् ॥६॥

इतीति। इति अनेन प्रकारेण उक्त्वा मैथिलीहेतोः सीतार्थम् आशु धावन्तम् अत एवापराधिनं विराधं हत्वा स रामः सुरानाराधयामास सन्तोषयामास। राध्यतेर्ण्यन्ताल्लिट् ॥६॥

शरभङ्गविहीनोऽपि शरभङ्गमुपेत्य सः।
अपि शान्तमनोवृत्तिः सुतीक्ष्णस्याश्रमं ययौ ॥७॥

शरभङ्गेति। स रामः शराणां भङ्गेन विहीनो विरहितोऽपि शरभङ्गं बाणभङ्गमुपेत्य प्राप्य इति शब्दतो विरोधः। शरभङ्गनाममुनिं प्राप्येत्यर्थतः परिहारः। शान्ता मनोवृत्तिर्यस्य स तथोक्तः। तथापि सुतीक्ष्णस्य कोपनशीलस्य आश्रमं ययाविति शब्दतो विरोधः। सुतीक्ष्णनाममुनेः आश्रमं ययावित्यर्थतः परिहारः। विरोधाभासालङ्कारः ॥७॥

१- मातेभषित लङ् 'क'
२- परिमाकोवाचका 'क'

श्रुत्वा पुण्यजनालापं दीनं राक्षसबाधया ।
हन्तुं पुण्यजनानेव प्रत्यजानीत राघवः ॥८॥

श्रुत्वेति । राघवः रामः राक्षसबाधया दीनं पुण्यजनानां सुकृतिजनानाम् ऋषीणामित्यर्थः । आलापं आभाषणं श्रुत्वा पुण्यजनानेव सुकृतिजनानेव हन्तुं प्रत्यजानीतेति विरोधः । पुण्यजनान् यातुधानान् हन्तुं प्रत्यजानीत प्रतिज्ञातवानिति परिहारः । विरोधाभासोऽलङ्कारः ॥८॥

ततो गत्वा सरः किञ्चिदमलाप्सरसाङ्गणम् ।
दधानं राघवोऽपश्यदमलाप्सरसाङ्गणम् ॥९॥

तत इति । तत अनन्तारं राघवः रामः अमलाभिर्मङ्गलाभिरद्भिर्जलैः सरसमार्द्रमङ्गणं पुरो देशो यस्य तं तथोक्तम् । अमराणां देवानाम् अप्सरसां च गणं दधानं किञ्चित्सरः पञ्चाप्सरो नाम सर इत्यर्थः । गत्वा अपश्यत् दृष्टवान् ॥९॥

अगस्त्यभ्रातुरादेशादथ रामो ययौ क्रमात् ।
अवन्ध्याशीर्वचो वीचिं महर्षिं विन्ध्यमर्दनम् ॥१०॥

अगस्त्येति । अथ सरोदर्शनानन्तरं रामः क्रमात् मार्गक्रमात् अगस्त्य-भ्रातुरादेशात् अवन्ध्या अमोघा आशीर्वचसां वीचिः परम्परा यस्य स तथोक्तस्तं विन्ध्यमर्दनं विन्ध्याद्रिनियन्तारं महर्षिमगस्त्यमित्यर्थः ययौ प्राप यातेर्लिट् ॥१०॥

जज्ञे वातापिना तृप्तो मुनिवातापिनाधिना ।
मानवातापिनापारकीर्तिवातापिनाम यः ॥११॥

जज्ञे वातापिना । तृप्तः । मुनिवातापिनाधिना ।
मानवातापिना । अपारकीर्तिवाता । अपि नाम । यः ।

अथ चतुर्भिः श्लोकैः अगस्त्यं वर्णयति -

जज्ञ इति। अपारा याः कीर्तेर्वाता वा गन्तावतेस्तृच् न च तृजकाभ्यां कर्तरीति षष्ठी समासनिषेधः। 'जनिकर्तुः प्रकृतिरितिज्ञापकात्तस्य निषेधस्यानित्यत्वात्। यो नामागस्त्यः नामशब्दो वाक्यालङ्कारे मुनीनां वातान् प्राणवायूना (पिब) तीति मुनिवातापिना मुनिप्राणहारिणेत्यर्थः। मानवान् क्षतापई(य)ति सन्तापयतीति मानवातापिना अतएव अघिना पापिनापि वातापिना वातापिनामकेन रक्षसेन तृप्तो जज्ञे जातः। वातापिनं भक्षितवानित्यर्थः। मध्ययमकम् ।।११।।

घनसारमयेनासीत् साधुवृत्तेन दक्षिणा ।
तिलकेनेव दिग्येन भूषिता विशदात्मना ।।१२।।

घनसारेति। घनसारमयेन अधिकबलप्रचुरेण अन्यत्र कर्पूरमयेन साधुवृत्तं चरित्रं यस्य स तथोक्तः तेन। अन्यत्र साधु यथा तथा वृत्तेन निर्मलेन विशदात्मना शुद्धान्तःकरणेन अन्यत्र शुभ्राकारेण येन अगस्त्येन तिलकेनेव दक्षिणादिग्विभूषिता आसीत्।।१२।।

न केवलं पुराकांक्षि शङ्करोद्वाहमङ्गलम् ।
कल्याणमपि लोकानां येन राक्षसभीभृताम् ।।१३।।

नेति। येन अगस्त्येन पुरा पूर्व शङ्करोद्वाहमङ्गलं ईश्वरविवाहमङ्गलं केवलं नाकांक्षि न कांक्षितम्। 'काङ्क्षतेः कर्मणिलुङ्। किन्तु राक्षसेभ्यो भियं बिभ्रति राक्षसभीभृतः तेषां लोकानामपि कल्याणम् आकांक्षि ।।१३।।

अमरन्दरसीद्यस्य सिन्धुर्हस्तारविन्दगः ।
अलालासलिलीद्येन पीतोऽपि रसनाञ्चले ।।१४।।

अमरन्दरसीति। सिन्धुः समुद्रः यस्य अगस्त्यस्य हस्तारविन्दगः पाणिपद्मगतः सन् अमरन्दरसीत् मरन्दरसइवाचरीत् मकरन्दवाचकान्मकरन्दशब्दात् क्विबन्ताल्लुङ्। येन अगस्त्येन पीतः सन् रसनाञ्चले जिह्वाग्रे अलालासलिलीद् लालासलिलमिव आचारीत्। अत्रापि पूर्ववदेव लालासलिलशब्दाल्लुङ्।।१४।।

चक्रे पर्णकुटीं रामः पञ्चवट्यां तदाज्ञया ।

प्रतापाग्निरिवेहास्य वास्तुहोमानलो बभौ ।।१५।।

चक्र इति। रामः तस्यागस्त्यस्याज्ञया पञ्चवट्यां पर्णकुटीं पर्णशालां चक्रे कृतवान्। इह अस्यां पर्णशालायां वास्तुहोमस्य अनलो वह्निः अस्य रामस्य प्रतापग्निरिव बभौ भाति स्म ।।१५।।

निर्धूताखिलतापापो पापेहासहमानवः ।

नवेऽभूद्विहितारामो रामो गोदावरीतटे ।।१६।।

निर्धूतेति। निर्धूत (:) अखिलानां जनानां तापः याभिस्ताः तथोक्ताः तादृश्यः आपो जलानि यस्य तत्तथोक्तं तस्मिन्। 'ऋक्पूरब्धूः'रित्यादिना अप्प्रत्ययः पापेहां इच्छां न सहन्त इति पापेहासहाः मानवाः यस्मिन् तत्तथोक्तः, तस्मिन् नवे अभिनवे गोदावर्यास्तटे रामः विहितः कृतः आरामः क्रीडा येन स तथोक्ता अभूत् ।।१६।।

तरङ्गकनिते सेभे रञ्जिते मदिराक्षसे ।

गतेऽतिलानं कैराते कमलाकरनन्दिनि ।।१७।।

(अर्धभ्रमकः)

तरङ्गेति। तरङ्गैर्गोदावरीवीचिभिः, कनिते शोभिते, सेभे सगजे, रञ्जिते प्रकाशिते मद एषामस्तीति मदिनो मत्ता, राक्षसा यस्मिन् तत्तथोक्तं तस्मिन् किरातसम्बन्धिनि कैराते, कमलाकरैः तटाकैः नन्दयतीति कमलाकरनन्दी तस्मिन्, गोदावरी तटे गतम् अतिलानं ग(त) इति भावः। स्वीकारो यस्मिन् कर्मणि तत्तथा रामः विहितारामोऽभूदिति पूर्वेणान्वयः। अर्धभ्रमकबन्धः। तदुद्धारप्रकारस्तु पञ्चतिर्यग्रेखाः लिखित्वा सम्पन्नासु चतुस्र्षु विधिषु क्रमेण पादचतुष्टयं लिखेत्। एवं लेखने सति श्लोकप्रथमाक्षरमारभ्य विधिचतुष्टयं क्रमेण द्वितीयतृतीयचतुर्थपादाद्यक्षरेषु पतितेषु सत्सु प्रथमपादस्यार्धं भवतीति श्लोकान्त्यक्षरमारभ्य विधिचतुष्टयं क्रमेण द्वितीयतृतीयप्रथम-

पादान्त्यक्षरेषु पतितेषु सत्सु अवशिष्टं प्रथमपादस्यार्धं भवति एवं द्वितीयादिपादत्रयमपि प्रथमपादवदेव योजनीयमिति संक्षेपः ।।१७।।

इतः परं षड्भिः श्लोकैः हेमन्तं वर्णयति -

हिमरेखासितोष्णीषधारिभिस्तत्र भूधरैः ।
वृतो हेमन्तसमयः सामन्त इव सम्बभौ ।।१८।।

हिमेति। तत्र पञ्चवट्यां हिमरेखा एव सितोष्णीषाणि तानि धारयन्तीति धारिणः तैः, अन्यत्र हिमरेखासदृशसितोष्णीषधारिभिः भूधरैः पर्वतैः, अन्यत्र राजभिः वृतः हेमन्तसमयः हेमन्तकालः सामन्त इव सम्बभौ संरेजे। भातेर्लिट् ।।१८।।

हिमरक्षोहता वह्निं तदा कान्तारवासिनः ।
न केवलमकांक्षन्त रामतेजोऽनलं हि ते ।।१९।।

हिमेति। तदा हेमन्तकाले कान्तारवासिनो वनवासिजनाः हिमेन च रक्षोभिश्च खरादिराक्षसैश्च हतास्सन्तः केवलं वह्निमेव नाकांक्षन्त न कांक्षितवन्तः किन्तु ते वनवासिनः रामस्य तेजोऽनलं प्रतापाग्निं चाकांक्षन्त। रामप्रतापाग्नेरपि रक्षः पीडा निवर्तकत्वादितिभावः ।।१९।।

हरता पद्मिनीशोभां तुहिनेन तिरस्कृतः ।
नूनं दण्डधरं सद्यो मार्तण्डः शरणं ययौ ।।१०।।

हरतेति। सद्यस्तस्मिन् काले मार्तण्डस्सूर्यः पद्मिनीशोभां नलिनीश्रियं हरता स्वपत्निसर्वस्वहरणं च व्यज्यते। तुहिनेन हिमेन तिरस्कृतः अभिभूतस्सन् दण्डधरं देवं यमं दण्डधारिणं राजानमिति च व्यज्यते। शरणं ययौ गतः नूनमित्युत्प्रेक्षा ।।१०।।

द्रुमाश्चन्द्रकरव्रातविगलत्तुहिनोक्षिताः ।
अवर्षन् मिहिकाबिन्दून् मुक्ता इव सुरद्रुमाः ।।२१।।

द्रुमा इति । द्रुमाः वृक्षाः चन्द्रस्य करव्रातेभ्यः किरणसमूहेभ्यः विगलद्भिः तुहिनैः हिमैः उक्षिताः सिक्तास्सन्तः मिहिकाबिन्दून् हिमबिन्दून् सुरद्रुमाः मुक्ता इव अवर्षन् वर्षन्ति स्म । वृषेर्लङ् ॥२१॥

समावृतान्यरण्यानि तुहिनेन तदोषसि ।
सर्वङ्कषतरेणैव यशसा ताटकाद्विषः ॥२२॥

समावृतानीति । तदा हेमन्तकाले उषसि प्रातःकाले अरण्यानि वनानि तुहिनेन हिमेन ताटकाद्विषः रामस्य सर्वङ्कषतरेण यशसेव समावृतानि आच्छादितानि अभवन्निति शेषः ॥२२॥

कासारकमलव्रातैर्निहते हिमवारिणा ।
ईषुर्युवानः कान्तानां वदनाम्बुजसौरभम् ॥२३॥

कासारेति । हिमवारिणा हिमोदकेन कासारकमलव्रातैः सरः सम्बन्धिपद्मसमूहैरिति (नि) हते सति युवानः तरुणपुरुषः कान्तानां कामिनीनां वदना(ना) मम्बुजसौरभं मुखपद्मानां गन्धम् ईषुः इष्टवन्तः। हेमन्तकाले सकल सरोरुहाणां विनाशात् तरुणीमुखपद्मानामेव अत्यन्तविकसितत्वात् यूनां च मदनोद्दीप्तिश्चेति भावः ॥२३॥

हसन्तीव तदारामं हसन्ती रावणस्वसा ।
आससाद नवाकल्पमाणिक्याङ्गारपूरिता ॥२४॥

हसन्तीति । तदा हेमन्तकाले हसन्ती हासं कुर्वन्ती नवेषु आकल्पेषु भूषणेषु माणिक्यानि अङ्गाराणि च तैः पूरिता रावणस्वसा शूर्पणखा नवा कल्पमाणिक्यसदृशैरङ्गारैः पूरिता हसन्तीव अङ्गारशकटीव रामम् आससाद आसन्ना। शूर्पणखायाः कार्यगुणयोगेन हसन्ती साम्यमिति भावः ॥२४॥

स्तनाग्रदामालङ्कारा नाराधिरतिकारिका ।
ग्रथिता भारीतिकालं दारभासुररीतिमा ॥२५॥

ग्रथिताभारीतिका । अलम् ।

(अर्धभ्रमकबन्धः)

सप्तभिः श्लोकैः शूर्पणखामेव वर्णयति -

स्तनेत्ति। स्तनयोरग्रे दामानि हारा विभूषणानि अलङ्कारा यस्यास्सा तथोक्ता। नरसम्बन्धिनी नारा सा च सा अधिकरतिश्च तस्या कारिका कर्त्री मनुष्यरतिं कामयमानेत्यर्थः। अलमत्यर्थं ग्रथिता आभा यया सा तथोक्ता। अरीणां शत्रूणाम् ईतिका ईतिः बाधस्वरूपा च दाराणां भार्यायाः भासुरायाः रीतेः प्रकृतेः मेव मा श्रीरिव श्रीर्यस्यास्सा तथोक्ता भार्यावेषं धृत्वा समागतेत्यर्थः। अर्धभ्रमकबन्धः। बन्धोद्धारप्रकारस्तु प्रागेवोक्तः ॥२५॥

नवस्मितरुचौ यस्या गण्डौ सपुलकाङ्कुरौ।
शशङ्काते पुरस्सम्पदुत्सवाङ्कुरपालिके ॥२६॥

नवेति। यस्याः शूर्पणखायाः या नवस्मितरुक् मन्दहासकान्तिर्ययोस्तौ तथोक्तौ गण्डौ कपोलौ सपुलकाङ्कुरौ पुलकाङ्कुरसहितौ, रामचन्द्रसौन्दर्यं सन्दर्शन् कन्दलितकन्दर्पवशादिति भावः। (पुरः) पुरस्तात् सम्पदेव युद्धमेवोत्सवः विवाहोत्सवः तस्मिन् अङ्कुराणां पालिके अङ्कुरार्पणपात्रे इति शशङ्काते शाङ्कितवन्तावित्यर्थः। अङ्कुरार्पणपालिकानां नवतन्तुसमाक्रान्तत्वदोषप्ररोहप्रचुरत्वतोऽत्र गण्डोपमात्वमिति बोध्यम् ॥२६॥

प्रसरन्नधरे यस्यास्ताम्बूलस्य बभौ रसः।
उद्रेकाद् बहिरुद्गच्छन् रागो रघुपताविव ॥२७॥

प्रसरन्निति। यस्याः शूर्पणखायाः अधरे प्रसरन् ताम्बूलस्य रसः उद्रेकात् बहिरुद्गच्छन् रघुपतौ विषये राग इव बभौ ॥२७॥

विरेजतुः कुचौ यस्याः पीनौ स्वेदकणाञ्चितौ।
रामस्य जययात्रायै पूर्णकुम्भाविवागतौ ॥२८॥

विरेजतुरिति। पीनौ पीवरौ यस्याः शूर्पणखायाः कुचौ स्वेदकणैः अञ्चितौ व्याप्तौ सञ्चितौ रामस्य जययात्रायै खरदूषणादिवधार्थं विजयदण्डयात्रायै आगतौ पूर्णकुम्भाविव विरेजतुः। प्रवसतः पुरुषस्य पूर्णकुम्भाभिगमः विजयहेतुरिति शकुनशास्त्रप्रसिद्धमिति बोध्यम् ॥२८॥

यस्याः सम्भ्रमतो लोलं नासिकामणिकुण्डलम् ।
मत्वा भाव्याश्रयच्छेदं चकम्प इव भीतितः ।।२९।।

यस्या इति। यस्याः शूर्पणखायाः सम्भ्रमतः आगमनसम्भ्रमात् लोलं चञ्चलं नासिकामणिश्च कुण्डलञ्च नासिकामणिकुण्डलं द्वन्द्वैकवद्भावः। भाविनं भविष्यन्तं आश्रयच्छेदं मत्वा भीतितः भयात् चकम्पे इव कम्पते स्मेवेत्युत्प्रेक्षा ।।२९।।

अनर्थकारणं नीवी यस्या बभ्रंश बन्धनम् ।
साक्षात्कारेण रामस्य बन्धो हि परिमुच्यते ।।३०।।

अनर्थ इति। अनर्थकारणं खरादि वधहेतुः यस्याः शूर्पणखायाः नीवेर्बन्धनं बभ्रंश भ्रष्टम्। रामानुरागावेशवशादिति भावः। तथा हि रामस्य साक्षात्कारेण दुःखहेतुः बन्धः परिमुच्यते त्यज्यते। ईश्वरसाक्षात्कारस्य सकलबन्धनिवर्तकत्वादिति भावः ।।३०।।

दृष्ट्वा रोमावली ताली यस्या नाभिसरस्तटे ।
वलीवृता स्तनफला हरिन्मणिरुचिच्छटा ।।३१।।

दृष्ट्वेति। हारेषु हरिन्मणीनां गारुत्मतमणीनां रुचयः कान्तिः एव छटा वर्णानि यस्यास्सा तथोक्ता, स्तनावेव फले यस्यास्सा तथोक्ता, (वलिभिःरेखाभिः)[१] वृता। इदं तालवृक्षपक्षेऽपि समानम्। यस्याः शूर्पणखायाः रोमावलिरेव ताली काललता नाभिसरस्तटे दृष्टा अवलोकिता आविरभूदिति शेषः। सरस्तट इति च ध्वन्यते। लोके कामुकस्त्रियः रोमावलिः स्पष्टं वीक्ष्यते एवेति भावः ।।३१।।

तां ततः कृतदौर्जन्यां लक्ष्मणः खड्गलक्षणः ।
रन्ध्रावशेषितश्रोत्रनासामाशु व्यचीकरत् ।।३२।।

१- बली धर्माधरेकाभिः, 'क'

तामिति । ततः अनन्तरं रामः कृतं दौर्जन्यं मैथिलीतर्जनरूपं यया तां, तथोक्तां तां शूर्पणखां, खड्गलक्षणं खड्गचिह्नं लक्ष्मणं, खड्गधारिणा लक्ष्मणेनेत्यर्थः । 'ह्रक्रोरन्यतरस्यामिति[1] द्विकर्मकत्वम् । रन्ध्रावशेषितं रन्ध्रमात्रावशेषितं श्रोत्रनासं कर्णनासं यस्यास्तां तत्तथोक्तां प्राण्यङ्गत्वादेकवद्भावः । आशु शीघ्रं व्यचीकरत् । (छिन्नं) कारितवान् । करोतेर्णौ लुङ् । कर्णशष्कुलीनासिकाच्छेदः कारित इति भावः ॥३२॥

चचाल सानिनादाथ चलितागमहीनदा ।

लताहराकारहीना सा गरलम्बिकामती ॥३३॥

चचाल । सानिनादा । अथ चलितागमहीनदा ।

लताहरा । आकारहीना । सा । गरालम्बिका । अमती ।

(अर्धभ्रमकबन्धः)

चचालेति । अथानन्तरं सा शूर्पणखा, सानिनादा साधिकरवा चालिताः अगाश्च मही च नदाश्च यया सा तथोक्ता, हरतीति हरा, लतानां हरा उत्पाटितलतेत्यर्थः । आकारहीना विकृताकारा, अमतिने वेद्यते मतिर्यस्मिन् कर्मणि तद्यथा तथा, गरस्य विषस्य आलम्बिका चामती, असूयारूपं विषं हृदि दधाना सतीत्यर्थः । चचला चलितवती । अर्धभ्रमक बन्धः । तदुद्धारप्रकारस्तु प्रागेवोक्तः ॥३३॥

विश्रोत्रया वैश्रवण्या विग्रया व्यग्रया तया ।

खरसेना जगामाशु मृत्युदूत्येव चोदिता ॥३४।

विश्रोत्रयेति । विश्रोत्रया विगतकर्णया विग्रया विगतनासिकया वेर्ग्रो वक्तव्य' इति विपूर्वस्य नासिकाया ग्रादेशः । व्यग्रया त्वरयन्त्या, वैश्रवण्या विश्रवसंसुतया, तथा शूर्पणखया खरसेना मृत्युदूत्येव चोदिता प्रेरिता सती आशु जगाम आगतवती ॥३४॥

१- अष्टाध्यायी १।४।५३

उदारनानानाराचा दानवामतभीकरा ।
रवाढ्यमायायाभीना नाममानितयातना ।।३५।।
रवाढ्यमायाया । अभीना । नाम । मानितयातना ।।

(अर्धभ्रमकम्)

त्रिभिः श्लोकैः खरसेनामेव वर्णयति -

उदारेत्यादिना(ने)ति।) उदाराः नानाविधा नाराचा बाणाः यस्यास्ता तथोक्ता, दानवामतानां भीकरा रवेण कोलाहलेन आढ्यां सम्पन्नां मायाम् आयते गच्छतीति मायायाः अयतेः पचाद्यच् प्रत्ययः । रवाढ्या च सा माया चेति विशेषणसमासः । न विद्यते भीः एषां ते अभियः, अभियः इनाः यस्याः सा अभीना निर्भीकस्वामिकेति यावत्, नामभिः मानिता वर्धिता यातनादिप्रवेदनाय या सा नामश्रवणेनैव परेषामतिवेदनादायिनीत्यर्थः । एवं विधात्मना जगामेति पूर्वेणान्वयः । अर्धभ्रमकम् ।।३५।।

तारकानकसानादा लीना सा जगदायता ।
विदितासिलताहीना मायासाररसाहवा ।।३६।।

(प्रतिलोमम्)

तारकेति । उच्चैः आनकैः पटहैः आनकः पटहो ढक्केत्यमरः । सानादा आनादसहिता सघोषेत्यर्थः, अलीना अपरिच्छिन्ना जगति भुवि आयातीति जगतायता यतेराङ् पूर्वत्वात्पचाद्यच् । विदिताः प्रसिद्धाः असिलताः खड्गलताः ता एव अहीनाः सर्वश्रेष्ठाः यस्यां सा तथोक्ता । मायानां सारैः प्रसारैः रसयुक्ते आहवो युद्धं यस्यां सा मायासाररसाहवा, सा प्रसिद्धिं जगामेति पूर्वेणान्वयः । अनुलोमम् ।।३६।।

वाहसाररसायामा नाहि[1]ता लसिता दिवि ।
तापदा जगसानाली दाना सा कनकारता ।।३७।।
वाहसाररसायामा । नाहि[2]ता । लसिता । दिवि ।
तापदा । गजसानाली दाना । सा । कनकारता ।

१- ही, 'क'
२- ही, 'क'

वाहेति। वाहैः अश्वैः सारा श्रेष्ठाः रसा या भूमेः आयाम इव आयामो यस्यास्सा रसायामा भूमिवद्विपुलेत्यर्थः। वाहसारा च सा रसायामा चेति विशेषणसमासः। नाहिता नाहिनः सन्नाहिनो भटान् हता प्राप्ता नहेर्घ इतादिनिप्रत्ययः। दिवि आकाशे लसिता प्रकाशमाना तापं ददातीति, तापदा, गजानां सानानां तुण्डानाम् अलिभिः पङ्क्तिभिः दानं मदम् अस्य निक्षिपतीति गजसानालीस्तद्भि[१]दाना सा। कनकेन काञ्चनेन आरता व्याप्ता आजगामेति पूर्वेणान्वयः। प्रतिलोमम्॥३७॥

अदर्शि रघुनाथेन चन्द्रहासैर्मुखोदितै।
क्रूरग्रहैर्द्यौरिव सा चन्द्रहासैर्मुखोदितैः॥३८॥

अदर्शीति। रघुनाथेन रामेण मुखेनास्येन उदितैः प्रकाशितैः चन्द्रहासैः खड्गैः मुखैर्भटमुखैरुदितैः उक्तैः विरुतैश्चन्द्रसदृशैर्हासैः अट्टहासैश्च उपलक्षिता। अतएव क्रूरैर्भयङ्करैः ग्रहैः सूर्यादिग्रहैरित्यर्थः। मुखोदितैः रजनीमुखजातैः चन्द्रस्य हासैः प्रकाशैश्च उप(ल) क्षिता द्यौरिव स्थिता सा सेनादर्शि दृष्टा॥३८॥

राघवास्फारितोद्दण्डकोदण्डगुणनिस्वनः।
शुश्रुवे खरवाहिन्यां जयतामिव दुन्दुभिः॥३८॥

(वैदिकश्चतुर्थपादः)

राघवेति। खरवाहिन्याः खरसेनायाः राघवेणास्फालितस्य उद्दण्ड कोदण्डस्य गुणनिस्वनः ज्याघातध्वनिः जायतां जयशीलानां दुन्दुभिरिव शुश्रुवे श्रुतः। वैदिकश्चतुर्थपादः॥३९॥

राममण्डलितं स्फायादट्टहासप्रभाञ्चितम्।
शशङ्के तत्र कोदण्डमौत्पातं चन्द्रमण्डलम्॥४०॥

रामेति। तत्र तस्मिन् समये देशे वा रामेण मण्डलितं कुण्डलितम् अट्टहासं प्रभया अञ्चितं व्याप्तं स्फायात् कोदण्डं जात्या तम्, उत्पात कालोदितं चन्द्रमण्डलं शशङ्के चन्द्रमण्डलमिति शङ्कितमित्यर्थः। मध्यस्थितस्य रामचन्द्र शरीरस्याकलङ्कस्यानघत्वादिति, भयङ्करत्वाच्चेति भावः॥४०॥

१-ल्लि, 'क'

कोदण्डमण्डलीकुण्डे प्रतापानलभासुरे ।
हुताः पलाशाः रामेण सुरप्रीत्यै शरस्रुचा ।।४१।।

कोदण्डेति। शर एव श्रुक् तया उपलक्षितेन रामेण प्रताप एव अनलस्तेन भासुरे कोदण्डमण्डल्येव धनुर्मण्डलमेव कुण्डं (होमस्थानं) तस्मिन् पलाशाः राक्षसाः पलाशाः समिधयश्च सुरप्रत्यै देवतासन्तोषाय हुताः होमेनैव राक्षसवधेन देवतासन्तोषसम्भवादिति भावः ।।४१।।

संग्रामे रजसा भानुरुधि रञ्जितविग्रहः ।
ददृशे राघवः सान्द्ररुधिरञ्जितविग्रहः ।।४२।।

भानुरुधि । रञ्जितविग्रहः ।
सान्द्ररुधिरम् । जितविग्रहः ।।

सङ्ग्राम इति। राघवः रजसा चलरेणुना भानुं रुणद्धि आच्छादयतीति भानुरुध् तस्मिन् सङ्ग्रामे युधि रञ्जितविग्रहः प्रकाशितशरीरस्सन् सान्द्ररुधिरं यथा तथा[1] जितविग्रहः जितकलहः सन् ददृशे दृष्टः। दृशे कर्मणि लिट्।।४२।।

बाणवीचीघने रामकोदण्डबडबामुखे ।
निपेतुर्दारुणारावाः ।खरादिजडजन्तवः ।।४३।।

बाणेति। बाणा एव वीचयः तैर्घने सान्द्रे, रामकोदण्डमेव बडबामुखं तस्मिन् खरः आदिर्येषां ते खरादयः ते च ते जडजन्तवः दुर्बुद्धयश्च अन्य खराः क्रूरा आदयश्चिरन्तना जलजन्तवः लडयोरभेदन्यायात् दारुणारावा भयङ्करशब्दास्तन्तः निपेतुः पतिताः ।।४३।।

बिभिदुर्मण्डलं भानोर्हतास्ते समराङ्गणे ।
मित्रभेदं हि कुर्वन्ति दुरात्मानो मृता अपि ।।४४।।

१- युध तथा, 'क'

विभिंदुरिति। ते खरादयो राक्षसाः समराङ्गणे हताः सन्तः भानोः सूर्यमण्डलं बिभिदुः भिन्नवन्तः तथाहि दुरात्मानो दुर्जनाः मृता अपि दुरवस्थां गता अपीति च प्रतीयते। मित्रभेदं रविभेदं कुर्वन्ति सुहृदां परस्परं भेदं च कुर्वन्तीति प्रतीयते ।।४४।।

महता रचितद्वारां लङ्कामायत दारुणा ।

ततः क्रुद्धा शूर्पणखालङ्कामायतदारुणा ।।४५।।

लङ्काम् । आयत । दारु।

अलम् । कामायतदारुणा ।

(पादयमकम्)

महतेति। ततः अनन्तरं कामम् अत्यर्थम् आयाता दीर्घा उन्नतेति यावत् सा च सा दारुणा चेति विशेषणसमासः।शूर्पणखानखमुखात् संज्ञायामिति[1] ङीष् निषेधो[2] णत्वं च। अलं क्रुद्धा सती महता दारुणा जातावेकवचनम्। महद्भिः दारुभिरित्यर्थः। रचितानि द्वाराणि यस्यास्सा तथोक्ता तां लङ्काम् आयत प्राप्तवती। अयतेर्लङ्। पादयमकम् ।।४५।।

तस्या गिरा जगामाशु मारीचारुतराजितः ।

दण्डकां रावणो देवमारी चारुतराजितः ।४६।।

मारीचारुतराजितः । देवमारी । चारुतराजितः ।

(पादयमकम्)

तस्या इति। देवान् मारयतीति देवमारी चारुतरश्चासावजितश्चेति विशेषणकर्मधारयसमासः। रावणः (इत्यर्थः) तस्याः शूर्पणखायाः गिरा सीतां हरेति वाक्येन मारीचस्य आरुतं सीताहरणानुकूलं सम्भाषणं तेन राजितः प्रकाशितस्सन् दण्डकाम् आशु जगाम गतः, सीताहरणार्थमिति भावः ।।४६।।

१- अष्टाध्यायी ४/१/५६

२- चितलेषङ्गौ, 'क'

प्रतार्य राघवौ सीतां मारीचेन मृगात्मना ।
अनर्थाय जहारासौ वने विषलतामिव ।।४७।।

प्रतार्येति। असौ रावणः मृगाकारेण मारीचेन राघवौ रामलक्ष्मणौ प्रतार्य वञ्चयित्वा वने सीतां विषलतामिव अनर्थाय जहार हृतवान्। हरतेर्लिट् ।।४७।।

रणप्रयोगदक्षस्य पक्षिणः प्रैढवादिनः ।
प्रतिवादी स पौलस्त्यो वितेने पक्षखण्डनम् ।।४८।।

रणेति। प्रतिवादी प्रतिभटस्सः पौलस्त्यो रावणः प्रतिवादीति च व्यज्यते। रणप्रयोगो युद्धाचरणं तत्र दक्षस्यं अन्यत्र रणं। (विजिगीषोरस्त्राणां) प्रयोगे आशु शरप्रय़ोगे)[१] दक्षस्य प्रौढं वदतीति पौढवादीत्यस्य पक्षिणः जटायुषः अन्यत्र इममर्थं साधयामीति प्रतिपक्षपरिग्रहस्य विदुषः पक्षयोः खण्डनम् अन्यत्र पक्षस्य खण्डनं वितेने कृतवान् ।।४८।।

निःशङ्कमङ्केलङ्केशो निधायातङ्कसङ्कुलाम् ।
निनाय लङ्कां वेगेन गृहालङ्कारकेतनाम् ।।४९।।

निःशङ्कमिति। लङ्केशो रावणः आतङ्कसङ्कुलां भयव्याकुलां वैदेहीम् अङ्के निःशङ्कं यथा तथा निधाय, गृहाणामलङ्काराः केतनानि यस्यां सा तथोक्ता तां लङ्कां निनाय नीतवान्। नयतेर्लिट् ।।४९।।

हत्वाश्रमं स मारीचं लक्ष्मणेहमना गतः ।
जगाम सीतानाशङ्को लक्ष्मणेहमनागतः ।।५०।।

लक्ष्मणेहमना। गतः।
लक्ष्मणा। इह। मनाक्। अतः।

१- विजिगीपुरथार्षा प्रयोगे आनुकृनप्रयोगे, 'क'

हत्वेति। स रामः मारीचं हत्वा लक्ष्मणं ईहते इच्छतीति लक्ष्मणेहं मनो यस्य स तथोक्तः सन् आश्रमं निजाश्रमं गतः प्राप्तवान्। इहाश्रमे लक्ष्मणगृहसम्मार्जनादिचिह्नेनेति सीतानाशङ्कः सन् अतः निजाश्रमात् मनाक् मन्दं जगाम। सीतासञ्चयनार्थम् आश्रमान्निर्जगामेत्यर्थः ।।५०।।

लुलोके मार्गमाणस्तं सारङ्गमितपद्धतिः ।
रामो जटायुषं वीतसारङ्गमितपद्धतिः ।।५१।।

सारङ्गमित पद्धतिः। वीतासारम्। गमितपद्धतिः।

लुलोक इति। रामः गमिता विगमिता पदोः पादयोः हतिः घातः येन स तथोक्तं, मन्दगमनस्तन्नित्यर्थः। सारङ्गैः मृगैः मिता मापिता पद्धतिः मार्गो यस्य स तथोक्तस्सन्, तां सीतां मार्गमाणस्सन् वीतसारं विगतबलं जटायुषं लुलोके विलोकितवान्।।५१।।

सीताहरं ततो धीमानाकर्ण्य दशकन्धरम् ।
ददाह तं ततो लोकैर्नाकर्ण्य दशकन्धरम् ।।५२।।

सीतेति। धीमान् रामः ततः जटायुषस्सकाशात् दशकन्धरं रावणं सीताहरं सन्तमाकर्ण्य श्रुत्वा ततः अनन्तरं लोकैर्नाकर्ण्य अनाकर्ण्य दुःश्रवेति यावत् दशा मरणरूपावस्था यस्य स तथोक्तः तम्। बहुब्रीहौ कप्रत्ययः। धरं पर्वतकल्पं तं जटायुषं ददाह दग्धवान्। दहेर्लिट्।।५२।।

चरन्नयोमुखीं हत्वा स ततो लक्ष्मणाग्रजः
सकबन्धं महारण्यं निष्कबन्धं समातनोत् ।।५३।।

चरन्निति। सः लक्ष्मणाग्रजो रामः ततो जटायुषः हननानन्तरं चरन् पर्यटन्। अयोमुखीं नाम रक्षासीं जित्वा सकबन्धं कबन्ध सतमपि महारण्यं निष्कबन्धं कृतवानिति शब्दतो विरोधः। निर्गतकबन्धनामराक्षसं कृतवानिति परिहारः। अतएव विरोधाभासोऽलङ्कारः।।५३।।

सपर्यामथ पर्याप्तां शबर्याः प्राप्य राघवः ।
दृष्ट्वाभाषत सौमित्रीं रम्यं पम्पोपकाननम् ।।५४।।

सपर्यामिति । अथ अनन्तरं राघवो रामः शबर्यास्सकाशात् पर्याप्तां स्वोचितां सपर्या पूजां प्राप्य रम्यं पम्पोपकाननं पम्पातीरकाननं दृष्ट्वा सौमित्रिं अभाषत भाषितवान् । भाषतेर्लङ् ।।५४।।

रोलम्बावलिरोमालीरुल्लसत्पल्लवाधरा ।
सीतेवात्र वसन्तश्रीः दृश्यते सपिकस्वरा ।।५५।।

रोलम्बेति । अत्र पम्पोपकानने रोलम्बावलिः भृङ्गपङ्क्तिः सैव रोमावलिः यस्यास्सा तथोक्ता, अन्यत्र रोलम्बावलिसदृशी रोमावलिः यस्यास्सा तथोक्ताः । अन्यत्रपल्लवसदृशाधरा । पिकानां स्वरसहिता सपिकस्वरा । अन्यत्र पिकसदृशस्वरसहिता । वसन्तश्रीः वसन्तलक्ष्मीः सीतेव दृश्यते ।।५५।।

प्रमुष्टसुमनोगन्धसमानीतशिलीमुखः ।
पाटच्चर इव क्रूरः स्यन्दते मन्दमारुतः ।।५६।।

प्रमुष्टेति । प्रमुष्टः चोरितः सुमनोगन्धः पुष्पसौरभं येन स तथोक्तः । अन्यत्र प्रमुष्टः सुमनसां मनस्विनां गन्धः गन्धद्रव्यं येन स तथोक्तः समानीताः शिलीमुखाः भृङ्गाः येन स तथोक्तः । अन्यत्र समानीताः शिलीमुखाः बाणाः दीपनिवारकमुखवायुना स तथोक्तः । अतएव पाटच्चरः चौर इव क्रूरः मन्दमारुतः स्यन्दते प्रवर्तते । स्यन्दतेर्लट् ।।५६।।

कोकिलानां कलालापाः कान्दर्पाः काहलस्वनाः ।
परगाः परिदृश्यन्ते पृतनाचलरेणवः ।।५७।।

कोकिलानामिति । कोकिलानां कलालापाः अव्यक्तमधुरालापाः कान्दर्पाः कन्दर्पसम्बन्धिनः काहलास्वनाः काहलध्वनयस्सन्तः श्रूयन्त इति शेषः । परागाः पुष्परजांसि कान्दर्पाः पृतनायाः सेनायाः चला चञ्चला रेणवः रजांसि परिदृश्यन्ते परितो लक्ष्यन्ते भेदे अभेदकथनादतिशयोक्तिरलङ्कारः ।।५७।।

मरन्दो मधुपालग्नो माधवीकुसुमस्नुतः ।
महान्मद इवाभाति मनोभूमत्तदन्तिनः ।।५८।।

मरन्द इति। माधवीनां वासन्तीनां कुसुमेभ्यः स्नुतः मधुपैः भृङ्गैः आलग्नः आसक्तः मरन्दो मकरन्दः मनोभूरेव मत्तदन्ती तस्य महान् मदः (दानजलमिव) आभाति ।।५८।।

द्रुमालिङ्गनसम्मर्दाद्गलितेव पतत्यसौ ।
मधुनीहारमुक्ताली मधूकात्कुसुमावलिः ।।५९।।

द्रुमेति। मधूकात् मृद्वीकवृक्षात् गलिताः स्रस्ता असौ कुसुमावलिः पुष्पपङ्क्तिः द्रुमाणाम् आलिङ्गनसम्मर्दात् गलिता मधुश्रियः वसन्तलक्ष्म्याः हारस्य मुक्तावली मौक्तिकपङ्क्तिरिव पङ्क्तिः ।।५९।।

अशोककुसुमालीयं शक्यन्ते विप्रयोगिषु ।
प्रवृत्ताशम्भरारातेराग्नेयास्त्रपरम्परा ।।६०।।

अशोक इति। इयम् अशोककुसुमानामलिः पङ्क्तिः वियोगिषु विषये प्रवृत्ता प्रसृता शम्बरारातेर्मन्मथस्य आग्नेयास्त्रपरम्परा इति शक्यन्ते ।।६०।।

मधुपश्रेणिवीणाभिर्मुखराभिर्मनोहरम् ।
मनोभुवोऽग्रे माधव्यो गान्धर्वमिव कुर्वते ।।६१।।

मधुपेति। माधव्यो (वसन्तः मधुपानां श्रेण्यः पङ्क्तय एव वीणा वाद्यविशेषस्ताभिः) मनोहरा यथा तथा मुखराभिः ध्वनन्तीभिः हेतुभिः मनोभुवो मन्मथस्य अग्रे पुरतः गान्धर्वगीतं कुर्वत इवेत्युत्प्रेक्षा ।।६१।।

कलितं वनमातनुतेऽसुभिदा
मधुना मधुना मधुना मधुना

दयितेव यमद्य धिनोति लता ।

सह सा सहसा सहसा सहसा ।।६२।।

अधुना । मधुना । मधुना मधुना ।

सह । सा । सहसा । सहसा । सहसा ।

कलितमिति । मधुना मकरन्देन कलितं व्याप्तं वनं पम्पोपवनं, मधुना वसन्तेन मधुना मधुना मध्यसुरेण सह यं वसन्तमधुना वनेन सहितेत्यर्थः । व्यक्तरूपकम् । अधुना दानीम् असुभिदां प्राणभेदनम् आतनुते करोति विहारिणामिति शेषः । सा पुरोवर्तिनी पुष्पितेत्यर्थः । लता सहसा हाससहिता, मम दयिता[१] नवचम्पकवल्ली नूतनचाम्पेयलता क्षितिजा दयितेव सीतेंव सहसा सहसा शीघ्रं शीघ्रम् अद्य धिनोति प्रीणयति । चतुस्तबकयमकम् ।।६२।।

कलये नवचम्पकवल्लिमिमा-

मलिनामलिनामरिणामलिना ।

क्षितिजामिह या क्रियते मरुता-

दरसादलसा दलसादलसा ।।६३।।

अलिना । अमलिनाम् । अरिणा । मलिना ।

आदरसात् । अलसा । दलसा । दलसा ।

कलय इति । सहसा मलिना मालिन्यवता अरिणा शत्रुभूतेन अलिना भृङ्गेन अमलिनात् अश्यामाम् असंस्पृष्टामित्यर्थः । इमां नव चम्पकवल्लीं नूतनचाम्पेयलतां क्षितिजां सीतां कलये मन्ये, भूमिजत्वाविशेषादिति भावः । दलानामधोवस्त्राणां[२] सादः लाभः तेन लसतीति लसा शोभिता मरुता वायुना अलसा अचञ्चला या चम्पकलता आदरसात् आदराधीना क्रियते आदरविषयी क्रियते इत्यर्थः ।।६३।।

१- दद्विमा, 'क'
२- दक्षां धावस्त्राणां, 'क'

इत्याकलय्य विपिनान्तवसन्तलक्ष्मीं
सीतां वियोगविधुरो विहितप्रलापः ।
खेलं निलिम्पललनाकुचकोककम्पां
पम्पामवाप खरजित् कृतगात्रकम्पाम् ।।६४।।

इति श्रीचरकूरिकोण्डुभट्टोपाध्यायपौत्रेण यज्ञनारायणभट्टतनयेन वेङ्कटेश्वरेण सर्वाम्बिकागर्भशुक्तिमुक्तामणिना विरचिते चित्रबन्धरामायणे महाकाव्ये अरण्यकाण्डकथा सम्पूर्ण तृतीय सर्गः ।।३।।

इतीति। सीता वियोगविह्वलः करजिद् रामः इति। अनेन प्रकारेण विपिनान्ते वसन्तलक्ष्मीम् आकलय्य निर्वर्ण्य विहिताः प्रलापाः विरहप्रलापा येन स तथोक्तस्सन्, खेलन्तीनां क्रीडन्तीनां निलिम्पललनानां सुराङ्गनानां कुचकोकैः कम्पाकौपमानां, कृतः गात्रस्य कम्पो यया तां तथोक्तां तां पम्पाम् अवाप प्राप्तः ।।६४।।

इति श्रीचरकूरिकोण्डुभट्टोपाध्यायतनययज्ञनारायणभट्टविरचितायां चित्रबन्धरामायणव्याख्यायां बालप्रबोधाख्यायां तृतीयः सर्गः ।।३।।

❖❖❖

चतुर्थ सर्गः

पम्पाकूले क्षणोद्धीतो वीक्ष्य वीरौ खरांशुभूः ।
कम्पालोलेक्षणो जातो लक्ष्यसारौ पराधिभूः ।।१।।

(गोमूत्रिकाबन्धः)

पम्पेति। पराधीनामुत्कृष्टमनः पीडानां भूः स्थानं वालिकृतदारहरणादिनेति भावः, खरांशुभूः सूर्यतनयः सुग्रीवः लक्ष्यसारी प्रेक्षणाय बली वीरौ रामलक्ष्मणौ पम्पाकूले वीक्ष्य दृष्ट्वा दर्शनक्षण एव उद्धीतो विह्वलः सन् कम्पेन आलोले ईक्षणे यस्य स तथोक्तो जातः। गोमूत्रिकाबन्धः। बन्धोद्धारप्रकारस्तु तिर्यग्रेखात्रयं लिखित्वा अष्टादशोर्ध्वरेखा लिखित्वा सम्पन्ने पङ्क्तिद्वयेऽपि क्रमेणार्धद्वयं लिखित्वा प्रथमपङ्क्त्याद्याक्षरमारभ्य दितीयपङ्क्तिपप्रथमाक्षरं त्यक्त्वा तदीयद्वितीयाक्षरं पठित्वा प्रथमपङ्क्तितृतीयाक्षरं पठेत् एवं क्रमेण एकैकाक्षरं पठेत्। एवं क्रमेण एकैकाक्षरपरित्यागेन पङ्क्तिद्वयाक्षरपाठे सति गोमूत्रिकाकारेण प्रथमाक्षरः दृश्यते। एवं द्वितीयपङ्क्तिप्रथमाक्षरमारभ्य प्रथमपङ्क्तिप्रथमाक्षरं त्यक्त्वा तदीयद्वितीयाक्षरं पठित्वा द्वितीयपङ्क्तितृतीयाक्षरं पठेत्। एवं क्रमेण एकैकाक्षरपरित्यागेन

पङ्क्तिद्वयाक्षरपाठे सति गोमूत्रिकाकारेण द्वितीयार्धं दृश्यते इति गोमूत्रिका बन्धोद्धारसंक्षेपः ॥१॥

ताभ्यां सन्धानमन्विच्छन् प्रेषयामास मारुतिम् ।
सुग्रीवो दुर्घटश्रेयो घटनापटिमाधिकम् ॥२॥

ताभ्यामिति । सुग्रीवस्ताभ्यां रामलक्ष्मणाभ्यां सन्धानं सन्धिम् अन्विच्छन् कांक्षमाणस्सन् दुर्घटस्य श्रेयसो घटनापादितपटिम्ना नैपुण्येन अधिकं मारुतिं हनूमन्तं प्रेषयामास प्रेषित(वान्) ॥२॥

हनूमान् विषयाधारो भीमं चापधरं पटुः ।
तनूमान् विनयासारो रामं प्राप वरं वटुः ॥३॥

(स एव बन्धः)

हनुमानिति । विषयस्य उद्देश्यकार्यस्य आधारः तनूमान् विनयासारमूर्तिः विनयप्रसाररूपः । पटुर्दक्षः हनूमान् वटुर्ब्रह्मचारिवेषधारी सन् चापधरम् अत एव भीमं वरं श्रेष्ठं रामं प्राप । गोमूत्रिकाबन्धः । तदुद्धारप्रकारस्तु पूर्वत्रैवोक्तः ॥३॥

विज्ञाय स तदाकूतमानन्द विलोभिना ।
राज्ञापि समुदाधीतं वनवृन्दविलोलिना ॥४॥

(स एव बन्धः)

विज्ञायेति । स हनुमान् विलोभिना राममैत्र्या विशेषलोभवता अतएव समुदा ससन्तोषेण वनवृन्दे विलोलिना सञ्चारिणापि, अपि शब्दश्चार्थः, राजा सुग्रीवेण अधीतमभ्यस्तं कांक्षितमिति यावत् । तदाकूतं तस्य रामस्य सुग्रीवस्नेहरूपाभिप्रायं विज्ञाय ज्ञात्वा आननन्द सन्तुष्टवान् । स एव बन्धः ॥४॥

सुग्रीवं तमतिस्त्रस्तं निनाय रघुनन्दनौ ।
व्यग्रीभूतमतिस्त्रस्तं सनाकेरमनन्दनौ ॥५॥

(स एव बन्धः)

सुग्रीवमिति । स हनूमान् नाके रमन्त इति नाकरमाः देवास्तान् नन्दयत इति नाके रमनन्दनौ रामलक्ष्मणौ अतिस्त्रस्तमत्यन्तं

स्वस्थानाद् गलितम्, अतएव व्यग्रीभूता मतिर्यस्य स तथोक्तः। स चासौ त्रस्तः भीतश्चेति विशेषणकर्मधारयः। तं सुग्रीवं निनाय प्रापितवान्। स एव बन्धः ॥५॥

न केवलं तयोरासीन्मैत्री पावकसाक्षिका।
रामसुग्रीवयोस्तस्य प्रतापानलसाक्षिका ॥६॥

नेति। तयोः रामसुग्रीवयोः मैत्रीसख्यं केवलं पावकसाक्षिका अग्निसाक्षिका नासीत् किन्तु तस्य रामस्य प्रतापानलसाक्षिका चासीत्। रामेण वालिबधस्य प्रतिज्ञातत्वात् तदीयप्रतापाग्निरपि तत्र साक्षी जात इति भावः ॥६॥

जहसे गगने लोकैः स्नेहं साक्ष्यचरन्तयोः।
रहस्ये गगनेऽनेकैः सोहं वीक्ष्य निरन्तयोः ॥७॥

जहस इति। रहस्येकान्तभूते गहने वने निरन्तयोः अनपाययोः तयोः रामसुग्रीवयोः सोऽहं वालिवधसीतामार्गणाद्यूहसहितं साक्षिणा अग्निरूपसाक्षिणा अचरं स्थिरं स्नेहं वीक्ष्य अनेकैः गगने लोकैः खेचरैर्देवैरिति यावत्, जहसे हसितम्। रावणो मृत एवेति सहस्तातालं देवैर्हसितमिति भावः। स एव बन्धः ॥७॥

स्थापितं हृदि रामेण तद्दत्तं दारभूषणम्।
विरहानलसन्तप्ते न दुद्रावाश्रुबिन्दुभिः ॥८॥

स्थापितमिति। तेन सुग्रीवेण दत्त तद्दत्तं दारभूषणं सीताभूषणं रामेण विरहानलसन्तप्ते हृदि हृदये स्थापितं सत् अश्रुबिन्दुभिः शोकबाष्पकरणैर्न दुद्राव न द्रुतम्। यथाग्नितप्तमपि सुवर्णं जललवसंयोगे सति न द्रवति तथैवेति भावः। अनेन विरहदुःखातिशयो व्यज्यते ॥८॥

स्तनोत्तरीयं सीताया रामात्तं जगदुत्तरम्।
निषिक्तमश्रुपातेन शुष्कं श्वासानिलैरभूत् ॥९॥

स्तनोत्तरीयमिति। रामात्तं रामेणादत्तं गृहीतं जगदुत्तरं लोकोत्तरं सीतायाः स्तनोत्तरीयम् अश्रुपातेन वाष्पपतनेन निसिक्तं सित (क्तं) श्वासानिलैर्निश्वासवातैः शुष्कमभूत्। यथा लोके जलार्द्रं वस्त्रं वायुना शुष्कं भवति तथैवेति भावः। अत्रापि श्लोके रामस्य शोकविरहातिशयो व्यज्यते ॥९॥

क्षिपता दुन्दुभेः कायमपि दूरं खरारिणा ।
उदपाद्यत विश्वासो नासारस्यात्तयोः कपेः ॥१०॥

क्षिपतेति। दुन्दुभेः कायं दूरमपि क्षिपता प्रेरयता खरारिणा रामेण तयोः सुग्रीवदुन्दुभिकाययोः असारस्यात् अरसत्वात् कपेः सुग्रीवस्य विश्वासो नोदपाद्यत। णिजन्तात्कर्मणि लङ्। अत्र सुग्रीवस्य दुन्दुभिकायरामबलानभिज्ञानात् असारस्य दुन्दुभिकायस्य चिरशुष्कत्वादसारस्थमिति भावः ॥१०॥

प्रत्ययाय हरीशस्य सालाः कृत्ताः महेषुणा ।
सत्यभूयपरीतस्य लोलाः सीतामहेषिणा ॥११॥

(स एव बन्धः)

प्रत्ययायेति। सीतायाः महप्राप्तिरूपोत्सवः तमिच्छतीति सीतामहेषिणा रामेण कर्त्रा सत्यं भूयं सत्यभावः सत्यसम्बन्धत्वमिति यावत् तेन परीतस्य व्याप्तस्य तद्युक्तस्येत्यर्थः। हरीशस्य सुग्रीवस्य प्रत्ययाय विश्वासाय महेषुणा महता बाणेन करणेन लोलाच्चलास्साला वृक्षा कृत्ताः खण्डीकृताः खण्डिताः। स एव बन्धः ॥११॥

हन्तुं कृतागसं शर्क्रि पुरोपान्तं परागतः ।
वृण्वन्दिशः स सकपिः पुरोपान्तं परागतः ॥१२॥

पुरा। उपान्तम्। परागतः। पुरोपान्तम्। परागतः॥

हन्तुमिति। सकपिः सुग्रीवसहितः स रामः पुरा पूर्वं कृतागसं कृतसोदरदारहरणरूपापराधं उपान्तं प्राप्तप्राणान्तकालं शार्क्रिं

शक्रतनयं वालिनं शक्रशब्दादतइञिति[1] इञ्प्रत्ययः। हन्तुं हिंसितुं परागैः भूपरागैः। सार्वविभक्तिकस्तसिल्' दिशोवृण्वन् छादयन् सन् पुरस्य किष्किन्धायाः उपान्तं प्रान्तभागं परागतः प्राप्तवान्। पादयमकम्।।१२।।

तारया वारितो भ्रातृगिराहूतोऽति[2]तारया।
तारयामास तां शोकं [3]वालि भीमस्स तारया।।१३।।

तारयेति। तारया कनीनिकया 'तरकाक्ष्णः कनीनिके'त्यमरः। भीमो भयङ्करः वालिः अतितारया अत्युच्चैः (त)या भ्रातृगिरा सुग्रीववचसा आहूतः युद्धायाकारितः। अत एव तारया वारितः निवारितः सन् तां तारां तारयामास तारितवान्। ताराशोकं निवारितवानित्यर्थः। गतिबुद्धीत्यादिना द्विकर्मकत्वम्।।१३।।

सङ्गरं वनजातेन चक्रे वालिकृतध्वनिः।
सङ्गतोऽवरजातेन वक्रे केलिकृतध्वनिः।।१४।।

सङ्गरमिति। वक्रे अध्वनि मार्गे केलिं करोतीति केलिकृत् वक्ररीत्या मार्गे सङ्क्रमणकारीत्यर्थः वालिः अवरजातेन कपिना सुग्रीवेणेत्यर्थः। सङ्गतस्सन् कृतः ध्वनि सिंहनादो यस्मिन् कर्मणि तत्तथा, सङ्गरं युद्धं चक्रे कृतवान्। करोतेर्लिट्। स एव बन्धः।।१४।।

भग्नोऽनीके स रामेण निजमानेन लालितः।
मग्नोऽव्यके स रागेण गजसूनेन चिह्नितः।।१५।।

भग्न इति। स सुग्रीवः अनीके वालिना सह युद्धे भग्नः भङ्गं प्राप्तः। अतएव अव्यके अतिदुखे मग्नः, अतएव सरागेण अनुरागसहितेन रामेण कर्त्रा निजमानेन स्वकीयमानोपरि।(गर्व) शीलेन लालितः उपलालितः सन्, गजसूनेन गजपुष्पेण चिह्नितः।

१- अष्टाध्यायी (४।१।९५)
२- वितारया, 'क'
३- गालिभीमस्ततालया, 'क'

अभूदितिशेषः। युद्धे बालितो भेदज्ञानाय गजनामकव्रततिविशेष-कुसुमिताङ्कितो जात इत्यर्थः ।।१५।।

युयुधे वालिना भूयो मुष्टामुष्टि समेत्य सः ।

घटितांसमहानादं दष्टाधरमटन्नगम् ।।१६।।

युयुधे इति। स सुग्रीवः भूयः पुनः समेत्य युद्धभूमिं प्राप्य घटितावंसौ यस्मिन् कर्मणि तत्तथा, महान् नादः सिंहानादः यस्मिन् कर्मणि तत्तथा, अटन्तः विक्षेपेण चलन्तः नगा वृक्षाः पर्वता वा यस्मिन् कर्मणि तत्तथा, वालिनां सह मुष्टिभिश्च मुंष्टिं प्रहृत्य मुष्टामुष्टि युयुधे। मल्लयुद्धं चक्रे। मुष्टामुष्टीत्यत्र तत्र तेनेदमिति सरूप इति सरूपतृतीयान्तसमासः। 'आत्वं वानची'ति पूर्वपदस्यात्वं वा। स्वभावोक्तिरलङ्कारः ।।१६।।

सुग्रीवं राघवो भूरि सन्दधे वीक्ष्य सायकम् ।

सग्रीवं लाघवोत्थारिवृन्दलावी स साधकम् ।।१७।।

सुग्रीवमिति। लाघवेन सत्वरेण उत्तिष्ठन्तीतिं लाघवोत्थाः ते चते अरयश्च तेषां वृन्दलावी समूहच्छेदी राघवः रामः सुग्रीवं ग्रीवासहितं (कन्ध) रावशेषं भग्नकल्पं स्थितमिति अर्थः। सुग्रीवं भूरि यथा तथा वीक्ष्य साधकं रणजयसम्पादकं सायकं बाणं सन्दधे सन्निहितवान्। स एव बन्धः ।।१७।।

बाणेन पतितस्तस्य कृत्तो वालिः धरातले ।

रावेण परितस्त्रस्यच्चित्तो धूलिभराविले ।।१८।।

माणेनेति। रावेण गुणध्वनिना परितः सर्वतः यत्रस्यच्चित्तः बिभ्यन्मानसः वालिः बाणेन कृत्तः छिन्नः अतएव धूलिभरेण रेणुसंघेन आविले व्याप्ते धरातले भूतले पतितः अभूदिति शेषः। स एव बन्धः ।।१८।।

निन्दितो वालिना रामो व्याधलीलानुसारतः ।
नान्दितो वादिना वामो याऽघवेलानुसारितः ।।१९।।

(स एव बन्धः)

निन्दित इति । वामः वक्रः रामः वादिना वक्त्रा वालिना कर्त्रा व्याधलीलया किरातचेष्टया अनुसारितः निन्दितः अभूदिति शेषः । किरात इव वृक्षमूले लीन एव हतवान् न तु शूररीत्या रणे आभिमुख्येन स्थित्वेति निन्दित इत्यर्थः । पश्चाद्योऽघवेला पापीजनवधरूपमर्यादा तस्या अनुसारतः अनुसारेण नन्दितः सन्तोषितः अभूदिति शेषः । भ्रातृभार्याहरणेन पापिनं मां शूरमर्याद (यैव) हतवान् नान्ययेति सन्तोषितश्चाभूदिति भावः ।।१९।।

स भ्रातृमन्युशल्येन सममुद्धरति स्म तम् ।
शरं तस्यासुभिः साकमुच्चचाल च शोणितम् ।।२०।।

स इति । स रामः भ्रातुः सुग्रीवस्य मन्युरेव शल्यं तेन समं तं वालिमर्मणि लग्नं शरमुद्धरति स्म उद्धृतवान् । शरोद्धरणमात्रेणैव सुग्रीवस्य द्वेषोऽपि गत इति भावः । तस्य वालिनः असुभिः प्राणैः साकं शोणितं रक्तं चोच्चचाल उच्चलितं सहालङ्कारः ।।२०।।

वैकुण्ठं वालिने दत्वा रामोऽकुण्ठितविक्रमः ।
सुग्रीवाय ददौ राज्यमनपाय सुखास्पदम् ।।२१।।

वैकुण्ठमिति । अकुण्ठितविक्रमो यस्य स तथोक्तः, स रामः वालिने वैकुण्ठं दत्वा सुग्रीवायानपायं सुखास्पदम् अनश्वरसौख्यनिदानं राज्यं ददौ दत्तवान् । ददातेर्लिट् ।।२१।।

समया माल्यवत्प्रस्थं समयाप्तो हरीश्वरम् ।
समयामरराल्लक्ष्म्या समया प्रीणयन् स्थितः ।।२२।।

समयेत्ति । स रामः समयं सङ्केतम् आप्तः प्राप्तस्सन् वर्षमासचतुष्टयानन्तरं रावणवधयत्नः कर्तव्य इति कृतसङ्केत इत्यर्तः । हरीश्वरं सुग्रीवं सुरराल्लक्ष्म्या महेन्द्रस्वराज्यलक्ष्म्या समया तुल्यया मया राज्यलक्ष्म्या प्रीणयन् सन्तोषयन् माल्यवत्प्रस्थं समया

माल्यवत्सानोर्निकटे, अभितः परितः' इत्यादिना द्वितीया, स्थितः ॥२२॥

घनागमेन तत्रासे शक्रचापकयोगिना ।
वनानमे पतत्रासे वक्रतापवियोगिना ॥२३॥

(स एव बन्धः)

अष्टभिः श्लोकैः वर्षर्तुमेव वर्णयति -

घनागमेनेत्यादिना। वनैरानमतीति वनानम तस्मिन् सान्द्रवन इत्यर्थः। पतन् प्रवर्तमानस्त्रासो भयं यस्मिन् तथोक्तः तस्मिन्। तत्र माल्यवति शक्रचापकयोगिना इन्द्रचापसम्बन्धिना, स्वार्थे कप्रत्ययः। वक्रः दुःसहः तापो येषां ते वक्रतापाः तादृशा वियोगिनो यस्मिन् स तथोक्तः तेन घनागमेन वर्षसमयेन आसे स्थितम्। अस्तेर्भावे लिट्। स एव बन्धः ॥२३॥

मदनश्वासवातोग्रैर्ववले पवनाङ्कुरैः ।
नदविश्वासवादाग्रैर्नवनीपवनाङ्कुरैः ॥२४॥

(स एव बन्धः)

मदनेति। मदनश्वासवातवत् मन्मथनिःश्वासवायुवत् उग्रैर्विरहिभयङ्करैर्नदानां विश्वासवादे विश्वासवचने अग्रैः श्रेष्ठैर्भवतां पूरणार्थमवश्यं वृष्टिरायास्यतीति सूचयद्भिरित्यर्थः। वनेषु नीपवनेषु अङ्कुरैः पवनाङ्कुरैः पुरोवातप्ररोहैर्ववले प्रवृत्तम्, अङ्कुरैरित्यत्र रलयोरभेदन्यायेन गोमूत्रिका बन्धपूरणं द्रष्टव्यम् ॥२४॥

अभिषिक्तं रुषालोक्य सुग्रीवं वालिवैरिणा ।
माल्यवद्भूभृतं वृष्ट्या शक्रो वाभिषिञ्चति ॥२५॥

अभिषिक्तमिति। शक्रो महेन्द्रः वालिवैरिणा स्वपुत्रघातिना रामेण अभिषिक्तं सुग्रीवमालोक्य रुषा कोपेन वृष्ट्या वर्षेण माल्यवान् भूभृद् गिरि तं राजानमिति च ध्वन्यते। अभिषिञ्चति स्म अभिषिक्तवानिव। लोके महाराजः स्वयमन्यमभिषिञ्चति एवमेवेति भावः ॥२५॥

पतिता प्रसृतेऽन्योन्यं कलहे घनदन्तिनाम् ।

मौक्तिकासृक्कणा नूनं करकाः शक्रगोपकाः ।।२६।।

पतिता इति। करका वर्षोपलाः शक्रगोपकाः इन्द्रगोपकाश्च घनमेघाः त एव घनदन्तिनः मत्तेभाः, तेषामन्योन्यं कलहे युद्धे प्रसृते प्रवृत्ते सति पतिता भुवि स्रस्ताः क्रमेण मौक्तिकानि च असृक्कणाश्च नूनम् अत्र करकाणां मुक्ताफलत्वमिन्द्रगोपानां च रक्तबिन्दुत्वं च (?) क्रमेणोत्प्रेक्ष्यते इत्युत्प्रेक्षालङ्कारः ।।२६।।

रसिता रचितामोदैर्ननृते च कलापिभिः ।

लसिता रहिता नादैः सनृमुच्यपलापिभिः ।।२७।।

(स एव बन्धः)

रसितेति। चपला विद्युत् आप्नुवन्तीति चपलापिनः, तैः अनेन विद्युतां नाट्यसहकारीभूतदीपिकासाम्यं ध्वन्यते। रसितेन गर्जितेन आरचितः आमोदो येषां ते तथोक्तास्तैः, अनेन मयूरनादस्य गीतसाम्यं व्यज्यते। कलापिभिर्मयूरैः सनृमुत् समनुष्यसन्तोषं यथा तथा ननृते नृत्तम्। नृत्यतेभावे लिट्। स एव बन्धः ।।२७।।

शशङ्के केतकीरेखा वनान्ते भृङ्गसङ्कुला ।

पतिता कण्टकालग्ना साब्दखण्डा तडिद्द्युतिः ।।२८।।

शशङ्क इति। वनान्ते भृङ्गसङ्कुला भ्रमरव्याप्ता केतकीरेखा केतकीदलं पतिता केतकीषु पतिता अतएव कण्टकैरालग्ना साब्दखण्डा मेघखण्डसहिता, तडिद्द्युतिर्विद्युत्कान्तिः शशङ्के शङ्कितेत्युत्प्रेक्षा ।।२८।।

केतकीच्छदनस्याग्रे चलन् भृङ्गः सकण्टके ।

वर्षादुर्गामुदे गुञ्जन् तुलायन्त्र इवानटत् ।।२९।।

केतकीति। सकण्टके कण्टकसहिते केतक्याः छदनस्य दलस्य अग्रे चलन् गुञ्जन् ध्वनन् भृङ्गाः वर्षैव दुर्गा तस्याः मुदे सन्तोषाय

तुलायन्त्रे अनटदिव नटितवानिवेत्युत्प्रेक्षा। अत्र लोके तामसः पुमान् दुर्गासन्तोषस्य सकण्टकप्रोतपृष्ठभागः तुलायन्त्रे घोष्यमाणः सन् अटतीति लौकिकी रीतिरनुसन्धेया ॥२९॥

प्रथमा परसां धारा रेजिरे गगनाजिरे ।
पर्जन्यस्य मुनेरार्द्रा लम्बमाना जटा इव ॥३०॥

प्रथमा इति । गगनाजिरे आकाशाङ्गणे प्रथमाः पयसां जलानां धाराः पर्जन्यस्यैव मुनेरिति व्यस्तरूपकम्। आर्द्राः जलसिक्ता लम्बमाना जटा इव रेजिरे राजितवत्यः ॥३०॥

वसंस्तत्र तदा रामो मैथिलीविरहातुरः ।
समीपस्थमुवाचेदं लक्ष्मणं शुभलक्षणम् ॥३११॥

वर्षाकाले रामस्य विरहवेदनां वर्णयितुं पातनिकामाह-

वसंस्तत्रेत्यादिना। तदा वर्षाकाले तत्र माल्यवति वसन् रामः मैथिलीविरहातुरः सन् समीपस्थं शुभलक्षणं लक्ष्मणमुवाच उक्तवान्॥३१॥

घना घना घनघना नाघनाना घनाघनाः ।
धाराधरा धराधारा राधा धाराधरा धुरि ॥३२॥

घना घनाः । घनघनाः । नाघनाना । घनाघना ।
धाराधराः । धराधाराः । राधाः । धाराधराः । धुरि ॥
(चतुरक्षरी)

वचन प्रकारमेव पञ्चभिः श्लोकैराह -

घनाघना इत्यादिना। नाघ पापरहितलक्षणधरः पर्वतः माल्यवानित्यर्थः। स एव आधारो येषां ते धराधरा धरन्तीति धराः, धाराणां जलसन्ततीनां धरा धाराधराः, घनाघनाः घातुका विरहिणामिति शेषः। हन्तेः कुत्वं[१] चेति हन्तेरचि कुत्वद्वित्वाभ्यासङ्गमा, घनघना अत्यन्तमधिका, नाना नानाविधाः। घनाघना वर्षुकमेघाः, धुरि अग्रे राध्यन्तीति राधाः, हिंसका इत्यर्थः।

१- हन्त्वेः कुत्यं, 'क'

हिंसार्थाद्राधतेः पचाद्यच्। धाराधराः मत्प्रहरणहेतुभूताः खड्गा एव न मेघा इत्यर्थः। अत्र उभयोरभेदकथनेन अपह्नवो व्यज्यत इत्यलङ्कारेणालङ्कार ध्वनिः। चतुरक्षरी ॥३२॥

सौमित्र कृतदौर्जन्यं पर्जन्यं खण्डयेषुभिः।
श्लाघनीयमिदं वीर हरकोदण्ड खण्डनात् ॥३३॥

सौमित्र इति। हे वीर सौमित्रे लक्ष्मण, कृतं दौर्जन्यं मद्वधरूपं येन स तथोक्तः तं पर्जन्यम् इषुभिर्बाणैः खण्डय प्रहर। ननु पर्जन्यवधेन किं लभ्यत इत्याशङ्क्याह। श्लाघनीयमिति इदं पर्जन्यहननं हरकोदण्डखण्डनादपि श्लाघनीयम्। इन्द्रचापस्य हरचापवत् स्वेन खण्डयितुमशक्यत्वात्तेन तथाधिकंप्रतापलाभ इति भावः ॥३३॥

इन्द्रकोदण्डमुद्दण्डं शकली कुरु सायकैः।
श्लाघनीयमिदं वीर खरस्यापि विहिंसनात् ॥३४॥

[1]इन्द्रेति। हे वीर उद्दण्डं पौढं इन्द्रकोदण्डम् इन्द्रचापं सायकैः शकली कुरु भिन्नं कुरु। ननु अनेन किं लभ्यत इत्याशङ्क्याह। श्लाघनीयमिति। इदं इन्द्रचापखण्डनं खरस्य विहिंसनादपि वधादपि श्लाघनीयम्। ममदुर्जयस्य पर्जन्यस्य वधेन मत्कृतखरवधादप्यधिकः प्रतापः त्वया लभ्यत इति भावः ॥३४॥

१- मातृकायां ३३ इत्यस्य पद्यस्य टीकायां 'खरस्य विहिंसनादपि' इति इत आरभ्य ३४ इत्यस्य पद्यस्य 'इन्द्रचापखण्डनं' यावत् (खरस्य विहिसनादपि वधादपि श्लाघनीयं मम दुर्जयस्य पर्जन्यस्य वधेन मत्कृतखरवधारप्यधिकः प्रतापः त्वया लभ्यत इति भावः ॥३३॥

इन्द्रेति। हे वीर उद्दण्डं प्रौज्ञं इन्द्रकोदण्डं इन्द्रचापं सायकैः शकलो कुरु भिन्नं कुरु। नन्वनेन किं लभ्यते इत्याशङ्क्याह। श्लाघनीयमिति। इन्द्रचाप खण्डनं) अंशस्य केनापि पद्येनं साकल्येन सम्बन्धः नास्ति। पूर्वापरो विपर्यासिन आत्मनोः, औचित्यं प्रतिपादयतः। एवं विहिते सति ३४ इत्यस्य श्लोकस्य टीका समुद्धृता।

प्रकाशमानामाकाशे चञ्चलां विनिपातय ।
श्लाघनीयमिदं वीर वधादपि पलाशिनाम् ।।३५।।

प्रकाशमानामिति। हे वीर आकाशे प्रकाशमानां चञ्चलां विद्युतं विनिपातय पतितां कुरु। नन्वनेनापि किं लभ्यत इत्याशङ्क्याह। श्लाघनीयमिति। इदं चञ्चलाविनिपातनं ताटकाया निनिपातनादपि श्लाघनीयं विद्युन्निपातनस्य स्वेनापि अकरणत्वात् तत्करणे तवाधिकप्रतापलाभ इति भावः ।।३५।।

गर्जितो दुर्जयानेतान् बलाज्जहि बलाहकान् ।
श्लाघनीयामिदं वीर वधादपि पलाशिनाम् ।।३६।।

गर्जित इति। हे वीर गर्जितः गर्जितानि कुर्वतः सिंहनादकारिण इति च ध्वन्यते। दुर्जयान् एतान् बलाहकान् मेघान् बलात् बलात्कारात् जहि संहर। नन्वनेन किं लभ्यत इत्याशङ्क्याह श्लाघनीयमिति। इदं बलाहकसंहरणं पलाशिनां राक्षसानां वधादपि श्लाघनीयम्। मेघसंहरणस्य तवाधिकप्रतापलाभ इति भावः ।।३६।।

इत्थं विप्रलपन्नीत्वा राघवो विरहातुरः
वासरान्नीलजीमूतधूसरानिदमब्रवीत् ।।३७।।

एवं विरहवेदनां वर्णयित्वा शरदृतुं वर्णयितुं पातनिकामारचयति -

इत्थमिति। विरहातुरो राघवो रामः इत्थम् उक्तेन प्रकारेण विप्रलपन् सनीलजीमूतैः कालमेघैः धूसरान् धूसरवर्णान् वासरान् वर्षावासरान् इत्यर्थः, नीत्वा निर्गमय्य इत्थं वक्ष्यमाणं वचनम् अब्रवीत् ।।३७।।

सौमित्रे नीलजीमूतमलिनाकाशमार्जनी ।
नदी कतकधूलीव कापि वेला विजृम्भते ।।३८।।

पञ्चभिः श्लोकैः शरदृतुं वर्णयन् वचनप्रकारमेवाह -

सौमित्र इति। हे सौमित्रे नीलजीमूतैः मलिनस्य आकाशस्य मार्जनी शोधनी कापि वेला समयः शरत्कालं इत्यर्थः। नदीनां कतकस्य जलशोधकबीजविशेषस्य धूलीव रेणुभिरिव विजृम्भते। अत्र शरत्कालस्य कतकधूल्युपमाने नदीनिर्मलीकरणसामर्थ्यं व्यज्यत इत्यलङ्कारे वस्तुध्वनिः ॥३८॥

पान्थान् प्रहरता पुष्पधनुषा फलधारितः ।
असृग्विशेषक इव बन्धूकं भाति नूतनम् ॥३९॥

पान्थानिति। नूतनं नव्यं बन्धूकं बन्धुजीव कुसुमं पान्थान् विरहिणः प्रहरता पुष्पधनुषा मन्मथेन फाले ललाटे धारितः असृग्विशेषक इव रक्ततिलक इव भाति। अत्र लोके अतिद्वेषी पुरुषः शत्रुं हत्वा तदीयरक्तेन ललाटे तिलकं करोतीति लौकिकीरीतिरनुसन्धेया ॥३९॥

मैथिलीं हरतः पङ्क्तिकण्ठस्य हृदयं विना ।
न क्वापि भुवि सौमित्रे पङ्कशङ्का प्रवर्तते ॥४०॥

(मैथिलीमिति।) हे सौमित्रे मैथिलीं हरतः पङ्क्तिकण्ठस्य रावणस्य हृदयं विना भुवि क्वापि पङ्कस्य शङ्का न प्रवर्तते येन रावणहृदयस्थः पापरूपपङ्क एव न निवृत्तः, तदितरो भूपङ्कः सर्वोऽपि निवृत्त एवेति भावः ॥४०॥

जृम्भते गगनालम्बा कापि कादम्बिनी सिता ।
अन्वाकाशनदीकूलं पुष्पितेव शराटवी ॥४१॥

जृम्भत इति। गगनम् आलम्बं यस्याः सा तथोक्ता सिता शुभ्राकापि कादम्बिनी मेघमाला, आकाशनदीकूलं समीप इत्यर्थः। पुष्पिता सञ्जातपुष्पा शराटवी विजृम्भते शोभते ॥४१।

जगतामुपकाराय शोभते मित्रमण्डलम् ।
तथापि वर्तते नेह वशे मे मित्रमण्डलम् ॥४२॥

जगतामिति। मित्रमण्डलं सूर्यमण्डलं, सुहृन्मण्डलमिति च

प्रतीयते। जगतामुपकाराय शोभते यद्यपीति शेषः। तथापि इह शरत्काले मित्रमण्डलं सुग्रीवादिसुहृन्मण्डलं सूर्यमण्डलमिति च प्रतीयते। मे वशे न प्रवर्तते। विरोधाभासालङ्कारः ॥४२॥

बन्धुजीवप्रथामेत्य शरत्कालेऽपि सङ्गते ।
विचित्रं नहि सुग्रीवो विकासामोदमश्नुते ॥४३॥

बन्धुजीवेति। सुग्रीवः शरत्काल सङ्गते सति बन्धून् जीवयतीति बन्धुजीवः बन्धुजीव इति प्रथां बन्धूककुसुममिति प्रसिद्धिः चेति गम्यते। एत्यापि प्राप्त्या विकासेन नवराज्यलाभेन आमोदं सन्तोषं विकासकृतसौगन्ध्यं च नाश्नुते। विचित्रं हि आश्चर्यं हि बन्धुजीवस्य शरत्कालें विकासासम्भवात् तस्य तदानीं तदभावे वैचित्र्यमिति भावः ॥४३॥

तारया योगमत्तस्य गर्वमस्य गिराप्तया ।
स्फारया योपमग्नस्य सर्वमस्य करालया ॥४४॥

तारयेति। तारया योगेन सङ्गमेन मत्तस्य अत एव अये शुभावहविधौ उपमग्नस्य आसक्तस्यास्य सुग्रीवस्य सर्वं गर्व करालया भीषणया स्फारया भूयस्या आप्तया गिरा वाचा अस्य निराकुरु। विभीषिकासान्त्वनाभ्यां सुग्रीवं वशीकुर्वित्यर्थः ॥४४॥

इत्युक्तश्चरणन्यासैः कम्पयन् धरणीतलम् ।
आगत्य लक्ष्मणः क्रोधात्सुग्रीवमिदमब्रवीत् ॥४५॥

इतीति। इत्यनेन प्रकारेण उक्तः रामेण भाषितः लक्ष्मणः क्रोधाद्धरणीतलं चरणन्यासैः पादविक्षेपैः कम्पयन् सन् आगत्य सुग्रीवम् इदं वक्ष्यमाणम् अब्रवीत् ॥४५॥

रुमालावण्यसङ्क्रान्तमानसस्य प्लवङ्गम ॥
कथंङ्कारं तवालापमाधुर्यं सुस्थिरं भवेत् ॥४६॥

रुमेति। हे प्लवङ्गम कपे सुग्रीव रुमायाः रुमानाम्नि भार्यायाः लावण्ये सौन्दर्ये सङ्क्रान्तं मानसं यस्य स तथोक्तः। तस्य

लवणाकरगतलवणसंलग्नान्तःकरणस्येति गम्यते। तवालापमाधुर्यं वचनमाधुर्यं कथंङ्कारं सुस्थिरं भवेत्। न कथञ्चिदित्यर्थः। कामिनीसम्भोगनिरतस्य तव वाङ्माधुर्यं दूरनिरस्तमिति वाच्यार्थः। अन्तःकरणे लवणरसकलिते वचसि माधुर्यं न प्रसरत्येव। यदेव मनसा ध्यायति तदेव वाचा वदतीति न्यायाद् गम्योऽर्थः।

अनलं मित्रभावस्य स्मर वानर साक्षिणम्।
तं च दाशरथेर्वालिदाहकं सायकानलम् ।।४७।।

अनलमिति। हे वानर मित्रभावस्य राममैत्र्याः साक्षिणम् अनलं स्मर। स्मृत्वा रूढं कुरु। अग्निसाक्षिकं सख्यं न त्याज्यमित्यर्थः। वालिनो दाहकं तं दशरथेः सायकानलं बाणाग्निं च स्मर। सख्यत्यागैः वालिनो या दशा सैव तवापि शीघ्रमेवागमिष्यतीति भावः ।।४७।।

रिपुहा पुरि यो जेयोऽमेयो मे विभुको भुवि।
यजतं जय सम्भासं वाचा वा लग मागल ।।४८।।

(प्रतिलोमोत्तरम्)

रिपुहेति। यन्मे विभुरेव विभुकः मत्स्वामी राम इत्यर्थः। स्वार्थे कप्रत्ययः। रिपून् हन्तीति रिपुहा सकलशत्रुसंहारी 'अन्येभ्योऽपि दृश्यते'[1] इति अगत्यर्थाच्छन्दसि युच्[2]प्रत्ययः। अत एवाजेयः अन्यैर्जेतुमशक्यः अतः एव अमेयः अपरिच्छिन्नमहिमा च भवतीति शेषः। सम्भासं समीचीनतेजसं तं तादृशं रामं यज पूजय। अतएव पुरि किष्किन्धायां जय जयशाली भव। वाचा वा लग लग्नो भव। लगतेर्लोट्। सत्यवचने वा स्थातव्यमिति अर्थः। मा गल सत्यवचनाद् भ्रष्टो मा भव। अनुलोमम् ।।४८।।

लगं मागल वाचा सम्भासं यज तं यज।
विभुको भुवि मेयोऽमेयो जेयो रिपुहा पुरि ।।४९।।

लगेति। पूर्वश्लोकार्थे एवात्राप्यनुसन्धेयः। प्रतिलोमोत्तरम् ।।४९।।

१- अष्टाध्यायी ३।३।१३०
२- दग्रियहणादन्तं र्तक 'क'

शाशशेशाशुशाश्शाशे शशे शाशि शिशो शश ।

शशाशशं शशशश शाशाशा शशशो शिशि ।।५०।।

शाशशेश। आशुशाः। शाशे। शेशाशि शिशो शश।

शशाशा। शन्। शश। शाश। आशा शशशः। अशिशिः।

(एकाक्षरी)

शाशेति शिशोशेश हे सुग्रीव सुतगतौ शशेशं चन्द्रम् अश्नातीति शशेशाशी राहुः राहुकल्प इत्यर्थः। आशुशास्ते शिक्षयतीत्याशुशाः। रामः शशाशं त्वयि विषये संहारार्थसुतं चकारेति सिद्धवत्कथनं, सुग्रीव विभीषिकार्थं शशतेर्लिट्। तर्हि इतःपरं मया किं कर्तव्यमित्यांशङ्क्याह - शशीति त्वमिति शेषः। आशासु दिक्षु आशा इच्छतां शशति प्राप्नोतीत्याशाशशः सन् अशिं भुञ्जिक्रियां श्रृणोति हिनस्तीत्यशीशिः भोजनरहितः सन्नित्यर्थः। शं सुखेन शश शश शश सुतैः पालयस्व पालायस्व पलायस्व इति त्रिर्वचनं सम्भ्रमोदीरितमिति मन्तव्यम्। शशाशेत्यत्र शशतेर्यङन्तात् पचाद्यच् प्रत्ययः। आशुशा इत्यत्र शास्तेः क्विप् प्रत्ययः अशिशिरित्यत्र श्रुहि हिंसायामित्यस्माद्धातोः क्विप् प्रत्ययः। एकाक्षरी ।।५०।।

इत्युक्तस्तेन चकितः सुग्रीवो रामसन्निधौ ।

प्रेषयामास कीशेन्द्रानाहूतानखिला दिशः ।।५१।।

इतीति। इति उक्तेन प्रकारेण तेन लक्ष्मणेन उक्तः भाषितः सुग्रीवः चकितः भीतः सन् रामसन्निधौ स्थित्वेति शेषः। आहूतान् दूतैराकारितान् कीशेन्द्रान् कपीश्वरान् अखिलाः। दिशः प्रति प्रेषयामास सीतामार्गणाय प्रेषितवान् ।।५१।।

कार्यसिद्धिं विनिश्चित्य ददौ रामः स्वमुद्रिकाम् ।

पौलस्त्यनाशनायैव बलिने वायुसूनवे ।।५२।।

कार्येति। रामः कार्यसिद्धिं विनिश्चित्य हनूमतैव कार्यं सेत्स्यतीति विनिश्चित्येत्यर्थः स्वकीयमुद्रिकां ऊर्मिकां पौलस्त्यस्य रावणस्य नाशनायैव वधार्थमिव बलिने बालढ्याय वायुसूनवे हनूमते ददौ दत्तवान्। यथा लोके राजा स्वमुद्रिकां दत्वा स्वाभीष्टपुरुषमपराधिनो वधाय आज्ञापयति, एव रामोऽपि स्वमुद्रिकां हनूमते दत्वा रावणवधायाज्ञापितवानित्युत्प्रेक्षा ।।५२।।

गृहीत्वाञ्जलिना मुद्रां कार्यसिद्धिमिवापराम् ।
आञ्जनेयस्सतारेयो दक्षिणां दिशमाययौ ।।५३।।

गृहीत्वेति। आञ्जनेयः हनूमान् अपराम् अन्यां कार्यसिद्धिमिव मुद्रिकाम् अञ्जलिना गृहीत्वा करस्तां कृत्वेत्यर्थः सतारेयेण अङ्गदेन सहितः सन् दक्षिणां दिशम् आययौ आयातवान् ।।५३।।

मार्गमाणैर्वने सीतां वानरैः कामरूपिभिः ।
रावणोऽयमिति ज्ञात्वा हता इन्द्रस्य शत्रवः ।।५४।।

मार्गमाणैरिति। इन्द्रस्य शत्रवः अन्ये राक्षसाः सीतां मार्गमाणैः विचिन्वद्भिः कामरूपिभिः वानरैः कर्तृभिः अयं रावण इति ज्ञात्वा मत्वा हताः हिंसिताः हन्तेः कर्मणि क्तः ।।५४।।

वानरालिपिपासार्ता जगाहे नगगह्वरम् ।
वनपालिष्वपावार्ता न गाधं नदगह्वरम् ।।५५।।

वानरेति। अपगता आवर्ता अपकीर्तिर्यस्याः सा अपावार्ता वानराणामलिः पङ्क्तिः वनानां पालिषु समूहेषु पिपासया सीतामार्गणश्रमजनिततृष्णया आर्ता पीडिता सतीति न गाधं गभीरं नदात् गच्छतीति प्राप्नोतीति नदगह्वरं श्रेष्ठं नगगह्वरं पर्वतगुहां जगाहे प्रविष्टा गाहतेतिर्लट्। गोमूत्रिकाबन्धः ।।५५।।

चिरं तत्र परिश्रान्तान् कपीन् काचन कन्दरात् ।
ब्रह्मविद्येव संसारबिलाज्जीवानतारयत् ।।५६।।

चिरमिति। काचन स्वयम्प्रभा नाम काचित्स्त्री तत्र गुहायां चिरं परिश्रान्तान् कपीन् कन्दराद् गुहातः सकाशात् ब्रह्मविद्या अखण्ड ब्रह्माकारा अन्तःकरणवृत्तिः संसार एव बिलं तस्मात् जीवानिवातारयत् तारितवती। त्रातात्लङ्॥५६॥

अपारा दक्षिणाम्भोधिवेला प्लवगसेनया ।

भूपालदक्षिणाराधि लोलालं वर्चसेनया ॥५७॥

(स एव बन्धः)

अपारेति। अनया प्लवगसेनया अपारा पाररहिता भुवः भूमेः पाले पालने दक्षिणो निपुणो महादेव ?) मर्यादात्वेति भावः। लोला चक्रा चला वानरपादाघातैरिति भावः। दक्षिणाम्भोधेर्वेला वर्चसे तेजसे अलम् अत्यर्थम् आराधि आराधिता सेवितेत्यर्थः। स एव बन्धः॥५७॥

सागरं चारुलोकेशं कृतमापन्नवारणम् ।

सागरं चारुलोके शं कृतमापन्नवारणम् ॥५८॥

सागरम्। चारुलोकेशम्। कृतमापम्। नवारणम्।

सा। अगरं च आलुलोके। शं कृतम्। आपन्नवारणम्।

(अर्धयमकम्)

सेति। सा वानरसेना चानेतुर्लोकिशो विष्णुर्यस्मिन् सः चारुः लोकेशः। तन्त्रोक्तः[१] मायायाः लक्ष्म्याः आपः प्राप्तिर्येन स कृतमापः तम्, लक्ष्मीजनकत्वादिति भावः। शं करोतीति शंकृत् तम्, आपन्ना प्राप्ताः वारणा जलगजाः येन सः अपन्नवारणः तं[२] सागरं समुद्रं आलुलोके लोकितवती। अर्धयमकम्॥५८॥

१- तन्त्रेतः 'क'
२- तले, 'क'

य: फेनैः जनयित्वेन्दु तारान् प्रजनयन्निव ।

विष्णोः शयनभावेन पुष्पाञ्चित इवा बभौ ।।५९।।

पञ्चभिः श्लोकैः समुद्रं वर्णयति -

य इत्यादि । यः समुद्रफेनैः हिण्डीरैः हेतुभिः इन्दुं जनयित्वा ताराः नक्षत्राणि प्रजनयन्निव विष्णोः शयनभावेन तुल्यत्वेन पुष्पैः आचित इव व्याप्त इव आबभौ शोभितवान्। अत्र फेनानां तारात्वेन शयनगतपुष्पत्वेन चोत्प्रेक्षणादुत्प्रेक्षालङ्कारः ।।५९।।

आवर्तपतितभ्रान्ता यस्मिन् सलिलमानुषाः ।

तरङ्गमर्दलारावैरनृत्यन्निव सर्वतः ।।६०।।

आवर्तेति । यस्मिन् समुद्रे आवर्तेषु जलभ्रमिषु पतिताः ते च ते भ्रान्ताश्च सलिलमानुषा जलमनुष्याः तरङ्गा एव मर्दला मदङ्गाः तेषाम् आरावैः ध्वनिभिः सर्वतः समन्तात् अनृत्यन्निव नृत्यवन्त इव। तद्गतविष्णुप्रीत्यर्थमिति भावः ।।६०।।

मुरारिशयने यत्र मेघ खण्डाः पिपासवः ।
नीलापटकृतप्रोद्यदुपधानश्रियं दधुः ।।६१।।[१]

आहवे गजनक्राणां प्रेरितानां पयोनरैः ।
मग्नाद्रिशिखराभोगा यत्राभूवन् वरण्डकाः ।।६२।।

आहव इति । यत्र समुद्रे मग्नाद्रीणां मग्नशैलानां शिखरभागाः श्रृङ्गप्रदेशाः। पयोनरैः जलमनुष्यैः अधोरणीभूतैरिति भावः। प्रेरितानां गजनक्राणां मातङ्गाकारयादसाम् आहवे परस्य युद्धे वरण्डकाः मध्यमभित्तयः अभूवन्। अत्र लोके मध्यमभित्तिं कृत्वा गजान् योधयन्तीति लौकिकीरीतिरनुसन्धेया ।।६२।।

१- श्लोकस्यास्य टीका दैवशान्नोपलब्धा।

आरणद्भिः परीतो यो विहङ्गैः सारसादिभिः ।
धरणीमेखलात्वेन किङ्किणीभिरिवाकुलः ।।६३।।

आरणद्भिरिति। यः समुद्रः आरणद्भिः रवद्भिः सारसाः आदिर्येषां ते सारसादयः तैर्विहङ्गैः पक्षिभिः परितः व्याप्तः सन् धरण्याः भूमेः मेखलात्वेन किङ्किणीभिः क्षुद्रघण्टाभिः आवृत इव व्याप्त इव स्थित इत्यर्थः। अत्र कूजज्जलपक्षिणां भूमेखलाभूतसमुद्रस्थापितकिङ्किणीत्वेनोत्प्रेक्षणादुत्प्रेक्षालङ्कारः ।।६३।।

तस्य पारे प्लवङ्गेन्द्राः समयातिक्रमातुराः ।
दर्भानास्तीर्य ते रत्नगर्भायां समुपाविशन् ।।६४।।

तस्येति। प्लवङ्गेन्द्रा हनूमदादयः कपीश्वराः तस्य समुद्रस्य पारे .... (?) आतुराः पीडितास्सन्तः रत्नगर्भायां भुवि दर्भानास्तीर्य आच्छाद्य समुपाविशन् समुपविष्टाः प्रायोपवेशं चक्रुरित्यर्थः ।।६४।।

तदा सम्पातिना नाम शनैः सम्पातिना विना ।
सहसाज्ञापिता सीता राक्षसाज्ञापिता पुरि ।।६५।।

(तदेति।) तदा प्रायोपवेशकाले शनैर्मन्दं सम्पातः समीपगमनम् अस्यास्तीति शनैः सम्पातिना तस्य पक्षशून्यत्वादिति भावः। सम्पातिनाम पक्षिणा कर्त्रा पुरि लङ्कायां राक्षसस्य रावणस्य आज्ञाम् इयमशोकवनिकायां निरोद्धव्येत्याज्ञाम् आपिता प्रापिता सीता ज्ञापिता। लङ्कायामस्तीति निवेदयित्वेत्यर्थः। चतुरक्षरमध्ययमकम् ।।६५।।

कपिगणोऽथ निशम्य कृतोत्सवं
द्विजवचो जवचोदितविक्रमः ।।
अजनि धीररवो लवणाम्बुधिं
स सलिलं सलिलङ्घयिषुस्तदा ।६६।।

कपीति। अथानन्तरं सः कपिगणः कृतः उत्सवो येन तत्तथोक्तं, द्विजवचः सम्पातिवाक्यं निशम्य श्रुत्वा तदा तत्काले वने यः जवेन वेगेन चोदितः प्रेरितः विक्रमः पराक्रमो यस्य स तथोक्तः। धीररवः गम्भीरध्वनिः सन् ससलिलं सजलं लवणाम्बुधिं लङ्घयितुमिच्छुः लिलङ्घयिषुः अजनि जातः ॥६६॥

अकुशलानधिगम्य हरीश्वरान्
लवणसागरलङ्घनकर्मणि ।
नियुयुजे बहुलादृतिजाम्बवान्
पवनजं वनजङ्गमशेखरम् ॥६७॥

अकुशलानिति। जाम्बवान् हरीश्वरान् अङ्गदादीन् कपीश्वरान् लवणसागरस्य लङ्घनकर्मणि अकुशलानदक्षानधिगम्य ज्ञात्वा वनजङ्गमानां वनेचराणां कपीनां शेखरं श्रेष्ठं पवनजं हनुमन्तं बहुला आदृतिरादरो यस्मिन् कर्मणि तत्तथा नियुयुजे नियुक्तवान् ॥६७॥

वक्त्रे दधद्विकचपाटलपद्मलक्ष्मीं
रत्नाकरस्य तरणाय तदा हनूमान् ।
आरोहति स्म शिखरीन्द्रवरं महेन्द्रं ।
पूषोदयाचलमिवाम्बरलङ्घनाय ॥६८॥

इति श्रीचित्रबन्धरामायणे वेङ्केश्वरेण विरचिता
किष्किन्धाकाण्डकथा सम्पूर्णा चतुर्थः सर्गः ॥ ४ ॥

वक्त्र इति। हनुमान् तदा नियोगसमये वक्त्रे विकचानां पाटलानां पद्मानां लक्ष्मीं दधत् दधानः सन्, अनेन हर्षादयो व्यज्यते। रत्नाकरस्य समुद्रस्य तरणाय शिखरीन्द्राणां पर्वतश्रेष्ठानां पर्वतश्रेष्ठं महेन्द्रं पूषा सूर्यः अम्बरस्य आकाशस्य लङ्घनाय उदायचलमिव आरोहति स्म आरूढवान्। रोहतेर्लट्। स्मेति भूतेर्लङ्। उपमालङ्कारः ॥६८॥

इति श्रीचरकूरिकोण्डुभट्टोपाध्यायतनयश्रीयज्ञनारायण
भट्टविरचितायां चित्रबन्धरामायणव्याख्यायां चतुर्थः सर्गः ॥

पञ्चमः सर्गः

यथा रात्रिञ्चरेशस्य शिरश्शैलस्य शेखरम् ।
अङ्घ्रिणाताडयद्ग्रस्तलताकेशं कलानिलिः[1] ।।१।।

(निरोष्ठ्यम्)

यथेति । अनिलस्यापत्यं पुमानानिलिः हनूमान्, ग्रस्तैः गणितां वेऽशा इव यस्य तत्तथोक्तम् । अन्यत्र ग्रस्तलता लतासदृशकेशाः[2], शैलस्य महेन्द्रस्य शेखरं शिखरं रात्रिञ्चराणां राक्षसानां ईशस्य रावणस्य शिरो यदा(था) शैल इव अङ्घ्रिणा पादेन अताडयत् ताडितवान् । उपमालङ्कारः । निरोष्ठ्यम् ।।१।।

वारं वारं वरारावं वार्वरं रविवाररः ।
वारं वारं वरिविरो[3] रुराव[4] विरिवावरः ।।२।।

वारं वारम् । वरारावम् । वार्वरम् । रविवाररः ।
वारं वारम्[5] । वरिविरः । रुराव । विः । इव । अवरः ।।

(द्व्यक्षरी)

१- तालयं स्रस्तु, 'ख'
२- शर, 'ख'
३- वरिरिरो, 'ख'
४- रुवार, 'ख'
५- रुवाव, 'ख'
५- वारवारम्, 'ख'

वारमिति। रवेः सूर्यस्य वारं निवारणम् राति आददाति इति रविवारकः (रः) सूर्यतोदक इत्यर्थः। सूर्यमण्डलग्रसकाल इति भावः। वराः ब्रह्मेन्द्रादिदत्ता अस्य सन्तीति वरीवीरः हनूमानित्यर्थः। वरः श्रेष्ठः आरावो यस्य सः तम्। पार्श्वम् अम्बुधिपतिं (तीरं) समुद्रं वारं वारं वारयित्वा वारयित्वा समुद्रध्वनिमाच्छाद्येत्यर्थः न विद्यते वरः यस्मात् स अवरः सर्वश्रेष्ठः। विरिव गरुत्मान् इवेत्यर्थः। वारं वारं बहु[१]वारं रुराव शब्दितवान्। अल्पं हीनं कृतवानित्यर्थः। द्व्यक्षरी ॥२॥

निविभ्राणन्[२] श्रुतिप्रान्तौ[३] चालयन् बालमायतम् ।
सं प्रसारितदोर्दण्डो लिलङ्घे लवणाम्बुधिम् ॥३॥

निविभ्राणन्निति। स हनूमान् श्रुतिप्रान्तौ कर्णाञ्चले निविभ्राणन् उन्नमयन् आयतं दीर्घं वालं लाङ्गूलं चालयन् कम्पयन् प्रसारितौ दोर्दण्डौ[४] येन सः तथोक्तः, लवणाम्बुधिं लिलङ्घे लङ्घितवान्। अत्र स्वभावोक्तिरलङ्कारः ॥३॥

री(रि)रारि लालालीलूलो लोलुलोलो लुलो[५]ऽररम् ।
लोलाली(लि) लालीलालीरो ली[६]लोल्लालं लिला (ललौ) ललः ॥४॥

री(रि)रारि लाला लीलूलः। लोलुलोलो लुलः। अररम्।
लोलाली (लि) लालि)। इलालीरः। ली[७]लोल्लालम्। लिला (ललौ) ललः॥
(एकाक्षरी)

१- भव, 'ख'
२- नीलः भ्राणन्, 'क'
३- भ्रान्तौ, 'क'
४- दोदर्नि, 'ख'
५- लुरा, 'ख'
५- लुरा, 'ख'
६- लिलो, 'ख'
७- लिलो, 'ख'

रिरेति[1]। रिरारि लालालिलूलः लोलुलः लु(लो) लुलः अररम्। लोलालिलानि इलालीरो लिलोल्लारं (लं) ललौ ललं (ललः)। रिःगतिः ताम् राति आददातीति रिराः। ते च ते अरयश्च प्राप्तशत्रव इत्यर्थः। रीङ् गतावित्यस्माद्धातोः क्विपि सति, रा आदाने इत्यस्माद्धातो रातोऽनुपसर्गे (क)[2] इति कप्रत्यये च कृते। रिरशब्दः निष्पन्नः। तेषां लाला जिह्वाजलानि तासामाशीः परम्परा तस्याः लुः छेदनक्रिया लुञ् छेदन इत्यस्माद्धातोः क्विप्प्रत्ययः। तां लाति इति रिरारि लालालिलूलः। भीत्युत्पादनेन शत्रुलालाच्छेदक इति भावः। लोलुललः अभीक्ष्णं चञ्चलं लुलसंचलन इत्यस्माद्धातोर्यबन्तात् चेद्यचि कृते लोलुलशब्दो निष्पन्नः। अस्य द्विर्भावम्। अररं मित्रवर्गस्य कपाटकल्प इत्यर्थः। लोलश्चसावलिश्च[3] लोलालिः चञ्चलभृङ्गः तद्वत् ललतीति लोलालिलालि। इला भूमिः तस्यां लिः लयनक्रिया तां रातीति इलालीरः। लङ्घनसमये भुव्येकान्तलीन इत्यर्थः। लिलिलयने[4] इत्यस्माद्धातोर्भावे श्विञ् इति। ललातीति ललः। चलितः स हनूमान् लीलया उल्लालं उल्ललनं अल्ल (लन) मित्यर्थः। ललौ आदत्तवान्। समुद्रं लङ्घितवानित्यर्थः। रलयोरभेदन्यायेन एकाक्षरीति बोद्धव्यम्॥४॥

तस्य वेगादनुत्पत्य भूरुहाः क्षितिनन्दनीम्।
विचेतुमिव पाताले निपेतुस्सागराम्भसि॥५॥

तस्येति। भुवि रोहन्तीति भूरुहाः वृक्षाः तस्या हनूमतो वेगादनुत्पत्य अनुक्षितिनन्दनीं सीतां करणाधिकरणयोश्च[5] इति करणार्थे ल्युट्। 'टिड्ढाणञ्'[6] इत्यादिना ङीप्। पाताले विचेतुमिव मार्गितुमिव स्वेषामपि क्षितिजत्वाविशेषात् सोदरीमार्गणमुचितमेवेति भावः।...(?) जले अम्भसि निपेतुः पतिताः। पतेर्लिट्॥५॥

१- रेरेति, 'ख'
२- अष्टाध्यायी (३।२।३)
३- लोलश्च आसु वलिश्च, 'ख'
४- लिं लिलयिल, 'ख'
५- अष्टाध्यायी (३।३।१७०)
६- अष्टाध्यायी (४।१।१५)

महेन्द्रवैरिर्मैनाको महेन्द्रगिरिमर्दनम् ।
मारुतिं पूजयाञ्चक्रे योग्यो योग्येन पूज्यते ।६।।

महेन्द्रस्येति। महेन्द्रस्य देवेन्द्रस्य[१] वैरी शत्रुः पर्वतानां पक्षखण्डन समये जलधौ पतित इति । महेन्द्रगिरिमर्दनं तन्नामक गिरिविशेष ध्वंसकं मारुतिं हनूमन्तं मैनाकः हैमवतः पूजयां चक्रे सत्कारं कृतवान् । लोके स्वशत्रुमारकं जनाः पूजयन्ति इति लोकन्यायात् । योग्यो योग्येन अन्येन पूज्यतेति अर्थान्तरन्यासालङ्कारः ।

सुरसा रारास (रसा) लासा सरसा सरसी (सि) सरा ।
रसालसा सुरसा सा ससार सुरसालसा ।।७।।

सुरसा रारास लासा। सरसा। सरसी[२] सरा।
रसालसा।सु र[३] सा सा। ससार। सुरसा। अलसा।

(द्व्यक्षरी)

दिवा दिवेवदा वेवावेदि दैवे वदावदे ।
देवी विवादाद्वा देवे देवा विदिदिवुर्दिवि।।८।।

दिवा। आदिदेवदा। वेवावेदि दैवे। वदावदे।
देवी विवादात्। वा देवे। देवा[४]। विदिदिवुः दिवि।

सिंहिकादारणोद्भूतशोणिता[५]लेपपाटलः ।
जगामाब्धे[६] परम्पारं लङ्कादाहीव[७] पावकः ।।९।।

विलङ्घ्य जलधिं तस्मिन् सुवेलस्थं पराम्बुधिम् ।
नूनं विलङ्घितुं[८] भास्वानारुरोह पराचलम् ।।१०।।

१- अतः परं टीका अनुपलब्धा।
२- सरसि, 'ख'
३- सार, 'क'
४- देवा, 'क'
५- शोणातालेपपाडलः, 'क'
६- जगामादे, 'ख'
७- दाहिव, 'क'
८- विलङ्घितं, 'क'

विधुस्सन्ध्यातपालेपपाटला वनपादपाः ।
हनूमदागमामोदात्सद्यः पल्लविता इव ॥११॥

सायंकाले दधौ स्फारं नभो माणिक्यमण्डलम् ।
नटन्नृन्महानटाटोपगलन्मूपुरसम्भ्रमम् ॥१२॥

ननिलं नलिनं नालं लोलनालं ललानिलम् ।
नालानं नालिनोऽलूनं नलिनं ललनाननम् ॥१३॥

ननिलम् । नलिनम् । नालं लोलनालम् । ललानिलम् ।
न आलानम् । न अलिनः । अलूनम् । नलिनम् । ललनाननम् ।
(द्व्यक्षरी)

तदानीं पाटलीभूता जीमूता विरराजिरे ।
सन्ध्यादुर्गामुदे दत्ता बलिमांसोत्करा इव ॥१४॥

तरुराततरां तीरे तारेरीति रतं रुतम् ।
तारारातौ तरीरेतं ततं तरति तं ततः ॥१५॥

तरुः[1] आततरा[2] तीरे । तारेरीति रतम् । रुतम् ।
तारा रातौ । तरीः । एतम् । ततम् । तरति । तम् । ततः ॥
(द्व्यक्षरी)

नलिन्यः संकुचत्पद्मजठरालग्नषट्पदाः ।
वल्लभेऽस्तङ्गते स्वीये विषं घोरमिवावमुः ॥१६॥

आललम्बेऽम्बराभोगः[3] सन्ध्यारागेण रञ्जितः ।
कुसुम्भकुथसंस्तीर्णकुञ्जराधिपडम्बरम् ॥१७॥

१- ररू, 'क'
२- आतततां, 'क'
३- वराभोगः, 'ख'
४- रागानरञ्जितः, 'क'

महत्तमतमस्तोम[1]सङ्कुलं धरणीतलम् ।
उद्रिक्तशम्बराशातिवह्निदग्धमिवाबभौ ।।१८।।

नभस्सरः[2] कैरवाभा निशावल्लीसुमोपमाः ।
सन्ध्याग्निजा बभुस्तुङ्गाः स्फुल्लिङ्गा इव तारकाः ।।१९।।

स्थूलसूक्ष्मतमाकारतारकानिकराकुला ।
द्यौ स्म विभ्राजते मुक्तातोरणार्थेन चालनी ।।२०।।

तदानीं मारुतेर्ध्वान्तसन्ततातनुराबभौ ।
लङ्कायां मर्मरक्षायै वर्मणेव समावृता ।।२१।।

सप्रकारे तदा तस्मिन् प्राकारनिकटं गते ।
हनूमति स्वयं लङ्का । निरातङ्का समाययौ ।।२२।।

दामोद्दामा[3] मन्दमन्दमादमादमदो[4] मदम् ।
मुमोदादिदमामोदिमाममादादिमो मदः ।।२३।।

दामोद्दामा[5] । मन्दमन्दम् । आदम् । आदम् । अदो मदम् ।
मुमोद । आदि (द)[6] मामोदि । मा । ममाद । आदिमः । मदः ।
(द्व्यक्षरी)

तनूकृततनुर्लङ्कां जगाहे वायुनन्दनः ।
अरण्यानिमिवत्कल्पः कीलो दावाशुसुक्षणेः ।।२४।।

१- तोमं, 'ख'
२- सेक, 'क'
३- दामाद्दामा, 'क'
४- मन्दो, 'क'
५- दामाद्दामा, 'क'
६- तमा, 'ख'

प्राचीं स्मो[1]ल्लासयतीन्दोरतिधीरमरीचयः ।
विजहार दिविप्राप्तरतिधीरमरीचयः ।।२५।।
अति धीरमरीचयः । प्राप्तरतिधीः ।। अमरीचयः ।

सुधांशुशकलं प्राच्यां प्रसभं प्रथमोदितम् ।
अनुचक्रे हरित्कान्ताकबरी केतकीदलम् ।।२६।।

उदभाद[2]प्रकाशर्थमरुणं शशिमण्डलम् ।
ततो नक्रैर्महाक्रूरैरर्ध[3]जग्धमिवाम्बुधौ ।।२७।।

करदीपोज्वलैः कर्तुं साहाय्यमिव मारुतेः ।
सीतां विचेतुकामस्य प्रापदापूर्णचन्द्रमाः ।।२८।।

करकाकारकाकारि राकाकारः । कराकरः ।
किराकर् करःकार कारकः करकारकः ।।२९।।
कारकाकारकाकारि । राकाकारः । कराकरः ।
किराकरकरः । कारकारकः । करकारकः ।
(द्व्यक्षरी)

तस्य कीतिर्रिवान्यञ्च[4](त्?) प्रतापोपगमारुणा ।
लङ्कायां वायुपुत्रस्य ववले बालचन्द्रिका ।।३०।।

स्वालग्नरजनीरामा रति[5] चिह्नाञ्जनोपमः ।
हृदीवरक्षसोऽदर्शि कलङ्कश्चन्द्रमण्डले ।।३१।।

१- स्माल्लसयन्तीन्दो, 'क'
२- उदनाद, 'ख'
३- रर्थ, 'क'
४- कीतिर्दिवान्पञ्च, 'ख'
५- रते, 'क'

प्रसारितां नभःपात्रे नव्योत्पलसुगन्धिताम् ।
सुरामिव निशाचर्यश्चकोर्यश्चचन्द्रिकां पपुः ।।३२।।

निलीयमानोऽध्यारोहन्नवरोहन् क्वचित् क्वचित् ।
कर्णं दत्वा गिर[1]श्शृण्वंश्चचार पुरि मारुतिः ।।३३।।

हरिराहाररहो[2]रिहारि हरिरहो हरः ।
हरिहाराहाररोहिहरी रहो रहो रिहो ।।३४।।

हरिः । आहार राहोः । इह आरि हरिरहो हरः ।
हरि हारा हाररोहि हरिः रहो रहो रिहो[3] ।।

(द्व्यक्षरी)

भणितं परिशुश्राव रणितं नूपुरस्य[4]सः ।
फणितं सुप्तयोधानां गणितं रावणौजसाम्[5] ।।३५।।

अत्रान्तरेऽमुनाश्रावि पुररक्षकभावितम् ।
जारचोरादिभीतायाः पद्दणे तमटध्वनिः[6] ।।३६।।

नगरे वीतसञ्चारे श्रुत्वा तु व्यचरद्धरिः ।
क्वचिद्विघटयन् बद्धकपाटं[7] क्वाऽपि लङ्घयन्
पुररक्षिगदाकोणकिङ्किणीगणझङ्कृते ।।३७।।

१- गिरि, 'ख'
२- हीहरारे, 'क'
३- रिहाः 'क'
४- न्यसः, 'क'
५- रावणाजसान्, 'क'
६- ध्वनिम्, 'क'
७- क्वचि, 'क'

धीरो मुखरिताशान्तं जगाहे रावणालयम् ।
इहाविरलचित्रामे कामिनीयत्नकोमले ।
प्रभञ्जन सुतस्सीतां विचिकाय महीसुताम् ।।३८।।

(अन्त्यपादगोपनम्)

तत्राप्यदृष्ट्वा वैदेहीं भक्त्या सम्प्रार्थ्य देवताम् ।
हनूमान् रचितोद्योगो रावणोद्यानमाययौ ।।३९।।

तमाल तिमिर[1] व्रातश्यामलीभूतदिक्तटे ।
यत्र चम्पकपुष्पाणि प्रदीपा इव रेजिरे ।।४०।।

चम्पकावलिविद्यु द्भिर्भृंङ्गझङ्कृतिगर्जितैः ।।
मरन्दवृष्ट्या यत्रासीद्वर्षलक्ष्मीरहर्निशम् ।।४१।।

यस्मिन्न केवलं सीता घटेन दशमौलिना ।
वसन्तश्रीरपि श्रेष्ठा रुरुधे सार्वकालिकी ।।४२।।

भूयोमान[2]प्रसूनाढ्ये मारुताचञ्चलच्छदे ।
भृङ्गार्पितमरन्देव तत्राचरन्मरुत्सुतः ।।४३।।

मार्गित्वा सर्वतस्सीतामारूढशिंशपातरुम् ।
वटस्थ इव रेजेऽसौ पुराणपुरुषोत्तमः ।।४४।।

मां दर्शयत वैदेहीमारादारामपादपाः ।
इति सम्प्रार्थयामास प्रियस्तोत्रवनस्पतिः ।।४५।।

(वैदिकश्चतुर्थपादः)

१- त्रिमिर, 'क, ख'
२- सूर्याहान, 'ख'

ततः संवीक्ष्य वैदेहीं मुदितेऽस्मिन् दशाननः ।
सहारभूषणाढ्याभिर्वनिताभिस्तदन्तिकम् ।।४६।।

(क्रियागोपनम्)

निर्भर्त्स्य तस्मिन् वैदेहीं निर्गते तां निशाचरे ।
न्यवर्तयद् [1]भर्त्सयन्तीस्त्रिजटा स्वप्नवार्तया ।।४७।।

अथावकाशं सम्प्राप्य सीतां श्रु(ति)मनोहरैः ।
[2]साधु रामकथालापैर्मोदयामास मारुतिः ।।४८।।

सा पुरा स्वकुचालिप्तचन्दनाणुसुसङ्गताम्[3] ।
विशश्वासोर्मिकां दृष्ट्वा निशश्वास[4] तदर्पिताम् ।।४९।।

स्वविक्रमे संशयानां मैथिलीं मारुतात्मजः ।
अदर्शयन्निजं रूपं दुर्दर्शमपि निर्जरैः ।।५०।।

तारकाकिङ्किणीजालसङ्कुलायतमेखलम् ।
खरारिविजयस्तम्भाकारदोर्दण्डमण्डितम् ।।५१।।

तदङ्गवृद्धिमालोक्य सीता विस्मितमानसा ।
शशङ्के तत्क्षणे[5] लङ्काप्राकारस्य विदारणम् ।।५२।।

चूडामणिं गृहीत्वाथ सीतादत्तं समीरजः ।
वनभङ्गं कर्तुमैच्छन्मानभङ्गं च रक्षसाम् ।।५३।।

१- तर्सयन्ती, 'के'
२- सादु, 'ख'
३- सङ्गता, 'ख'
४- निशश्वासवितदर्पिताम्, 'क'
५- रक्षणे, 'क'

कुपितेन प्लवङ्गानां कुञ्जरेण बलीयसाम् ।
रावणोद्यानमुत्फुल्लपुष्पमालाविराजितम् ।।५४।।

(क्रियागोपनम्)

राज्ञापि कुपितेनाथ[1] प्रेरितान् पञ्चसैनिकान् ।
हत्वानयत्पञ्चभावं सप्तमन्त्रिसुतानहो ।।५५।।

एत्य दृष्टं कटाक्षाभ्यां मृत्युरावणयोस्ततः ।
तस्मिन् रुषा शरानक्षस्सहास[2]वदनोज्ज्वले ।।५६।।

(क्रियागोपनम्)

भ्रमयित्वा चिरं पादे गृहीत्वा[3] भुजयोर्कपिः[4] ।
अपात्यत (तदा) क्षोणा(हि) वात्ययेव तृणं[5] लघु ।।५७।।

अक्षेहते जयं प्राप्तो विधाय परितोरणम् ।
तस्थौ युद्धाय सोऽनेकविधाय परितोरणम् ।।५८।।
विधाय । परितः । रणम् । अनेक विधाय । परितोरणम् ।

अमोघ ब्रह्मवाक्येन मेघनादेन नादिना ।
नित्यमुक्तावबद्धो[6] हि स निन्ये रावणान्तिकम् ।।५९।।

उच्चवालासनासीनस्सोऽधः[7] कृत दशाननः ।
न्यवेदयदथात्मानं रामदूतमपेतभीः ।।६०।।

१- नाथे, 'क'
२- सहाह, 'क'
३- द्रुहिर्वा, 'क'
४- कपेः, 'क'
५- त्यणं (णुं), 'क'
६- मुक्तो वदो धींढ, 'क'
७- सेधः, 'क'

स पृष्टरामवृत्तान्तवनभङ्गप्रयोजनः ।
आचचक्षे सभामध्ये सूचितस्वामिपौरुषम् ।।६१।।

पूपोऽपि पूपपूः पापा पापपं (पापपः पि) पाः ।
पिपाः पपौ पपौ[1] पापं पापापापं पपौ पपौ ।।६२।।
पूपः । अपि । पूपपूः । पाप । पापपं पापपः । पिपाः ।
पिपाः पपौ पपौ । पापं पापापापम् । पपौ पपौ ।
(एकाक्षरी)

अधुनारिवधं यागं विधित्सौ वालिवैरिणि ।
[2]आनेतुमहमागच्छं लङ्कां[3] दशशिरःपशुम् ।।६३।।

मदीयं भुजकण्डूतिवारणाय वने लताः[4] ।
मया निकसितास्सद्यः पतिता धरणी तले ।।६४।।

इत्याकर्ण्य तदालापं कुपितो दशकन्धरः ।
दीपयामास लाङ्गूलं गतबुद्धिर्हनूमतः ।।६५।।

तेन दीप्तेन वालेन कपिलश्मश्रु शालिनाम् ।
प्रथमं रावणास्यानां [5]पुर्यग्निकरणं कृतम् ।।६६।।

लङ्काबुभुक्षालोलस्य तल्लाङ्गूलहविर्भुजः ।
ययुः प्राणहविर्भावं[6] दशाननमहागृहाः ।।६७।।

१- पपौः पपो, 'ख'
२- आनेतुमगमागच्छ, 'क'
३- लङ्का, 'क'
४- लता, 'क'
५- वर्यग्नि, 'क'
६- प्राणाहुतिर्भावं

सुवर्णसौधजालानि लङ्कायां दहतामुना ।
देवक्षयहरं सद्यः स्वर्णभस्म व्य[1]धीयत ।।६८।।

गृहाद्गृहल्लङ्घयता दहता तेन[2] नादिना ।
अनुचक्रे पुरारोष[3]पुरारिस्फुटताण्डवः ।।६९।।

दूषितानि प्रतीदाह निस्सरद्धूमरेखया ।
नयनानि निलिम्पानां ययुरानन्दमद्भुतम्[4] ।।७०।।

एकशेषं वनं भङ्क्त्वा पुरं दग्ध्वैकशेषकम् ।
सारितौजोऽग्निकं सोऽब्धौ बालाग्निं निरवापयत् ।।७१।।

पुनराश्वास्य वैदेहीं लङ्घायित्वा स सागरम् ।
मुदितैर्वानरैस्साकं सुग्रीवाराममाययौ ।।७२।।

